॥ श्रीगणेशायनमः ॥

सदाशिवभट्टयाम् ।

शेषंतदीशंचविनत्यलक्ष्मीमीशस्य प्रीत्याह्यचलो-
पियोऽभवत् ॥ लिखामिग्रन्थं निजबुद्धिपुष्टैय-
शिष्टार्थकं विवृत्तिसंग्रहंत्विमम् ॥ १ ॥

कारकविभक्ते र्बलवत्वाद्द्वितीयेति ॥ कुक्कुटांडसमासवत्-
स्त्रीप्रत्ययोत्पतेःपूर्वन्तद्धितः ततस्तुनस एकार्थीभावात् । शरदः
कृतार्थतेतिवत्सामान्येनपुंसकं वा। एतेन तद्धितान्तत्वेन गुणव-
चनत्वावाभात्त्वतलोरित्यस्याप्राप्त्यापुंवत्वासंगतिरित्यपास्तं ।
न च स्वस्त्यादिसाहचर्यादित्यादिमाधवोक्तयुक्त्यापि निर्वाह
इति वाच्यम् । रावणायनमस्कुर्यादिति भट्टिप्रयोगेद्वितीयाप्र-
संगात्। नचासत्वार्थकस्वरादिपठितस्यसप्रयोगः । नमस्पुरसो-
रिति सत्वानापत्तेः तत्रजयमंगलानुरोधेनसविसर्गपाठकल्प-
नेपि स्वयंभुवेनमस्कृत्येत्यादौ समासानापत्तिर्दुष्परिहरा व-
स्तुतस्तु कर्मत्वमिहनविवक्ष्यते इति जयमङ्गलाशयः । अनुकू-
लयितुमित्यास्याध्याहारपरग्रन्थास्तूपायांतरपराइति बोध्यम् ।
एतेन फलाभावात्साहचर्यमिहन व्यवस्थापकमित्यपास्तम् ।
देवानां नमस्करोतीत्यस्य फलस्यसत्वादिति बोध्यम् । फला-
भावादुपपदविभक्ते रित्येवनप्रवर्त्तत इत्यस्यवक्तुंशक्यत्वाच्च ।

केचित्तुसाहचर्यंनात्रनियामकम् । अन्यथा विनिगमनाविरहेणाऽजन्तत्वेनाऽक्षरसमाम्नायि कांतत्वेनवासादृश्यग्रहे देवेभ्योनमोऽत्रेत्यादाग्वे तदापत्यादेवेभ्योनम इत्यत्रानापत्याभाष्याद्याकरग्रन्थासंगतिरेव स्यात् । किञ्चनमोवरिव इति सूत्रेभाष्येनमस्यति देवानित्यत्र चतुर्थीमाशंक्योपपदविभक्तेरिति न्यायेनसमाहितम् । साहचर्येणद्योतकनमः शब्देचतुर्थ्यप्रवृत्तौक्यचः पूजार्थकत्वेननमसोद्योतकत्वेन तदप्राप्त्योभयमप्यसंगतं स्यादित्याहुः । तिरस्कृत्येत्यर्थ इति । फलितार्थप्रदर्शनमिदमिति पाठकाः । एवं चतिरस्कारार्थस्य परिभवतेरेव विचारार्थकत्वमिति नासंगतिरिति भावः । इदमेवयुक्तम् । केचित्तुवैयधिकरण्येनान्वये तत्संबन्धिधातोरित्यर्थः । तदर्थप्रकृतिकण्यन्तधातोरिति यावत् । यद्वाकोशात्तिरस्कारार्थस्य परिभवतेर्धातोर्विचारार्थकत्वेविषयत्वापत्यर्थकत्वे । तदुत्तरणिचातदनुकूलकृत्यभिधानाद्विषयत्वापादनरूपविचारार्थकत्वपरिभावयतेरित्यर्थः एतेन यस्यकोशात्तिरस्कारार्थकत्वं परिभवतेर्नतस्यविचारार्थकत्वम् । यस्य भावयतेस्तत्वंनतस्यकोशात्तत्वमित्युभयमसङ्गतमित्यपास्तम् । यत्तुपरिभवतेस्तिरोभवनंण्यंतस्यतिरस्करणमर्थ इति भूप्राप्तावित्यस्य चौरादिकस्येदं रूपमितिवापरिभाव्येत्यस्यतिरस्कृत्येतिविवरणंसम्यगेवेति तन्न । घयन्तनामार्थानुशासकवक्ष्यमाणकोशसंचारस्यासङ्गति प्रसङ्गात् । ममतुपरिभाव्येत्यादेरयमर्थः । कोशातिरस्कारार्थस्य परिभावशब्दस्य धातोःपरिभाव्येत्यत्रणिलोपेधातुत्ववतः । एतदुक्तिस्तु अनेकार्थत्वेसाध-

कस्य धातुत्वरूपस्य संपत्तिसूचनायेत्यन्ये। वस्तुतः तिरस्कारार्थस्य परिभावशब्दस्यावयवोयोधातुस्तस्येति वैयधिकरण्ये नठ्याख्येयम्। अन्यथा तु न संभवः। उपसर्गसमानाकारत्वेनपरैः पृथक्करणाद्विशिष्टस्य धातुत्वाभावात्। अत एव धातोरनेकार्थत्वादेवपरिभवतेस्तिरस्कारातिरिक्तार्थकत्वादेववासङ्गच्छते। तन्मात्रार्थकत्वेतुव्यावर्त्याभावेनावज्ञाने इति विफलमेवस्यादिति न सङ्गच्छेतेति केचित्। तिरस्कारार्थस्यधातोर्विचारार्थत्वेपीति। इदं चणिच्द्योतक इति पक्षाभिप्रायेणेतिपाठकाः। हेतुमतोति सूत्रस्थोतरग्रन्थविरोधात् द्योतकत्वपक्षरूपकुत्सितयष्टिंव्यवष्टभ्यसमर्थनं तुनरोचतेऽस्माकमिति मन्यते। भाविनोपोति। अत्रग्रन्थस्येति शेषः। इयमित्युक्तिः कौमुदीगतलिङ्गारोपात्। उपमायालिङ्गभेदजदुष्टत्वनिरासायारोपः। यद्वाभाविनोप्यर्थस्यान्यत्रबुध्याविषयोकरणस्यदृष्टत्वाद्धाविसूत्रविवृत्तेरियमित्यनेनपरामर्शः। वृत्तिपरिच्छेदकत्वेनेति। संज्ञाशब्दनिष्ठवृत्तिपरिच्छेदकत्वेनेत्यर्थः। अतस्तस्यापत्यंकर्तरिकृदित्यादीनां नसंज्ञासूत्रत्वम्। अणादीनांजातिशब्दत्वात्। एतेन तव संज्ञासूत्रत्वातिव्याप्तिनिरासायसंज्ञास्वरूपावच्छिन्नेत्यादिक्लिश्यन्तोमिश्रासमाहिताः। अणटित्यादिष्वव्याप्तेश्च। स्वौजसमौडित्यादीनामपीति। अस्यविध्यर्थत्वेवहूनिफलान्यूह्यानि। अविवक्षयानतत्कार्यमिति। नचैकपदे इत्यस्यराजीयतीत्यादिसिद्धयेपदत्वाभाववदुत्तरखण्डकसमुदायत्वमिति परिष्करिष्यमाणत्वेनप्रकृतेचतदाक्रान्तत्वेनतस्यानित्यत्वेनाविवक्षोक्त्यसंगतिरि-

ति वाच्यम् । पदत्वेसतितत्वमिति तदर्थात् । प्रकृतेचसमुदायस्यातथात्वात् । वस्तुतस्तु अनुकरणत्वेनसौत्रत्वाच्चेतिमध्यमणिन्यायेनपूर्वोत्तरयोरन्वयः अनुकरणत्वेनेत्यस्यनिपातानुकरणत्वेनेत्यर्थः । संहिताया अविवक्षयातद्धारणंतुनयुक्तम् । एकसूत्रेतदभावात् । तदुक्तमिकोगुणेति सूत्रेउद्योते एकयोगत्वंचद्वयोस्संहितापाठमात्रेणेति अतएवेकोयणञ्चीत्यत्रसौत्रत्वादेवङ्मुट्वारयिष्यतेग्रन्थकृता। यत्तुक्रमबोधकत्वेनवर्णबोधकत्वान्नकारप्राप्तिरिति तन्न समूहस्यतत्वेपि प्रत्येकंतत्वाऽनपायादितिजरन्त आहुः सौत्रेति औपदेशिकश्रुतित्वस्यस्वयमेवबक्ष्यमाणत्वेन छन्दस्त्वादित्येव वक्तव्येछन्दोवत्सूत्रेत्यऽतिदेशप्रवर्तकं सौत्वादितिकुतउक्तमिति तदाशयःसएवद्रष्टव्यः अन्येतुसौत्राणामिदंसौत्रं पाणिनिसूत्रमूलभूतं तदुपकारकंवाछन्दइत्यर्थः तत्वात्सौत्रत्वाच्छन्दस्त्वादितियावदतएवाण ऽपिसफलोतिदेशप्रवृतावभिप्रेतायान्तु सूत्रत्वस्यैवतत् प्रवृतिप्रयोजकत्वेन तत्वादित्येववदेत् नाणमित्याविष्कुर्वतेतदाशयम् । इदं पञ्चम्यन्तमपि तृतीयांतवत् गुणेत्वन्याय्येति न्यायाच्चप्रातिपदिकत्वप्रतिबन्धकद्वारा एवविभक्त्युत्पत्तिप्रतिबन्धकम् । एतेनातिदेशाल्लुगिति वक्तव्येशास्त्रबाधोक्तिरसंगतेत्यपास्तम् जातलुकिअनुपत्त्यऽन्वाख्यानेपिवा शास्त्रद्वयानुसंधानस्यावश्यकत्वेनप्रत्युततवैव गौरवम् । छन्दसिसर्वविधीनांवैकल्पिकत्वेनाऽभावकल्पनेवाबाधाऽभावेनाऽसङ्गतेरभावश्च एतेन प्रतिसूत्रंप्रातिपदिकत्वस्य वक्ष्यमाणत्वे नतदवयवत्वेनलुकः सिध्यासौत्रत्वादऽणविफलइत्यपि निरस्तंजस्त्वाद्यऽभावायसूत्रप्रकृ-

तिकसुत्रऽनुत्पन्नमेतदादरस्यावश्यकत्वात् किंचलुकिपूर्वभागस्य-
पदत्वेनियमेनप्रत्येकं सूत्रस्यप्रातिपदिकत्वानापत्त्याप्तादरित्सं-
ज्ञानापत्तिरुपायान्तरेणपरिहरणीयास्यात् यत्तुप्रातिपदिकांतत्व-
संपत्त्याणादेरित्संज्ञायैप्रत्येकंसूत्रोपदेशस्यतात्पर्यस्यावश्यकत्वेपि
वर्णोपदेशे आचार्यतात्पर्यकल्पनेनमानम्। एवं बधनादौधा-
दिभ्य इवात्रापिनतदुत्पत्तिः तस्यैव चकारप्रत्ययोपिनेति सौ-
त्रत्वबाहुलकत्वाश्रयणंविफलमिति तन्न वर्णानामुपदेशः लका
रोपदेश इत्यादि भाष्योक्तिस्वारस्यैव तत्रमानत्वादिति सुधि-
योविभावयन्तु इति केचित्॥ बाहुलकादिति। यत्विति॥ एवं
च पुनःशक्तिग्रहाभावेपि ,संध्युपजीव्यानिश्चयेनाविकृतरू-
पाकारादिषु गृहोताऽजादिपदशक्तिः संधिकार्येकृतेऽविकृते-
षु विकृतेषु वेतिसंदेहाद्विरुध्येत इति भाव इति व्याच-
क्षते। केचितूपजीव्यस्य संधिकारणीभूताऽजादिपदशक्ति-
ग्रहस्यविरोधादित्यर्थः। विरोधाभावादिति॥ अविकृतेषु
शतिग्रहमुपजीव्यजातस्य विकृतेषु शक्तिग्राहकत्वेसस्यादिति
भावः॥ ननूपजीव्यस्याविकृतत्वरूपविशेषण अकारादिव-
र्णरूपविशेष्यरूपस्य शक्तिग्रहोपजीव्यस्येत्यर्थः॥ विरोधात्
कृतेसंधौसन्निपातविघातः स्पष्टएव सन्निपातप्रतियोगिनोरू-
पादानग्रहत्यागस्य वक्ष्यमाणत्वादेवं च कैयटः सम्यगेवे-
तिचेन्न॥ पूर्वापरीभावांशे भाष्यादितस्त्यागेपि अन्यत्रत्यागे-
मानाभावादिति भाव इति व्याचक्षते निर्णयसंभवादिति।
यत्वेतत्प्रतीकमुपादायानेन शास्त्रप्रारम्भे एवं संदेहोत्पादकश-
ब्दप्रयोगः स्वाकौशलोल्लापकत्वादाचार्येणापराकृत इति संहि-

ताया अविवक्षायावीजप्रदर्शनमिदं कैयटोपाध्यायानामिति सूचयन्ति अन्यथा निर्णयादित्येववदेदिति व्याचक्षते ॥ तत्राचार्यपदेनमहेश्वरमभिप्रैतिउतपाणिनिः नाद्यः तस्य चतुर्दशसूत्रीप्रारम्भकत्वेपि यावत् शास्त्रप्रारम्भकत्वाभावेनशास्त्रे त्यादिग्रन्थासामंजस्यं स्यात् नान्त्यः मूलाभावादिति वक्तव्यम् सामर्थ्ययोगादिति प्रयोजनसद्भावात् हेतोरित्यर्थः । यत्त्वत्रल्यब्लोपे पञ्चमीसामर्थ्ययुक्तं विहायेत्यर्थ इति भट्टाःतत्कथं सङ्गच्छते किञ्चतस्य किंफलमितिते एव प्रष्टव्याः न निष्प्रयोजनत्वरूपानर्थक्येति । निष्प्रयोजनत्वरूपानर्थक्याभावेसतीत्यर्थः ॥ तद्गुणानर्थक्यप्रत्याख्यनभाष्येणन विरोधोऽभिधेयपरत्वादित्यर्थः तृतीयां तत्वेतूभयोरप्यानर्थक्यप्रतिपादकत्वे नासंगतौ हेतुत्वानुपपत्तिः वेदपारम्पर्य्येणेति परंपरैवपारंपर्यगुरूशिष्यपरंपरेति यावत् वेदसंबन्धिनीयासातयास्मर्य्यमाणम् वेदस्ययेध्यापकाः येचाध्येतारस्तैरधीयमानत्वादध्याप्यमानत्वाच्चास्यापि वेदत्वमिति भावः ॥ अन्त्यवर्णचतुर्दशेति अत्रान्त्याः वर्णाश्चतुर्दशयस्मिन् समूहरूपेतत्रादिलान्तानुबन्धरूपंसमासान्तः सम्यक् यथोचितं उपतत्समीपेकृत्वा आसंमतात्कथिता इत्यर्थ इत्यन्तंभट्टा आहुः अक्षरसमाम्नायमित्याचक्षते इति केचित्तुतं खल्विममक्षरसमाम्नयं ब्रह्मराशिरिति हेतोर्नभुक्त्वाननक्तं प्रब्रूयादिति ऋषयोब्राह्मणेभ्य आचक्षते इति शाकटापनोप्याहेत्यन्वयः आहेति त्वन्मते इवाध्याह्रियन्तेकीर्तयिष्यन्तीत्यादौ शताक्षीनुमः अपर्णानुम इति वाक्यैकदेशस्यशताक्षीमपर्णामित्यस्यानुकरणान्नानुपपत्तिः यथा

श्रुतेऋषय इत्यस्याव्यवहितेप्रोवाचेत्यत्रान्वयोऽपि दुर्वच इति व्याचक्षते परेत्विति ॥ केचित्तु ननु ज्ञानलाघवाभावान्नतद्वै-यर्थ्यमत आह किंचास्येति अत्रहि प्रत्याहारज्ञानस्यतवाऽप्या वश्यकत्वान्नतल्लाघवमिति भावः । लाघवमिति यण्वत इत्यत्रय-वतः इकोयणित्यादौय इकोचिइणोयण्यइणः यणादिपरं यादि-परमित्यादिषु इत्यादिन्यासेनलाघवमिति भावः । यत्रत्विग्यणः यणोमयेत्यादौ यस्येत्यादिन्यासेनलाघवं ॥ तत्र तत्रास्तुणका-रेणैव । अत एव बहुष्वित्युक्तं नसर्वेषु इति एतेन प्रत्युतगौरव-मित्यपास्तम् ननुणोच्चारणमयोपधाद्योचिड्यं इत्यादौ दोषाभा-वाययकारेणाकारेणन प्रत्याहार इति ज्ञापनार्थम् । ययणोः पर्यायत्वाल्लाघवाभावश्चेत्यत आह किञ्चानुबन्धेति हेतो-रव्यापकत्वेति अनुबन्धाः अच्प्रत्याहारग्रहणगृह्यमाणताशू-न्याः प्रत्याहारसिद्धेः प्राक्लुप्यमानत्वादित्यनुमितौ हेतोः प-क्षतावच्छेदकावच्छिन्नवृतित्वरूपव्यापकत्वाभावापत्तेरित्यर्थः । तदुपपादयति तवेत्यादिलोपयोरभावेत्यन्तेन ममत्वकारेऽनुब-न्धत्वस्यैवाभावेननतत्वापत्तिः नन्वक्षुप्रत्याहारार्थो अनुबन्धा इति भाष्यादच्बोधकसूत्रस्थानुबन्धत्वंपक्षतावच्छेदकंनतुके-वलानुबन्धत्वमऽकारेचतदऽभावान्नाव्यापकत्वहेतोः किंचप्र-त्याहारसिद्धेः प्रागित्यस्यकोऽर्थः यावत् प्रत्याहारसिद्धेः प्रा-ग्लुप्यमानत्वमर्थः उतयत्प्रत्याहारे यदऽनुबन्धग्रह आपद्यते-तत्प्रत्याहारसिद्धेः प्रागित्यर्थः नाद्यः हल्प्रत्याहारसिद्धेः प्रा-ग्चादेरपि लुप्यमानत्वाभावात् द्वितीयेतुभाष्येऽजित्युक्त्या-विशिष्यैव पक्षतावच्छेदकस्य वाच्यतयालणित्यलत्याका-

रेतदभावान्नतदापत्तिरतोलक्ष्यासिद्धिमाह प्रत्याहारेत्यादिनापत्तिश्चेत्यन्तेन चकारोव्यापकत्वापत्तेः समुच्चायकः तवादितृतीयान्तस्यग्रन्थस्यचमध्यमणिन्यायेन पूर्वोक्तापत्तावुतरयोश्चतयोरन्वयः वस्तुतोहेतुद्वयाव्यापकत्वापत्तिरित्यर्थः शेषंपूर्ववत् नन्वनुनासिकत्वसमानाधिकरणजातिनिर्देश उतह्रस्वत्वसमानाधिकरणजातेस्तत्राद्ये आह अनुनासिकेति अन्त्य आह सोस्तोति वस्तुतोगुणाभेदकत्वस्यव्यापकजातिनिर्देशस्यचभगवदभिमतत्वेन सर्वत्रदोष इति बोध्यम् । एवंच सोस्यादिरितिनिर्देशरूपाचारोऽत्रसंभवति तदपेक्षयेष्टं व्यापकत्वं तृतीयस्यभज्येतेति नायमित्संज्ञक इति सिद्धम् ॥ अनित्संज्ञकत्वमेवदृढ़यति अत एवेति वार्तिकार्थस्तुगृह्यन्ते एभिस्तानिग्रहणानि अचांग्रहणानिग्राहकाणीति यावत् तेषुअइउणादिसूत्रेषु अधिकरणेसप्तमी प्रत्याहारेनुबन्धानां अजादिसंज्ञार्थमनुबध्यमानानांणादीनामित्यर्थः निमितात्कर्मयोगेतिसप्तमी फलंहितत्रनिमित्तम् प्रत्याहारस्यफलत्वंचतत्करणस्य तत्सिद्धिविषयेच्छाधीनत्वात् कर्मयोगस्तुप्रत्याहारस्याजादिसंज्ञारूपस्य समूहस्यावयवेनानुबन्धेनकर्मणाणादि नासमवायरूपयोगंसत्त्वात् बोध्यइति परात इत्यतः प्राक्प्रत्याहारैवर्णसमाम्नाये इत्यपपाठः पौनरुक्त्यापत्तेर्भाष्येऽभावाच्च नहल्प्रत्याहारेति त्वन्मतेतुसकलप्रत्याहारमूलभूतत्वात् हलंशेएवतदाशंकासमाधानौ चित्येनतदसंगतिः स्वष्टैव नन्विदंभाष्यंहशादिषु टादिग्रहणानापादनादुपलक्षणतयात्वयापि नेयम् अजित्युक्तिस्तु आपाद्यमानग्रहणकानांप्राथम्यादितिनास्माकं प्रतिकू-

लमित्याशङ्कते । न च हशावीति । आदिनेण् । एवञ्चरामष्टीकते अठूस्वित्यत्रोत्वषत्वेस्यातामिति भावः । तदघटितेति हलघटितेत्यर्थः । यद्वातेनोच्चारणार्थवर्णेनघटिताः सहितास्तदघटिताहादिर्यस्तेषां प्रत्याहारेतद्बोधक इत्यर्थः । इणादेरपिहादि बोधकत्वेनतत्वापत्त्यातत्रापिनतेषांग्रहणम् । अजादीनांतुनतत्वमिति न तत्राऽयं समाधिरेतदर्थमेव तदघटितेत्युक्तम् । अन्यथा प्रत्याहारेत्येववदेत् न च पुनःपुनरितिभाष्योक्तेस्तच्चारितार्थ्यम् । यथा पूर्वांचंगृहीत्वांत्यानुबन्धानामक्लिष्टस्य स्पष्टत्वोपपत्तिस्तयाहयवरेत्याद्युपपत्तौयाधकारोच्चारणवैयर्थ्यात् अत एव पुनःपुनरितिवोप्सितम् ननु तदुच्चारणेनोच्चारणार्थवर्णरहितानां तादृशप्रत्याहारेन ग्रहणमिति ज्ञापनेममापि नप्रतिकूलमत आह तद्विषयेति प्रयोगाभावएव भाष्यादितात्पर्यं नतूपलक्षणत्वेइति भावः । बनु राजाहसखिभ्यष्टजतष्टावित्यादिप्रयोगादुपलक्षणत्व एव भाष्यतात्पर्यमतोबाधकाभावेपि साधकाभावान्नानुनासिकत्वमित्याशयेनोपसंहरति तस्मादिति । वस्तुतस्तु ननु साजात्येनटस्य प्राधान्याद्ग्रहणं स्यादित्याशङ्कते न च हशेति अनभिधानाच्चेति चेनेतएवारुचेलोपश्चवलवत्वे इति हेत्वन्तरसमुच्चयः पूर्वोक्तारुचेराह । तस्मादिति इत्यर्थः । यद्वाहशादिग्रहणेटादिग्रहणकथनेत्यस्य संग्रहायकौस्तुभोक्तमेव व्याख्यानमुचित्तं वार्तिकस्यभाष्येऽक्ष्वित्यप्य जादिशब्देष्वित्यर्थकसूत्रचतुष्टयोपादानमपि चतुर्दशसूत्र्याउपलक्षणम् अक्षुहलषुचसमाधिवैषम्यंकुत इति शङ्कायास्तवाऽपिदुःसमाधेयत्वेन तदुपलक्षणत्वेचतुर्णामेव ग्रहणंकुत

इत्यादि मांप्रतिमाचोदयोः । अनुबन्धानांगृहणस्यानिष्टत्वेतान् मैवोच्चोदोरिति शंकानिरासाय भाष्यप्रत्याहारार्था इति एवं चानुनासिकत्वं प्रतिजानतोनशंकापरभाष्यविरोधः तृतीयहेतोरव्याकत्वापत्तिस्तुतवापिदुष्परिहरेति हल्प्रत्याहारसमकालमेव वलादि प्रत्याहारसिद्धौप्रतिबंधकाभावेन बलादिप्रत्याहारेषु टकारादि प्रवेशस्यदुर्वारत्वादित्याशयेनशंकते नन्वेति हशादीत्यादिनावलादीनां टगृहणमुपलक्षणंयादेः उभयमपिदृढयति नपुनरित्यादिना तृतीयहेतोर्व्यापकत्वसमर्थयतः कौस्तुभकृतोपीदमावश्यकमेवेतिभावः । इत्याशयेनशङ्कतेदूषणान्तरमाह हकारादिषु। पुनःपुनरित्यादिनावक्तुंशक्यत्वादित्यस्यागे लकारस्येणादिसंज्ञानापत्तेरनुनासिकत्वप्रतिज्ञानैष्फल्यापत्तेश्चेति भावः। अप्रामाणिकमिति। अनङादिषु प्रयोगसमवायित्वभियाऽनुनासिकत्वाङ्गीकारेप्यावश्यकेन सोस्येत्यादिनिर्देशेनप्रत्याहारबोध्यत्ववारणेनेहतत्त्वेमानाभावइति । अत एव अइउण्सूत्रे उद्योतेविधेयविषये उच्चारणार्थस्यानुनासिकत्वमावश्यकमित्युक्तमिति भाव इतिदिगित्याहुः । तुल्यजातीयेति। ननु तुल्यजातीयेत्यत्रकिंत्वेनसाजात्यम् विवक्षितम् । अञ्झल्त्वाभ्यामिति तुनयुक्तम् । अन्योऽन्याश्रयापत्तेः साजात्येसतितेसंज्ञे तयोश्चसत्योःसाजात्यमितिचेच्छृणु । औकारवृत्त्यच्त्वाव्याप्यधर्मानवच्छिन्नत्वेनाच्यच्त्वाव्याप्येण्त्वादिमादायासंभववारणायाद्यम् । तदवृत्त्यक्त्वादिमादायतद्वारणायद्वितीयम् । हकारवृत्तिहल्त्वाव्याप्यधर्मानवच्छिन्नत्वेनहलितत्।तदव्याप्याट्त्वादिमादायतदवृत्तियण्त्वादिमादा-

यच्चतद्धारणायोभयम्। अज्झल्पदाभ्यांस्वरव्यंजनयोर्विवक्षणा च्चेत्याहुर्नविभक्तावित्यादेरिति आदिनोपदेशेजित्यस्यस्वपूर्वस्यसंगृहः। हलन्त्यमित्येतद्वाक्यार्थजिज्ञासायामुपस्थितपूर्वोत्तरसूत्रयोःसार्थक्यसंपादकेवाक्यार्थे निष्पन्नेपश्चाद्धलपदार्थः क इति जिज्ञासाया मादिरन्त्येनेत्येतद्वाक्यार्थायावृत्तिरिति भावः प्रकृतसूत्रस्थभाष्यमपीहानुकूलम्। अन्येतु प्रथममादिरन्त्येनेत्येतद्वाक्यर्थजिज्ञासायामुपसंजातविरोधिन्यायेन कृत्रिमत्वज्ञानाभावेन कृत्रिमाकृत्रिमेत्यस्याप्रवृत्त्याच्चहलिति सूत्रेन्त्यमित्यर्थे ततोनविभक्तावित्यादिवैयर्थ्यानुसंधाने आवृत्त्याऽर्थान्तरस्य युक्तत्वादिदमसत्। भाष्यन्त्वेकदेश्युक्तमेवेत्याहुः। दशसूत्रावृत्तावितिं। अन्यथा हकारादेः संज्ञाउत अकारादेरितिदुर्निश्चेयं स्यादिति भावः। रुप्रभृताविति। अशोकवनिकान्यायेनैतदुक्तिः ज्ञापकादिनानिवारणेतुतुरुस्तुशम्येत्यादिज्ञापकैरयमपिव्यावर्त्येतेत्याहुः। मनोव्यापारगौरवमिति। नन्वत्र किंगौरवं योगविभागप्रयुक्तंतुन आवृत्तिंकुर्वतात्वयापि वाक्यर्थद्वयस्वीकारात् नियमप्रयुक्तंतुहल् पदाकरणेननिमातव्यम् ज्ञापकंत्वावृत्तिसत्वेनविभक्तीत्याद्याश्रयणोयमेवेतिनतत् कृतमपितर्कितन्यासेऽन्योऽन्याश्रयशंकैवनोदयत इति चेत्सत्यम् अनन्तरन्यायबाधेयोगविभागसामर्थ्याश्रयणेनसत्वात्। तस्मात् अपाणिनीयदोषादुष्टोयंन्यास इति बोध्यम्। मध्यमोवर्ण इति। वृद्धिगुणादिसंज्ञास्विवसंज्ञात्वावगतिः सामानाधिकरण्यात् तथाच मध्यमोवर्ण अन्त्येनसहादीत्संज्ञकोभवतीत्यर्थः। रूपसिद्धिस्त्वाएतइत्यत्रैङोतिपर-

रूपं कृत्वौमाङोश्चेति पररूपकरणेनवोध्या अतएवाङत्रस्रूढौ-
तुनमानमिति नन्वावृत्तौयन्मानंतदेवमानंतत्रेति वाच्यम् ।
शंकापरभाष्यादितस्तदभावानुमितेः इत्यूह्यमिति । यत्वत्रपू-
करणेद्विवचनेनैवनिर्देष्टव्यंस्यादिति पाठकस्तन्न नपुंसकमन-
पुंसकेनेत्येकवचनम् । तस्याप्येकशेषस्यान्याय्यत्वात् । स्पष्टं
चेदंप्रकृतसूत्रेकैयट एव । नन्वेवमपवादवोधात्पूर्वमुत्सर्गवा-
क्यस्यलक्ष्यसंकारकत्वोपपत्तावुदासीनविषय इवापवादविषये-
पि प्रवृत्त्यापत्तौपश्चाद्धुक्तवन्तम्पूतिब्रूयान्माभुक्था इति तेन
किंकृतं स्यादितिस्थानेंतरतमसूत्रभाष्योक्तन्यायवोधितापवा-
दशास्त्रवैयर्थ्यापत्तिमूलकेन प्रातिपदिकार्थसूत्रभाष्यपठितेन-
पूर्वमित्यादि न्यायेनोत्सर्गवाक्यार्थ बोधात्पूर्वमपवादवाक्यार्थ
बोधस्यावश्यकत्वसूचनेन प्रागुक्तरीत्यासुप्तिङ्निष्पत्त्यभावे-
नान्योऽन्याश्रयस्तदवस्थएवात आह । पूर्वंह्यपवादेत्यादि इति
वाक्यस्येवापवादशास्त्रस्येति।वाक्यस्येवापवादशास्त्रस्य वैयर्थ्या-
पत्त्याचापवादशास्त्रपर्य्यालोचनेनेत्येवपाठ इत्यन्ये न्यायाऽनङ्गी-
कारेपीति ननूक्तलुगादिस्थले तथासुवचत्वेपि तस्यलोपइति
विषयेनैवं वक्तुंशक्याइति दोष एवेत्याशंक्येदसुलभमिति दि-
गिति। दिगर्थस्तु तुस्मभिन्नाहलइत इति प्रथमवाक्यार्थेन-
पादीनामित्त्वंत्ततोविभक्तिपदार्थनिश्चये विभक्तिस्थतुस्मभिन्ना-
हलइत इति द्वितीयवाक्यार्थेनाविभक्तिस्थतुस्मानामित्त्वमिति
नन्वेवं नाज्झलावित्यत्रापि आक्षरसमाम्नायिका अचोहलश्चमि-
थोनसवर्णा इति । प्रथमवाक्यार्थेप्यणुदित्सूत्रबोधनान्तरम-
चस्तदृहीताश्च हल्भिर्मिथोनसवर्णाइति द्वितीयोवाक्यार्थः ।

स्यादेव तथाचाकारप्रश्लेषोऽव्यर्थः वाक्यापरिसमाप्तिप्रतिपादकभाष्यासंगतिश्चेति चेन्न । नविभक्तावित्यादौ विभक्तिग्रहणसामर्थ्यात् । द्वितीयवाक्यार्थाङ्गीकारेप्यन्यत्र तदङ्गीकारेमानाभावात् स्पष्टार्थत्वेयंरीतिः प्रकृतसूत्रेशब्दरत्ने यथासंख्यसूत्रसामर्थ्येन तत्र तथाङ्गीकारेप्यत्रतथाकल्पनेमानाभावादित्यादिना नन्वेवमपि हलन्त्यमित्यस्य बोधकाले उपदेशेऽजितिनाञ्झलावित्यनयोर्बोधाभावेनाणुदित्यस्य वाक्यार्थज्ञानेनोदितः सवर्णाग्राहकत्वाभावान्नविभक्तावित्यत्रतु शब्दस्यतवर्गबोधकत्वाभावेन तदज्ञानासम्भवाद्विभक्तिस्थनकारस्येत्वापत्तिः पकारस्येवदुर्वारा। तुशब्दस्तुतिथोरिति वदुच्चारणार्थोकारेण तकारमात्रबोधक इत्येवस्यादिति चेन्न परस्मिन्नित्यादिनिर्देशैरिहत्यहल्पदस्य नकारभिन्नतत्परत्वनिश्चयात् एवं सतिवर्गग्रहणव्यर्थमिति चेदस्तु तथा नाञ्झलावित्येतस्य प्रयत्नभेदप्राप्तसावर्ण्याभावानुवादकत्वमिति मतेतुशब्दस्योदित्संज्ञकत्वमितिमतेच उदितःसवर्णग्राहकत्वस्य पूर्वमपिसम्भवेनादोषाच्च मतान्तरेपिलोपादिनेवजातनिवृत्तेरङ्गीकाराच्च नविभेत्यत्रतुलुप्तनिर्दिष्टोनकार इत्यस्यापि वक्तुंशक्यत्वाच्च आदिरन्त्येनेभयोपादानेतु एतदग्रेनदोषोलोके इति पाठः प्रतीतिर्लक्षणावश्यकत्वेहेतुः लक्षणस्यानापत्तौहेतुत्वबोधकःसोन्त्यइतीति । इतेतिकिमिति । अस्यचतुर्दशसूत्र्येकवाक्यतयातत्सूत्रान्त्यस्य ग्रहणेनतस्यत्वस्यैव सत्वादिति प्रश्नः। माभूदिति। तदेववाक्यत्वेपि सूत्रान्त्यस्यैवग्रहणेमानाभावेन विवक्षितसमुदायान्त्यत्वस्यणादावपिसत्वम्। परस्मिन्सतीत्यादिलक्षणमपि विवक्षा-

निबन्धनम्। अतएवेगादि प्रत्याहारसिद्धिः। अन्यथा तत्तत्सूत्रा-
देरेव ग्रहणेतदसिद्धिः स्पष्टैव। एतेनपूर्वस्यदीर्घोण इत्यादिज्ञाप-
काद्येन प्रत्याहारस्तदवधिकानामेव ग्रहणेसिद्धेऽन्त्यपदसाम-
र्थ्यात् सूत्रान्त्यग्रहणेनसिद्धेइतेतिसुत्यजम्। एवंह्यन्योऽन्याश्र-
यश्चनेत्यपरंलाघवमित्यपास्तम्। एवं चेग्ह्रस्व इत्यादिज्ञापका-
द्योवधिकस्तदवधिकानामेव पूर्वेषामाक्षेपेसिद्धे आदिग्रहणसा-
मर्थ्यात्सूत्रादेरेवग्रहणापत्येगाद्यसिद्धि प्रसङ्गात्। ज्ञापकात्सू-
त्रावयव प्रत्याख्यानेवह्वापत्तेश्च। सूत्रेषु। वर्णसमाम्नायसू-
त्रेषु। तदभावादिति। लोपस्यसामर्थ्यादभावे फलाभावात् संज्ञा-
पिनेत्यर्थः यत्तुशक्तिग्रहात् पूर्वमर्थवत्वाभावेन प्रातिपादिक-
त्वाभावात् व्यवसितान्त्यत्वाभावेन संज्ञाप्राप्तिरेवनेति। तन्न।
यत्वसतिप्रातिपदिकत्वेपरिष्कृतार्थवत्वम्भावितत्र संज्ञे तितद-
र्थात्। अन्यथाराम इत्यादावपि सतिप्रातिपदिकत्वेपरिष्कृतार्थ-
वत्वमित्यात्माश्रयः स्यात्। आदिरन्त्येनेतिशक्तिग्राहकप्रवृत्ति-
स्तुनफलम्। इकादिषु कादेरित्वेपि चतुर्दशसूत्रीसम्बन्धिविव-
क्षितान्त्यत्वाभावेनेदन्त्यसदृशेनेत्यर्थावश्यकतया संज्ञाविरहे-
पि तत्प्रवृत्तेरित्याह। अन्त्येनेत्यस्येदन्त्येनेति ननु ततत्सूत्रेषु
लोपाभावस्यसामर्थ्यात् कल्पनापेक्षयाचतुर्दशसूत्र्यामेवोच्चारण-
सामर्थ्यात्तदभावः कल्पताम्। एवं ह्यन्तपदेलक्षणाश्रयणंन ह-
लिअकारग्रहाभावायावश्यकाचारात्तेषां प्रत्याहारवाच्यतापिने-
ति चेन्न। व्यक्तिपक्षेऋलक् सूत्रस्थस्येगादिशब्दस्थस्य कृत्स्न-
स्यभेदात्तथार्थावश्यकत्वेन तदेकवाक्यतयाजातिपक्षेपि तथैवो-
च्चितत्वात्। तथासतिलोपश्च वलबत्तरइति भाष्यासंगतिप्रसङ्गश्च

तदेतदाहव्यक्तीति। नन्विणादिप्रत्याहारेजादीनां ग्रहणंमाभू-दिति कथमुक्त मृकारादीति वक्तव्यम्। अत आहाचीत्यन्येव-तारयन्ति। हलन्त्यम् सिद्धत्वादिति अलोन्त्यात् हलोऽनन्तराः तत्पुरुषः समानाधिकरणमिति कृत्पितौपितिकृतीत्यादाविति भावः इत्संज्ञायाः परित्राणेतिपंचमीसमासः नान्तरोयेति अ-न्यनिष्पादकतयानिष्पाद्यत्वेनेत्यर्थः।उच्चारणेपीति शेषःतेनेति अध्याहारेणेत्यर्थः। आद्योच्चारणकालइत्संज्ञाभवनमित्यर्थेतुन स्यात्। तत्रार्थेबाधश्च। तत्कालात्पूर्वमनभिव्यक्त्या तत्काल इत्संज्ञायादुर्वचत्वात्। नाज्झलाविति सूत्रभाष्यविरुद्धत्वाच्च। त-दव्यवधानेति यथोद्देशइदम्। अनुबन्धविनिर्मुक्तस्यैव पदार्थो-पस्थितिरित्यर्थः। गुरुकुलवत्समासः। नन्वेवान्त्यस्य लोपेनतत् शक्त्यातदुपस्थिति र्वाच्येतितस्यैवार्थवत्वात् ततोविभक्त्युत्प-त्तिरुचिता। अनुबन्धस्तुतदग्रे वाच्योऽत आह धुडितीति। तत्र संज्ञायामपिलोपोनउच्चारणसामर्थ्यात्। अन्यथा स्वरूपप्रतिप-त्तिरेवन स्यादिति भावः वैयाकरणेति व्याकरणशब्दाद्विकारे-ऽनुदातादेश्चेत्यञि आद्युदातवैय्याकरणशब्देचित इत्यन्तो-दात्तत्वापत्तिरित्यर्थः। यद्यपोत्वेपि प्रत्याहारसिद्धिरूपफल-सत्त्वेनानर्थक्याभावात्तदुपस्थाप्येनतत्कार्यमितिसमाधानंवक्तुं शक्यं तथापि न्याय्यसमाधिमाह। तत्वाभावेति। प्राति-पदिकान्तत्वात्तुनतत्वं। यत्र संज्ञातत्रफलाभावेन तद्विषये-त्संज्ञाशास्त्रस्य वाक्यस्यानुपस्रवात्। धुडादौतुतत्तदनुबन्ध-सामर्थ्याद्वाक्यमुपल्पवते। इति तत् सामर्थ्यादुपस्थाप्येका-र्थ्यमिति बोध्यम्। नविभक्ताविति स्यानर्थक्यं परिहरन्नुपजनि-

ष्यमाणेति न्यायमूलकमर्थमाह। विभक्त्यादीति। आदिनाप्रत्ययपरिग्रहः यत्रतुसुङस्योरौद्सुपोर्न विभक्ते त्यस्यनप्राप्तिस्तत्रत्वनुबन्धविनिर्मुक्तस्यैव विभक्त्यादिसंज्ञाः पूर्वमित्संज्ञाया अप्रवृत्तौबीजाभावादिति बोध्यम्। अतएवेति पदार्थोपस्थितेरनुबन्धविनिर्मुक्तत्वादेवेत्यर्थः। अन्यथा तदानीमनण्त्वात् आशङ्कासमाधानयोरसंगतिः स्पष्टैव। अप्रत्यय इत्यस्य आदेशादुपलक्षकत्वादेवाह अप्रत्यय। इत्यनेनेति अनवयवाइति। उपस्थापकानवयवाइत्यर्थः। कदाचि त्तत्रेतितदुपस्थाप्ये इत्यर्थः। यथा वृश्चत्यादौ चकारादिः सुवृडादौ संयोगान्तलोपेनापहारादुक्तं कदाचिदिति। नदोषइति।इत्वाभावरूपइत्यर्थः। सर्वादेशत्वाभावरूपश्चसः डादिव्यतिरिक्तइत्यर्थः। तत्रसर्वादेशत्वं तुप्रश्लेषेणैव॥ एकान्तत्व इवानेकान्तत्वेपि यन्निष्ठव्यवसितत्वमादायेत्संज्ञातत्कार्यं तत्रैवेत्यङ्गीकारान्नचवैयर्थ्यमत आह।तस्यलोपइति नकारेत्संज्ञकइति। नकारेत्संज्ञकबोध्यस्तदभिन्नइत्यर्थः एवमग्रे पि प्रकृतसूत्रेति व्याख्येयत्वेन प्रकरणान्तोपदेशपदलाभाव धिभूतोपदेशेऽजितीत्यर्थ इत्याहुः। अन्येत्वनुवर्त्तमानेशतृशानचाविति पुनस्तौग्रहणेनलटस्थानिकत्वादिरूपधर्मसम्बन्धत्यागवत् सौत्रेत्संज्ञकत्वरूपधर्मसम्बन्धस्यापि त्यागात्सानुबन्धयोरेवपरामर्शः। तदुक्तं वार्त्तिककृता तौवचनमसंसर्गार्थमिति भाष्यकृतापि तथैव व्याख्यातम्।अतएवकैयटेनापि शतृशानचोरूपमात्रंपरामृश्यतइति लट्स्थानिकत्वादिधर्मासम्बन्धयोरपि संज्ञाभवतीत्यर्थ इतिवदताऽऽदिशब्दउपात्तः। सत्शब्देनतयोर्विधानानन्तर अनुबन्धानामित्संज्ञाभवत्येवेत्यलम्। एवंक्तक्त-

वतूनिष्टेत्यादावपि न दोषः। अनुबन्धविनिर्मुक्तस्यैवोपस्थितिरिति नियमस्यविधेयत्वेनोपस्थितप्रत्ययाद्यनुबन्धविषय एवस्वीकारेणश्रुतनिष्ठासंज्ञासम्बन्धस्याश्रुतेस्सञ्ज्ञासम्बन्धादन्तरङ्गत्वात् प्रावल्येनचानुबन्धविशिष्टस्यैव संज्ञाविधानात्।अतएव सुबविभक्त्यादिसंज्ञासूत्रान्तरगतानामेवेति प्रागुक्तम् संज्ञाविषयेसर्वत्रैवमेवेति नदोषलेशशङ्कापि स्यादेषदोषइति न्यायोपिविषमः । अनुत्पन्नस्यसन आदेशविधानानुपपत्त्या वाक्यभेदेसति प्रथमवाक्येनोत्पन्नस्यसनः प्राप्ते त्संज्ञाद्वितीयवाक्यविहितादेशंन प्रतीक्षतइति पूर्वपक्षिणोक्तं वाक्यभेदेगमकाभावंसनासनिविधायोपदेशपदाननुवृत्तिमभिप्रेत्यचसिद्धान्तिनानानुत्पन्ने सनिप्रकृत्याभवितव्यं । यदाचोत्पन्नःसन्तदाकृतसामर्थ्यात् । पञ्चमीति प्रकल्पिसिर्नभविष्यतीत्युक्तं ॥ तथाच तत्र वाक्यभेदसत्वाद्विधेयत्वेनोपस्थितप्रत्ययविषयेत्संज्ञयादेश प्रतीक्ष्यमाणाभावेपि श्रौतनिष्ठासंज्ञासंबन्धमन्तरङ्गमित्संज्ञान्प्रतीक्षते । तद्भाष्यस्यैकदेश्युक्तित्वाच्च ॥ ननु कार्यकाल एकवाक्यतयाविधानाद्विधेयत्वेनोपदेशत्वमेवक्तक्तवत्वोरिति वाच्यम् ॥ यथोद्देशेतदभावादिति । पक्षद्वयेपि वाक्यैकवाक्यतयाविधेयत्वाभावाच्च । निपातनादित्वकल्पनन्तु तादृशवचनकल्पनाद्गुरु । अगतिकगतिच्च ॥ य एवतुनेत्वालाभादित्याहुः । भगवताकृतमिति । एवंच भावेघञातथार्थोक्तिरयुक्ते ति भावः । न तु बाहुलकाश्रयणमेव दोष इति तदेकदेश्युक्तिरेवात आह । किंचेतिय एवतुनपित्त्वालाभादिति पाठः विचारणीयः भावेति । करणसाधनानुवृत्तौतुविहि-

तस्यापि शासनकरणत्वेन तत्स्यादपीति भावः । विहितेति उपस्थापकस्योपदेशेविद्यमानत्वेपि प्रक्रियावाक्यसमवायिनस्तत्वाभावादिति भावः । ननूपस्थापक एवसंज्ञालोपयोरप्रवृत्त्यानिरनुबन्धकस्यैव प्रयोगसमवायित्वमिति न दोषोत आह । परस्येति । एतेन विहितेपरस्यासत्वेनकादेरन्त्यत्वात् हेतुसाध्येपित इत्यपास्तम् । सामर्थ्येनेति ॥ आदेरपिव्यपदेशिवत्वात्तत्वमेवेतिन तत्व्यावृत्तये । इदमेवाभिप्रेत्यसर्वोपि हल्तन्तंसमुदायं प्रत्यन्त इत्युक्तं भाष्ये । ननुश्चुन्नित्यादिप्रातिपदिकव्यावृत्त्यानानुवृत्तिवैयर्थ्यमत आह ॥ अतएवेति ॥ अनुत्थानेति । एवं मन्यते तस्यभावधअन्तत्वआद्योच्चारणेविद्यमानमन्त्यमित्याद्यर्थ उच्चारणस्यान्त्यमिति प्रत्यासत्तेराश्रयितुमशक्यत्वात् यत्किञ्चित् समुदायान्त्यस्यापि प्राप्नोतीत्युक्तिष्टतएवतत् । शास्त्रपरत्वेन प्रत्यासत्याशास्त्रान्त्यस्यैव स्यादित्यनुत्थितिरिति । धातुत्वादिनेति । शास्त्रकृतातेन तत्वेनवोधितत्वादित्यर्थः । पचादौचान्तस्यैव तत्वेनचान्त्यस्य तात्पर्यस्य तत्रैवसत्वात् । तात्पर्यग्रहेवीजंतुथमुप्रत्यय उकारःननुव्यवस्थितपक्षेप्रयोजनदातृभाष्यन्तवैव प्रतिकूलकम् । अनुत्तरार्थत्वेहि तत्रैवक्षोदं कृत्वानकर्तव्यमित्येवब्रूयादिति । ममतूत्तरार्थमावश्यकतया लाघवाभावेनक्षीदोनकृत इति । साधकमेवातोऽननुवृत्तौ साधकान्तरमाह । एवं चेत्यादिनास्य अनुत्थानमेवस्यादित्यन्तेन फलाभावेति अत्रयथा फलाभावस्तथाविवरणतोऽवसेयः ॥ अवसेव्यतेचास्माभिः कालेन स्थेग्रहणेति । गणादावपठितेत्यर्थः । उपदेशशब्दइति । बहुव्रीहिरयं उपदे-

शः कर्त्तव्यइति शब्दइत्यर्थः। नन्वेवमिति तस्यभावसाधनत-
यातथार्थकत्वाभाव इत्यर्थः। अन्यथाचरमेणपौनरुक्त्यापत्तिः।
इत्युच्यमानेति। इत्यनुवर्त्यविधीयमान इत्यर्थः। तत्रसूत्रद्वय
यादावित्यादिनावहोलोपेति यत्रेति पूर्वेणसमानाधिकरणम्।
तत्रखलुस्थानिनिहेतुमाहोयेति। एवंच षष्ठीप्रक्लप्तेः प्रागेवप-
रत्वान्तरङ्गत्वेनोपदेशोत्तरकालं सूत्रएवेत्संज्ञोच्चारितस्य कार्य-
न्तुप्रयोगएवेति निरनुबन्धकस्यैव प्रत्ययत्वेनविधानान्त्यश-
ब्दएवतत्कार्यभागितितदादेशस्यकुतः सानुबन्धकतेतिभावः।
लक्ष्येति। शानचिचस्थानिवत्वेवक्ष्यमाणेत्यादिलक्ष्यासिद्धेरि-
त्यर्थः लटःसद्वे तिविहितत्वेनाद्योच्चारणाभावात्। एकाचइति
उपदेशेऽत्वत इत्यादाविति पाठः। आदेचइत्यपपाठः तस्य तत्र-
कर्म्मव्युत्पन्नत्वात्। यणापत्तिरिति शाकलेननिर्देशोपपत्तिस्तु-
नभत्वात् नन्वेवं यस्येतिलोपापत्तिर्वाच्येति चेन्न परत्वप्रत्या-
हारग्रहणसामर्थ्याभ्यांकेण इति ह्रस्वेनबाधात्। अनन्तरम-
पिन सकृद्गताविति न्यायात्। इदंचनासाशब्दात्केऽभिप्रेते-
णास्तुशब्द इत्येतस्माण्वुलितुनशङ्काकलंकलेशोऽप्यत एवाहे-
तिभाव इति वस्तुतः कोसौप्रत्याहारोयत्रेतां नग्रहणमित्यवत-
रणं बोध्यम्। एकद्वित्रिमात्रेति एकाद्वे तिस्रश्च मात्रायस्य
तस्यभावस्तत्वमिति वाग्दृषदप्रियइति वदनेकपदोबहुव्रीहिः।
एवमुत्तरत्राप्येतेनैकादिदशान्तानां द्वन्द्वैकशेषयोरनभिधा-
नस्य वक्ष्यमाणत्वेने दमऽसङ्गतमित्यपास्तम्। व्याख्यानेति।
अत्रादौ नप्लुतदीर्घौ अन्त्येनदीर्घः ओमभ्यादान इत्यारम्भा-
दञ्झलोऽप्रतिषेध इतिवत् ह्रस्वसंज्ञादीर्घप्लुतयोरपि प्रा-

प्नोतीति भाष्येउक्तन्तद्रीत्याशङ्कते नन्विति । अन्यथोच्चारित-
स्यैव प्रत्यायकत्वात् सूत्ररीत्याभाष्यरीत्याचमिथः समभिव्या-
हारात् व्याप्यजातिनिर्देशस्त्वेन शंकैवनोदयति । उअजिति
समाहारद्वन्द्वःभिन्नेचपदे। असन्धिस्तुशाकलेनासंदेहार्थः दोर्घ-
पाठेतु इत्यर्थकमित्यदोषादिति पाठः । अदसोसेरित्यत्र वक्ष्य-
माणरीत्यानिर्देशोपपत्तिः असंधिःसंहिताविवक्षयाशाकल्यह्व-
स्वेनेदानीं दीर्घस्यापिविधानाद्वा इदानीह्वस्वशासनानामकिं-
चित् करत्वंतुभाष्य एवस्पष्टम् । तुगापत्तिरिति नचैतदऽभावे-
नित्यविधिर्दुर्वारः सकृद्गतिन्यायाभिप्रायकतयाभाष्यप्रयो-
जनं कैयटोक्तन्तुदूषितमन्यत्रेति वाच्यम् । प्राप्तविभाषाणां-
निषेधरूपतयानिषेधानांबलीयस्त्वान्नित्यविधेरपि निषिद्धत्वात्
नचानन्तरस्येति न्यायेनह्वस्वप्रयुक्तस्यननिषेध इति वाच्यम् ।
योगविभागोमास्तुच्छेत्यत्रैव दीर्घादित्यस्यापकर्षोस्तु उभय-
त्रविभाषात्वेयमिति भगवतोभिप्रायात् कैयटमतेदूषणान्तरं-
स्फोटयितुमाह।अन्तरङ्गे ति। स्पष्टञ्चैदंभाष्ये उच्चैरु। तेषांतत्वेपि
क्षत्यऽभावादाह हल्स्वरेति तेषांतत्वेहिस्वरविधायकैर्हलांस्था-
ने हलोविधीयेरन्नितिदोषोवाच्यः स एवनततस्थानिनोऽभावा
त् अचोपिनानन्तरतमत्वात् । यद्यपि तेषांतत्वेयतोनाव इति
ज्ञापकंनसंभवति तथापीयमवाचनिक्यावश्यकीति भावः । वि-
रोधादिति तथाच पूर्वत्रधर्म्मिपरयोरपि इहलक्षणयाधर्म्मपरतेति
भावः।इतरेतरद्वन्द्वे पिवर्त्तिपदार्थयोः प्रकारत्वेतद्धर्म्मयोरपि प्र-
कारतेति तत्समूहेभावप्रत्ययेनमूले उदात्तानुदात्तत्वेइत्यस्योप-
पत्तिः अर्द्धह्वस्वशब्दोऽर्द्धमात्रायां रूढइति भाष्यतोविशिष्टरू-

ढेरेवलाभादाह। ह्रस्वपदेइति। मूलंबहुव्रीहिरिति भावः। स्वशास्त्रे ति। रूपतइति रूपोऽर्थःस्वशास्त्रसंकेततः मात्राकालिकाज्ज्ञापोऽर्थोयस्मिन्मात्राकालिकाजऽर्द्धरूपेऽर्थेतेना बोधकंतस्याबोधकमिति यावत् कर्मणोहेतुत्वविवक्षया तृतीयेत्यन्ये केचित्तुतादृशभाष्यानुपालंभात् प्रमाणमेवह्रस्वस्यादाविति हर्युक्ते श्च मूलेतत्पुरुषेपिनबाधकम् । वस्तुतस्त्वस्यप्रमेयपरत्वेपि जानुदघ्नमिति वन्मात्रचित्तस्यलुकिदीर्घस्वरितादिसंग्रहे भाष्ययोजनेचकैय्यटादीनांरूढिस्वीकारोमुधेतिप्राहुः । उदात्तस्वरितयोरिति यद्यप्यस्याद्युदात्तत्वंग्रामादित्वाद्भवति। एवञ्चोदात्तानुदात्तेति। स्वरितेतत्स्थानिकत्वाद्यणउदात्तस्वरितयोरित्यकारस्य स्वरितत्वेपि स्वरविधौव्यञ्जनस्याविद्यमानत्वेनोदात्तेति स्वरितत्वेपि वातस्याऽसिद्धत्वेनशेषनिघाताप्रवृत्त्यास्वरितोवेत्यस्याऽप्राप्त्यापूर्वस्वरितासिद्धिरत्रपक्षे तथापि उञ्छादित्वादन्तोदात्तत्वमेवहि शब्दस्य तथाच यणउदात्तस्थानिकत्वात्तस्य स्वरितत्वे स्वरितोवेति प्रवृत्त्येष्टसिद्धिः । इति समास इति इदं वृत्तिकाराद्यऽनुरोधेन भाष्येतुकरणेल्युट्कुक्कुटाण्डवत् बहुव्रीहिश्चसमास इत्युक्तम् । बहुव्रीहिस्तत्पुरुषोलघुरित्यभिप्रायोमूलस्थेत्याहुः । ह्रस्वत्वादीनामिति । स्वसमानाधिकरणोदात्तत्वापेक्षयेत्यर्थः । कत्वादीनांचेति । दीर्घत्वादिसमानाधिकरणोदात्तत्वाद्यऽपेक्षयेत्यर्थः । अतएवाष्टादशधाभिन्नामवर्णस्यप्रतिपत्तिं वक्ष्यामोति पस्पशास्थान्तिमभाष्यं सङ्गच्छते ऋकारघटितइति । स एवेत्यर्थः । तत्सत्वेतदघटितमपि प्रयुञ्जीतयथाश्रुतं तुनसङ्गतम् । किंचलतिलवेत्यस्य प्रत्याख्या-

नमपि तदऽभावएवसंगच्छते अन्यथा लकारवदीषत् स्पृष्टमपेक्ष्यलकारवतो विवृतस्यान्तरतमत्वात् स एव स्यादिति। तदऽसंगतिःस्पष्टैव तुल्यास्येति तुल्याविति। अतएव प्रत्येकं साम्यमादायनसंज्ञा अकःसवर्ण इत्यादौ सवर्णग्रहणाच्च। ननु वर्णोपयोगित्वेन हेतुनालालादेर्व्यावृतावपि प्रयत्नस्यतत्वेनाव्यवर्तनादेवेत्यसङ्गतमत आह। पृथगुपेति शब्दोनित्यइति नयेऽस्यैवसम्भवादाह जनकेति अन्येतु ननुयत्नप्रयत्नशब्दयोः प्रयत्नमात्रेरूढत्वात्। पर्यायत्वेनलाघवाद्यत्ने ति वाच्ये प्रोपादानमधिकसंग्रहार्थमित्यस्य वक्तुमशक्यत्वेन रूढियोगेति न्यायेनयत्नसामान्यग्रहणमेव स्यादत आह। जनकेति तथाच प्रयत्ने जनकत्वगृह्येयत्नसामान्यस्य जन्यप्राग्वर्तित्वरूपजनकत्ववाधात् योगार्थाएवाश्रीयन्तेभूमौपङ्कजमुत्पन्नमिति यथेत्याहुः। निर्देशइति इदंचविवृतत्वव्याप्यानां संज्ञाऽनुपयुक्तत्वमिति सूत्ररीत्योक्तम् सप्तप्रयत्नाइति भाष्यरीत्याप्याह। अतएवैचोरिति एकारैकारयोर्मिथ इत्यर्थः। कण्ठादीनामेवेति। वायुसंयोगादीनामेवेति तु न तद्दानासावाप्रादय इत्यादिनिर्देशात्। अन्येतुप्रयत्नसमभिव्याहारादास्य भवमपिकरणमेव तत्वंचकण्ठादेरेवनवायुसंयोगस्य व्यापारवत्वरूपकरणत्वाभावात्। कण्ठादेस्तुसंयोगएवस इत्याहुः एतेन वायुसंयोगव्युदासायज्ञापकान्तरस्य तवाप्यावश्यकत्वेतदकृत्वैव तेनतदभिन्नानां यावतामास्यभवानांगृहणबोधनेनेष्टसिद्धौ प्रयत्नगृहणं व्यर्थमेवेत्यपास्तम्। तत्रैव दोषादिति केचित्तु। आस्यशब्देनास्य भवत्वव्याप्यजातिविशेषवद्यावत्तौल्यं विवक्षितमिति। साह-

चर्यादयत्नशब्देनापियत्नत्व व्याप्यजातिविशेषवद्यावत्तौल्यं विवक्षितमिति साहचर्यादयत्नशब्देनापि यत्नत्वव्याप्यजातिविशेषवद्यावतौल्यविवक्षणेनादोषात्स्पष्टार्थं प्रोपादानमित्याहुः। नन्वनेनापूर्वकादीनां कण्ठस्थानत्वे तुल्यस्थानत्वात्। सवर्णपदशक्तिग्रहेकुशब्दस्यतदग्राहकत्वमणुदित्सूत्रेण बोधनीयमिति कथमत्रवाक्येकुशब्देन पञ्चानामुपस्थितिस्तत्राह। तत्तादिति साहचर्यात् उपक्रान्ताकारसमभिव्याहारात्। यथाश्रुतंतुनयुक्तमिति स्पष्टमेव ध्मायेतें उच्चार्य्येते अतएवनासिकायाःस्थानत्वादेववर्णजनकेति तदऽभिव्यक्तिजनकेत्यर्थः। संयोगाधारेति। वर्णाभिव्यक्त्यवच्छेदकत्वावच्छिन्नतादृशसंयोगाधारतायास्तालवादावेवसत्वान्नसंयोगस्योभयनिष्टत्वेपि वर्णजनकवायौस्थानत्वव्यवहारातिप्रसंगःरूपसादृश्येनेति एतदर्थमेव पूर्ववाह्यलक्षणेमध्यमविशेषणद्वयम्। अन्यथास्वरूपभेदायाद्यस्य वाह्यत्वायांत्यस्यावश्यकत्वेपि तद्वैफल्यं स्पष्टमेव अतएवऽऽदीनांस्थानत्वादेव अन्यथास्थानिनीत्यस्यासंगतिः स्पष्टैव। वाह्यप्रयत्नत्वोक्त्येति अन्यथा आस्यग्रहणव्यावर्त्यानांसावर्ण्याऽनुपयुक्तानां प्रदर्शनप्रक्रमेणतत्कथनवैयर्थ्यापत्तिः। अगृहणबोधनेति।नासिकायाआस्यपदेनगृहेतु तत्रत्यप्रयत्नस्याऽस्य पदव्यावर्तकत्वोक्तिरसंगतास्यात् तत्रत्यप्रयत्नत्वागृहस्तुअधिकोगुण इत्युक्त्यागुणानामभेदकत्वेनेति वक्ष्यमाणरीत्याबोध्यः। इदंचनासिकास्यान्तर्गतेतिमतेमणिमंत्रादिन्यायेन तद्ग्रहेप्रतिबन्धकत्वं भाष्यस्योक्तम् वस्तुतः सातद्वाह्यवैवेति निरूपितंविस्तरादुद्योतेततएवबोध्यं तदाह। वदतामिति बहुवचनेनास्यैव भाष्य-

संमतत्वंध्वनयति भिन्नस्थानेति प्रयत्नात्पृथक्स्थानस्यास्यप-
देनकथनेत्यर्थः । एतेनभिन्नस्थानकथनस्यान्तरतम्यपरोक्षो-
पयोगित्वादनुभवसिद्धानुवादरूपत्वाच्च कलादिदोषज्ञानोप-
योगित्वाच्चेदमसदित्यपास्तम् । ऐचःसर्वस्येति एचइति त्व-
ऽप पाठः हसेइत्यादावनुनासिकत्वप्रतिज्ञानात् । यत्तुपरिनि-
ष्ठिते प्रयोगइति शेषंकृत्वाहसे इत्यादौ प्रक्रियायान्तत्सत्वेपि
नक्षतिरित्याहुरतएवादर्शनादित्युक्तन्तत्वसत्त्वादिति । तन्न
सम्यक् हसेहसने इत्यादीनां अपरिनिष्ठितत्वस्यवक्तु-
मशक्यत्वेनभुक्तेपीति न्यायावतारात् । ह्रस्वलकारस्यापि
गम्लादावेवसम्भवेनप्लुतेत्युत्तरग्रन्थासामञ्जस्याच्च अत्रपाठे-
सर्वस्येत्युक्तिस्तुप्रयोगभेदाभिप्रायेण लकारस्यचेति चेनदी-
र्घप्लुत ऋकारयोःसंगृहःस्पष्टंचैवंस्थानेऽन्तरतमसूत्र उद्योते
सेयं सिद्धस्यगतिरेतच्छ्रद्धालुभिरादर्त्तव्या तत्वंतुग्रन्थकृद्भि
अनुवादेति एवंचात्रतत्प्रवृतावपि अनुभवेनस्थानैक्यमादा-
यासमकालयोरपि संज्ञास्यादेवेति वैफल्यादप्रवृतिः । अपूर्व-
बोधकत्वेत्वस्यसङ्कोचेतत्राप्रवृतिरेवफलं स्यादिति भावः ।
एतेनवृद्धिर्य्यस्या अकुहेत्यादावनुवादेपि तत्प्रवृत्त्यंगीकारात्
चिन्त्यमित्यपास्तम् । तेभ्योपि विवृतावेडावित्यादि वाक्या-
न्तरेणएचां विवृततरत्वाद्युक्ते रन्याचामोषद्विवृतत्वसमानाधि-
करणेषत्स्पृष्टत्वधर्मस्य प्रसक्तस्यनिषेधमुखेनपूर्ववाक्यविहित-
विवृतत्वबोध एवतात्पर्य्यादाह । रूपविवृतत्वेति । अपूर्वबोध-
ने हिस्वराणां विवृतमित्यनेनपौनरुक्त्यंस्यादित्याहुः । यण-
स्त्विति वाक्येस्पृष्टा इत्यस्य सम्बन्धात्तेषामोषद्विवृत्तत्वंशा-

ब्दस्पर्शाऽपेक्षयेषत्स्पृष्टत्वमार्थं समाजगृस्तन्तत् । सर्वमाह । इत्यनेनेत्यादिना शलामीषदिति। ईषत्वमजपेक्षया । अत्रेति तेषांभेदेन कथने सतीत्यर्थः । एवञ्चसावर्ण्येऽस्य हेतुत्वंफलितम् । अअ प्रयत्न इति प्रयत्नभेदादक्षरसमाम्नायस्याकारेणाग्रहादच्त्वाभावान्नदीर्घोऽत एवगुणोपिनेति भावः। समासस्तुदीर्घश्चाऽच्चतयोरभावइति । प्रयत्नभेदस्यादीर्घयोरभाव इति भावः । प्रयोज्यत्वंषष्ठ्यर्थः । सिद्धान्तभूतजातिनिर्देशे संवृत्ता वर्णस्यान्त्वेसंहिताऽविवक्षयागुणोनेतिदीर्घस्तु अङ्गह्रयविरहान्न एकसूत्रेसंहितानियमेतूह्रेइयेलुगिवसुपांसुगितिङसः सुरेव तस्यरुत्वयत्वलोपाः । तदसिद्धत्वान्नगुणादि उत्वन्तुनातीति विवृतनिर्देशादिति बोध्यम् । पूर्वत्रघत्वेत्यादि अयंभावः । गोदुहमदितिस्थिते पदान्तेघत्वस्य जस्त्वाऽपवादत्वाच्चतः प्राग्घत्वम् । औपदेशिकझषन्तेभुदादौ युगयत् प्रवृत्त्यान्तरङ्गजस्त्वमपवाद्यचारितार्थ्यात् । भष्त्वात् पूर्वमिण्डिशीनामिति न्यायेनधातूपसर्गयोः कार्यस्येव पूर्वोत्पन्ननिमित्तकत्वेनान्तरङ्गत्वाज्जस्त्वम् । अनुनासिकात्त्वपरनिमित्तकत्वेनान्तरङ्गत्वात् सिद्धान्तेतु जस्त्वाऽनुनासिकत्वयोरसिद्धत्वात् भष्भावेऽनुनासिकस्यासिद्धत्वाज्जस्त्वेऽनुनासिकइति प्रक्रिया। घा देरसिद्धत्वाद्धत्वस्यत्वप्राप्तिरेवेति। धत्वेकृतइति। उक्तरीत्यावत्वेति । जस्त्वस्यापरनिमित्तकत्वेनान्तरङ्गत्वेप्यऽनुनासिकस्य परत्वेपिवत्वस्यककुदमान् तडित्वानित्यत्वभत्वात्तदऽप्राप्तियोग्येचारितार्थ्येन वेदेऽनुनासिकाभावपक्षेत्वबेनापवादत्वाभावेपि प्रतिपदोक्तत्वादऽनुनासिकतोऽपरनिमित्तकत्वे-

नान्तरङ्गत्वाच्चोभाभ्यां पूर्ववत्वप्रवृत्तिरिति भावः । प्रत्याहारग्रहणसामर्थ्यादित्यन्ये । उक्ताशयमजानानस्तुल्यबलत्वंजानानः शङ्कते नचेति वत्वचारितार्थ्यंतूक्तमेव । पक्षानुरूपेति न्यायेनसमाधत्ते विप्रेति अन्यथेति कार्यकालेत्रिपाद्यांविप्रतिषेधसूत्रोपस्थितौ विप्रतिषेधरूपनिमित्तनाशकपूर्वत्रेत्यनेन विप्रतिषेधसूत्रस्यत्राध उतासिद्धत्वनिरूपकपूर्वस्यासिद्धिसंपादनद्वारावि-प्रतिषेधसूत्रस्य तत्प्रतिबन्धकत्वमित्यत्रविनिगमनाविरहापत्तिरिति भावः । एतेनाधिकारत्वेयथोद्देशत्वेविधित्वेसपादित्रिपाद्योर्विप्रतिषेधाभावाऽनुवादनेन वार्त्तिकसामञ्जस्येनेदमसंगतमित्यपास्तम् । अतएवतस्यायथोद्देशत्वादेवत्वमेवेति वत्वभष्भावानापत्त्युभयापादनेत्वरुचितयाऽपि नेयं स्यादिति भावः दितमिति । अन्यथापक्षद्वयसाधारणत्वेनतदनापत्तिरेवापादितास्यात् यत्रानुवृत्तिरिति एवंचाधिकारत्वेत्रिपाद्यामपीत्यादिस्फलितमिति भावः । स्वदेशेवाक्यार्थबोधेफलाभावेपि पदार्थोपस्थितौ प्रतिबन्धकाभावेन तत्सत्वादाह । सपादेति । आदिभिरिति । आदिपदबहुवचनोपपत्तिस्तुन मुटादेश इत्यस्य नलोपेतिनियमरूपस्य च निषेधस्यसत्वान्निर्वाह्या । परत्वादिति शब्दान्तरप्राप्त्योभयोरप्यनित्यत्वात् । अन्तर्गतयावन्निमित्तकत्वेनापरनिमितकत्वेनोभयोरप्यन्तरङ्गत्वात् । अतइति । अदसइति सत्वेनोभयोरपि प्रतिपदोक्तत्वात् परत्वेनैवव्यवस्थेति भावः । ननु शास्त्रासिद्धत्वेपि अनित्यत्वेन तन्न्यायाप्रवृत्तिरवश्यं वाच्या अन्यथापि पठीरित्यत्रपूर्वप्रवृत्तिकत्वेनषत्वे शास्त्रासिद्धत्वेप्युक्तन्यायेन सकारबुद्धेरभावात् रुत्वनस्यादिति कार्यासिद्धत्वेपि

तदऽप्रवृत्त्यानदोष इत्यत आह। शास्त्रेति। तन्निवृत्तेति स्थानिनिवृत्तिरित्यर्थः। एवंचसकारनिवृत्तिबुद्धेरभावेन तत्सत्वात्तत्स्यादेवेति न दोषः। तवतु प्रवृत्यऽनन्तरमसिद्धत्वान्निवृत्तिबुद्धेस्सत्वेननस्यादिति भावः। पूर्वत्रेति अत्रन्यासेनिषेधानां बलीयस्त्वेन प्रकल्प्येति न्यायेनचान्तरङ्गस्य पूर्वमप्रवृत्तिरेवेति बोध्यम्। नन्वेवं तदऽकरणलाघवमेवेति तत्रेष्टापत्तिरेवाऽत आह। राजभ्यामिति। दिगिति तेनकिम्वृक्तमित्यादावऽनुस्वारादौ कर्तव्येवत्वादेर्निषेध इत्यत्यसंग्रहः वाक्यभेदेति नन्वस्तुपदैकवाक्यतातावतापि नमुन इति सूत्रेऽधिकारादऽसिद्धपदसम्बन्धेमु असिद्धंनेत्याशयात् मुभावनिष्ठासिद्धत्वस्यैवाननिषेधः। नमुभावस्येति चेन्न। पदैकवाक्यतापक्षेऽदसोसेरित्यत्रोपस्थितावऽसिद्धपदस्य मुभावेनाऽन्वयेसिद्धत्वविशिष्टमुभावस्य विधानात्तत्रानेनासिद्धत्वनिवृत्तौ सन्नियोगशिष्टमुभावस्यापि निवृत्त्यापत्तेः। वाक्यैकवाक्यतायान्त्वसिद्धत्वं शास्त्रस्यैवेति नमुत्वस्य तत्संनियोगशिष्टत्वम्। नचैवं नाभावेकर्तव्येऽसिद्धत्वनिवृत्त्यामुत्वस्यापि निवृत्तौ कृतेनाभावेऽसिद्धत्वनिवृत्तिबोधकस्य निष्फलत्वापत्त्यासंनियोगेति न्यायबाधइति वाच्यम्। गौरवात्कार्यासिद्धत्वापत्तेश्चेत्याहुः। कार्यस्यशास्त्रजज्ञानवेलायामसिद्धत्वमिति पक्षेनमुनलोपः श्रुत्वं धुडित्यादयक्षरस्वारस्येपि भाष्यागृहीतत्वान्नाश्रितस्स इति बोध्यं। वाह्यप्रयत्नाइतीति। एषां बाह्यत्वं विवारत्वादिकञ्चोपपादयति। काकलेति अधस्तादित्यनेनास्य बाह्यत्वं सूचितम्। अघोषेत्यत्रनञोऽल्पार्थकत्वादाह। अल्पघोषेति। अर्थानां वक्तुमिछाया

असम्भवादाह । तद्बोधेति नन्वेवं ह्रस्वादिजनकएकः स्पर्शादिजनकएकः । अग्न्यादिघातजनकएकइति एकैकस्यवर्णस्य प्रयत्नत्रयं प्रयत्नद्वयं वाजनकमिति तात्पर्यम् । तच्च संहितासूत्रभाष्यविरुद्धं तत्रहिस्वोत्पादितवर्णनाशावधिप्रयत्नस्थितिः । ततस्तं प्रयत्नमुपसंहृत्यद्वितीयप्रयत्नोत्पत्तिरिति प्रथमवर्णनाशकालेद्वितीयवर्णोत्पादकप्रयत्नोत्पत्तिकालेच वर्णविरामसत्वात् प्रतिवर्णविरामसंज्ञाप्राप्नोतीत्याशंकितं तस्यचायं भावः । नाभिरूपैकदेशावच्छेदेनानेक प्रयत्नोत्पतिर्युगपद्बाधितेत्येवञ्चैकस्यैव प्रयत्नस्याग्न्याघात ह्रस्वादिस्पर्शादिजनकत्वमिति स्पष्टमेवायातमिति तदेतत्सकलंमनसिनिधायशङ्कते यद्यपीति अयोगवाहनिरासायाह । शषसेति । अत एवविसर्गादेः पृथग्ग्रहणमतएवानुस्वारस्यश्वासादयोन अनुप्रदान वाह्य इति उद्योतेतुश्वासोऽनुप्रदीयतेयैरित्यर्थउक्त रूढौमानन्तु तुल्यास्यादिसूत्रस्थभाष्यमेव । यद्यपीति खयादिष्वऽघोषाऽन्यतमेति पाठः । एवं हशादिष्वपीति बोध्यम् । घोषाऽघोषाऽन्यतरेति पाठेखयादिष्वित्यत्रादिनाहशादिपरिग्रहः शास्त्रानुरोधेन तथा द्वन्द्वप्रयोगेपि यथासंभवयोगोनयथासंख्येन वर्णेष्वेवयमानां स्थितिरिति भ्रमवारणायषष्ठ्यौचित्यासक्तम्युपपत्तये चाह । विद्ये ति नन्वेवमपि प्रयोगेयुगपच्चतुर्णां स्थित्यऽभावेन लक्ष्यविरोधएवात आह । निर्द्धेति । अन्यतमादिति । एतेन परशब्दयोगेचतुर्भ्यइति पञ्चम्युचितेत्यपास्तम् । निर्देशासंगतिरिति । यद्यपि यावत्स्थानसाम्यमिव यावत्प्रयत्नसाम्यविवक्षामन्तरेणापि निर्देशसंगतिस्तथापि यावत्प्रयत्नसाम्यानङ्गीकारे खकार-

हकारयोरपि सावर्ण्यापत्तौ देव≍खनतोत्यादौ हशिचेत्युत्वाद्यापत्तिः कर्त्तरिभुवः खिष्णुजित्यादिनिर्देशासंगतिश्च एवञ्चयत्किंचित्प्रयत्नसाम्ये इदमऽसंगतं यावत्साम्ये मूलोक्तमऽसंगतमिति तात्पर्यम् ऋलवर्णयोः। एतदर्थमेव तद्बोधार्थमेव अशत्वमिति। तदऽभाववादिनापदार्थोपस्थित्यऽभावेन बोधाजनकत्वेनाऽकरणीयत्वमित्यर्थः । नचानुपदेशत्वमात्रेणाऽसत्वशङ्काया माकारादीनामपि सा स्यादिति वाच्यम् । अक्षरसमाम्नाये-जातिनिर्देशसत्वेनात्वादिजाते राकारादिषु सत्वात् । ऋकारे लत्वजातेरभावादिति वदन्ति संय्यन्तेत्यादाविति । आदिनाकुक्कुटादिपरिग्रहः । द्वित्यञ्जनेति। मात्रादिरयंसच्च कुक्कुटादौ संयोगगुरूसंज्ञाप्लुतादिरूपः संय्यन्तेत्यादौ चानच्चेति द्वित्वरूपः तस्यद्वित्यञ्जनाश्रयत्वं प्रकृतलक्ष्याभिप्रायम्। हलोनन्तराइति। सूत्रोपन्यासस्तुकुक्कुटाद्यनुरोधादिति बोध्यम् । एतेन परसवर्णस्यासिद्धत्वात् अनुस्वारं हलमादायसंयोगसंज्ञादिः सेत्स्यतीति तदऽसङ्गतमित्यपास्तमिति वदन्ति वस्तुतस्तु अनुपदिष्टत्वादित्यस्य शिष्टैरिति शेषोनतुमहेश्वरेणेति तथासति अयोगवाहानामऽट्सुणत्वमृतिक्ववेत्यादेः कर्त्तुमशक्यत्वस्य ब्रह्मणापि दुर्वारत्वात् वृत्तिसमवायार्थ उपदेशलकारोपदेशेयदृच्छेत्यादिकं चोपलक्षणतांविनानोपपद्येत । किञ्चाकारादिसत्वस्य जातिनिर्देशेनोपपादनेमात्रिकव्यञ्जनादेरसत्वमुपपादयितुमशक्यमिति चिन्त्यमेवेदमित्याहुः। तदऽपरेनक्षमन्ते चतुर्दशसूत्रीतिनिर्दिष्टजात्याक्रान्तत्वस्याऽसत्वशङ्कानिवर्त्तकत्वे मात्रिकाऽर्द्धमात्रिकव्यंजनसाधारणयत्वादिजातेस्तत्रनिर्दिष्टत्वेनानुप-

देशान्मात्रिकव्यञ्जनासत्वप्रतिपादकैरेओङ्सूत्रस्थभाष्यविरोधात्तस्माच्छिष्टोपदेशएवासत्वशङ्कानिवर्त्तक इत्येवभाष्यकृदाकूतम् । किञ्चानुवादोपि संदेहनिवर्तकएवेति । प्रागुक्तत्वेन तस्यबलकारेबहुशः प्रदर्शनेनचिन्त्यमेव योग्यमायाति अन्येतुवस्तुतएवमानुपूर्वीकाश्रुतिरेवेयमिति। नानर्थक्यशङ्केति। समर्थयांचक्रुः। तदाकूतंकिमिति तुसंशयितमेव। अतएवतदुपदेशप्रयोजनगणनावसरे एतन्नोक्तं भाष्यकैयटयोर्नाज्झलौ। मत इति। तालव्यावेकारचवर्गविकारैकारौयकारः शकारः शेषओष्ठ्योपपादयितव्यइति वह्वृचप्रातिशाख्यमते इत्यर्थः। एकारादीनामित्यादि बहुवचनाभ्यामेकारशकार ओकारोपध्मानीयादिपरिग्रहः सूत्रमतेविवृतत्वव्याप्यानां संज्ञानुपयुक्तत्वस्योक्तत्वादनयोर्विवृततरत्वादिनाभेदेपि तत्प्राप्तिर्बोध्या। अत्रमतेयजुष्येकेषामित्यादिनिर्देशादैऔजित्यारम्भादैचामिवेकारैकारयोः स्थानसाम्येपि संज्ञान । स्वरानुस्वारोष्मणामस्पष्टमिति तत्रैव प्रातिशाख्येप्रयत्नस्यैक्यस्योक्तत्वेन च संज्ञाप्राप्तिर्बोध्या अत्रवदन्ति। एवमपिनाच्शलाविति तुन सूत्रितंशलांपरस्परंसवर्णसंज्ञानिषेधापत्तेः यथाश्रुतन्यासेपूर्वसवर्णकरणान्नेतिहशिचेत्येवसिद्धइति। एतदऽवतरणस्थपाठकग्रन्थेऽतीति वचनमित्यस्यानुवर्त्ययोगविभागेन विधानमित्यर्थः । इति नशङ्काकलंकलेशः। व्यावर्त्यर्थमिति। अत्ववतिच्चेदत्येवेतिनियमद्वारेति भावः । तपरकरणेनदीर्घवद्ह्रस्वाकारेपि व्यावर्त्यतत्रानेननसिद्धिः। सावर्ण्यनस्यादिति। परवल्लिंगमिति नपुंसकत्वापत्तिर्बोध्या । अत एवेति प्रश्लेषादेवेत्यर्थः । एकपदेएवं दोषसं-

भवेन पदद्वयपर्यन्तधावनंव्यर्थमिति सूचयितुमाह । उपलक्षणेति । भावप्रत्ययान्तस्य संज्ञाशब्दपरत्वादनन्वयोऽत आह । बोध्येति । इदंशकारादिसंग्राहकस्य हकारादीत्यादिपदस्योपादानं ॥ जातिपक्षेतुजातेर्भेदात् शङ्कैवनेतिभावः । अणुदित् । ज्ञापयतीति गतिकारकेतिवद्बोधयतीत्यर्थः । अतोनसार्थक्यप्रश्नावसरः ननु वार्तिकस्योपदेशन इति वदज्ञानेनप्रवृत्तिरत आह । भाष्येति ननु भाष्यमपि योगरूढ्यापरिभाषार्थं बोधयतीत्यर्थकमत आह । ज्यादेति । एवंचशब्दार्थसम्बन्धनिश्चयस्य ऋष्यनुभवसिद्धत्वेन तदनुक्त्यातस्य तदर्थकत्वमप्रामाणिकमिति भावः । एतेनेति आवश्यकपरिभाषयाघटवदित्यादिसिद्धौज्ञापनेफलाभावेनेत्यर्थः । सुलभत्वादिति । अत्रपक्षेकुकटुकनुमतुकधुडादौ न दोषः। उकारमात्रेइतइति व्याख्यानात् । परेश्चघांकेत्यादाविवस्वरूपपरत्वं वा सवर्णेन इति सवर्णशब्दोऽत्रधर्मपरः। चादीति। इशादाविवनव्यमतेऽनुवादेपि इत्संज्ञालोपप्रवृत्तौ प्रतिबन्धकाभावेनोकारविनिर्मुक्तस्यैव चादेरूपस्थित्यान्यायसिद्धमिदमित्यन्ये।उकाररूपावयवसवर्णानां चुशब्दोनग्राहकः । नविभक्तेतिनिषेधेन सोरुकारस्येत्वानापस्यादगुण इत्यादिनिर्देशासंगतिः ननु यथाश्रुत एवस्वरूपपरिचायकः आस्तां किंभिन्नक्रमत्वेनात आह । ह्रस्वेति दैत्यारिरित्यादौ दीर्घाद्यर्थमारोपस्यावश्यकत्वादिति भावः । लकारग्रहणेति योह्युत् सूत्रंकथयतिनादोगृह्येतेति भाष्यग्रन्थेन सूत्रेष्वेवहितत्सर्वंयद्वृत्तौ यच्चवार्तिकेइति हरिग्रन्थेनचतयोः सावर्ण्यस्य सूत्रमतेपि सत्वात् । वार्तिकमतेपि पूर्वेणाण्ग्रहण-

पक्षेएकारादावाकृतिनिर्देशप्राप्तसवर्णग्रहणाभावायाप्रत्यय इ-त्यशवन्नियमार्थमावश्यकत्वेन सत्वात् अण्ग्रहणस्य तन्मते-प्ययं ग्रन्थोबोध्यः । लवर्णस्यऋवदिति तु प्रत्याख्यानप्रका-रइति। प्रकृतेनावसरस्तस्येति सर्वमवदात्तम्। अन्येतु तपरक-रणस्य परेणाण्ग्रहणं बोधयित्वाग्रहणकशास्त्रप्रवृत्त्याः ष्टाद-शानांग्रहणं प्रापप्यतपरसूत्रप्रवृत्त्यातद्बाधकल्पनयाचारितार्थ्य-कल्पनापेक्षया ऋलवर्णयोः सावर्ण्यबोधनद्वारातत्प्रवृत्त्यातद्ग्र-हणेन साफल्यकल्पनाया एवलघुत्वादिति भावः । अत एव-नयुक्तमित्येवोक्तं न तु चिन्त्यमपास्तंवातत्रतन्नेत्यादीत्या-हुः । समानजातित्वस्यैवेति । समानोवर्णोंजातिरित्यर्थः । स्वार्थेष्यञ् वर्णाश्रमोच्चारवानित्यादौ वर्णपदेनजातेर्व्यवहारा-दिति भावः । होतृकारेदीर्घस्तु अकोकीतिन्यासेनसुवचः । अ-त्रैवपक्षेशाकल्यप्रतिबन्धस्तुनफलं ऋत्यकइत्यस्याप्रवृत्तेः । इद-श्चऋष्युक्त्यनुरोधेन गौरवमनुसृत्योक्तम् । लाघवादरेतु लवर्ण-स्य ऋवदिति शब्दरत्नोक्तमनुसंधेयम् । एतच्चतिरिक्ते ति । आकारादावचीत्यर्थः । अच्त्वेन सादृश्यात् । अतःकखादौ भिन्नजातीयेनसत्यपि सावर्ण्येनदोषः। योगविभागेनेति। भाव्य-मानेतिपरिभाषाबोधनद्वारेति भावः । अस्याऽवश्यकतांध्वन-यितुंव्यक्तिपक्ष इवजातिपक्षेपि फलान्तरमाह। एवमिति। तुल्य-युक्त्यायोगविभागेनेत्यर्थः । विनिगमनाविरहादिति भावः । अस्यफलंप्रागुक्तमपिदाढार्यायस्मरति अतएवइति। उभयप्राप्त-निषेधकत्वादेवेत्यर्थः । अन्यथाजातिग्रहणप्राप्तवारणेप्येवंरी-त्यासदुर्वारएवेति भावः । एवञ्चैवमित्यादिग्रन्थावश्यकत्वं

विषयभेदात् । एवञ्चकचिदेवमित्यादिग्रन्थादर्शनं प्रामादिकमिति बोध्यम् । यद्यप्यन्यतरसूत्रसामर्थ्यादिति युक्तं वक्तुं तथापि प्रथमोपस्थितत्वेनान्तरङ्गत्वात्तदेवास्त्वित्याशयेनाह । मूलेऐऔजिति यथास्थितसूत्राशयेनाह । तेनैचइति ॥ ननुसूत्रसत्वेजातिपक्षेजातीनांचतुष्ट्यात्व्यक्तिपक्षेशक्यार्थमादाययथासंख्यमिष्टंचसिध्यति तदभावेकथमत आह । एचोऽयवेति नन्वेवमपिनय्वाभ्यामित्यादौ एङिति पाठेविधेयत्वात्तयोरग्रहणेएङोश्च विधानेऽप्यनिष्टंस्पष्टमेवात आह । नय्वेति नन्वेवमानुपूर्वीकाश्रुतिरेवाऽन्यार्थमिति । नतर्ह्यर्थ्यमत आह । अत्रैतदिति । ननु समुदायमध्येनिषेधस्याप्रवेशात्कथन्तेन तत्रैतदऽगृहणमत आह । अयंभावइति । अच्पदविहायाणित्युक्तिसाफल्यायाह । गुणाइति । अन्येतुजातेः पदार्थत्वेपिगुणानांभेदकत्वेसूत्रमावश्यकमित्यवतारयामासुः । तपरस्तनन्वदेङित्यत्रतपरत्वं पूर्वत्रकृतार्थमत आह । भाष्यप्रामाण्येति । अनवकाशत्वादिति । तदातदननुवृतावऽनण्यऽनुपयोगेपि अणंशेतेनसमकालस्यापि गृहणप्राप्तावपि निरवकाशत्वेनानेनाणुदिदिति बाधेनास्यप्रतिप्रसवविधित्वमेवेति भावः । ननु तद्गुणसंविज्ञानेनादित्यस्य संज्ञात्वमऽत एवततोविभक्तिरेवंच तत्समकालाऽप्रसिद्ध्यासूत्रं मूकंस्यादित्यत आह । अत्रेति । एवञ्चषष्ठ्यर्थ बहुव्रोहौ तत्संभवेप्यऽत्रपञ्चम्यर्थे स इति न दोष इति भावः । साजात्येनेति । इदमुपलक्षणंपंचम्यर्थ बहुव्रीहिविगृहप्रदर्शनपरभाष्यस्य । एतेन पंचमीसमासेएङादिशब्दस्यावधित्वेनाङ्गीकारादऽतोऽसदित्यपास्तम् । गमकात्तत्रत्या-

गेपि अत्रत्यागेमानाभावाच्च नचैवं वृतिमत्वेपि तकारापेक्षत्वात्पारिभाषिकार्थवत्वंतस्यनेति वाच्यम् । तत्रविभक्तीतरस्यप्रकृतिप्रत्ययान्यतरस्यवृतिमतोवागृह्यिष्यमाणत्वात् । नन्वेवमप्यऽवयवात् । सन्निपातपरिभाषयानसुप्समुदायात्तुधुडित्यत्रेवसुलभमिति चेत्सत्यम् । नियमार्थेति तपरःसवर्णस्यचेत् सर्वस्यजात्याश्रयतयाग्राहकस्तर्हिस्वसमकालस्यैवेत्यर्थः । एवञ्चयद्यक्तिमादायजातिनिर्देशस्तद्भिन्नकालव्यक्तियुक्तजात्यऽग्रहइति फलितम् । एवंचेति अयंभावः । व्यक्तिपक्षेपक्षद्वयेपि परत्वानवकाशत्वाभ्यामणुदित्सूत्रबाधेन विधित्वेपिसूत्रसार्थक्यमेवेति लाघवात्तत्रतदेवाश्रितम् । अत्रतुपक्षेविधित्वेबाध्यशास्त्रस्याभावेनजातिनिर्देशेनासमकालग्रहणस्य दुर्वारतयाऽव्यर्थमेव स्यादिति। नियमार्थत्वंपक्षद्वयेपीति । अन्येतुजातिपक्षाश्रयणेपि गुणानांभेदकत्वेननियामकत्वंदुर्घटमित्यत आह । एवंचेति ननु जातिपक्षाश्रयणसामर्थ्यादेवगुणान्तरयुक्तस्यापि ग्रहणंभविष्यति । अन्यथा ह्रस्वत्वादिगुणानामपि भेदकत्वात् । तत्पक्षाश्रयणंव्यर्थं स्यादिति । किमर्थंगुणाभेदकत्वंनियमार्थमङ्गीक्रियतेऽत आह । सिद्धान्तेति । तथाच तस्यैव सिद्धान्तभूतत्वेन तेनैवोपपत्तौ जातिपक्षाश्रयणसामर्थ्योपवर्णनं निष्फलमिति सूचितम् । पक्षेपीत्यपि समुच्चये तेनजातिपक्षसंग्रहः एवंच गुणाभेदकत्वमिति पक्षसहिते जातिपक्षेनियामकं सूत्रमिति तात्पर्यमित्याहुः । अत्र व्याख्यानेऽक्षरसन्नायस्यभङ्गो बोध्यः । नप्रवर्ततेइति । प्रवृत्तौतुरमेश इत्यत्रैवस्यात्तपरभिन्नस्तत्कालस्येत्यक्त्वादुपेन्द्रइत्यत्रैवस्याद्दे ति ।

भावः। उच्चारणार्थइति ऋकारोच्चारणार्थइत्यर्थः। तदभावेतुसंधिप्रवृत्त्यानस्यादिति। एवञ्चासंदेहायेति यावत् विनिगमनाभावादाह। मुखसुखेति। वृद्धिरा। कृतमनयोरिति भाष्यस्याऽन्यथोपपत्तेः पस्पशास्थभाष्यानुरोधेनाह। पदत्रयेति अतएवकुत्ववत् समासान्तोत्रभाष्येनापादितः। पिनाकिनइत्यादाविति। आदिनाहिरण्यपूर्वं कशिपुमित्यादि। अपृक्तसंज्ञायामित्यादिभाष्यवार्तिकविरोधादऽपृक्तएकालितिपरिभाषेति कैयटोनयुक्तइति। सूचयन्नाह। अपृक्त इति आदिनास्वरूपन्तपरंयेनविधिरित्यादि। अतएव तासामनित्यत्वव्यवहारादेव। अन्यथाऽकृत्रिमत्वादऽसङ्गतिः स्पष्टैव। ननु त्रिमात्रादिव्यावृत्त्यायत् परार्थत्वमुक्तं तद्यथोद्देशेसंभवति तदास्वग्रहेवाक्यार्थबोधेनाविधेयाण्त्वेनसवर्णग्रहणासम्भवात्। न तु कार्यकालेतदाविध्येकवाक्यतयाविधेयाण्त्वेन तदसंभवादतःसिंहावलोकनन्यायेनाह। कार्येति अपियथोद्देशपक्षसमुच्चायकः प्रदेशेनसहवाक्यैकवाक्यत्वेपि वस्तुतोभिन्नवाक्यतोभयत्रसमानेति भावः। तत्रतत्रतामाह। मृजेरिति वृत्तेइति पदार्थोपस्थितेस्सत्वादिति शेषः एवञ्चवाक्यैकवाक्यत्वेपि पदैकवाक्यत्वाभावेन तत्रतस्याविधेयत्वंसुस्थमेवेतिभावः। नन्वत्रैवकिंमानं पदैकवाक्यताया एकदेशोपस्थित्यासम्भवादत आह। अतएवभाष्येति। वाक्यभेदादेवेत्यर्थः। इत्याहेति वक्ष्यमाणरीत्यायच्चोत्यादेरंशस्यैवोपस्थितेर्वक्तव्यतयासर्वत्रसर्वोपस्थिति कथनासङ्गतिः स्यादिति भावः यथोपदेशेत्विति। अत्रतुनतत्सम्भावनाकेवलं स्वदेशेवाक्यार्थत्वात्। वृद्धिविशेषणेति। बहुव्रीहिरयं विधेयत्वेनेति। वृद्धिर्य-

स्येत्यादावनुवादेतु न दोषः। तादृशलक्ष्याभावादिति भावः। भूवादयः किमिति। इतिनेति शेषः एवमग्रेपि ननु निष्पाद्यत्वरूपसाध्यत्वेनप्रतीयमानत्वस्यक्रियात्वेनाऽस्त्यर्थस्य क्रियात्वंनस्यादत आह। अस्त्याद्यर्थेति। भूप्रभृतयोभूसदृशाइति तुनोक्तं शब्दप्रभृत्यर्थकादिभूयोगे एकशेषेप्रमाणलाभानापत्तेरित्याहुः। पदत्वानापत्तेरिति। अत्रपाठकाः इदंचिन्त्यम्। निपातस्यानर्थकस्यप्रातिपदिकत्वंबोधितं तत्राऽनर्थकग्रहणंनकर्त्तव्यं निपातःप्रातिपदिकमित्याहुः वस्तुतस्तु वार्तिककृद्भीत्यैकदेशिनातथोक्तम्। अर्थवत्सूत्रेऽथवेत्यादिना अधिपरीतिज्ञापकेनाऽनर्थकानामप्यर्थवत् कार्यंभवति। इत्युक्त्वातत्तत्प्रत्याख्यानेन तस्यतदुक्तित्वध्वननात्। अतएवानर्थकग्रहणंनकरिष्यते इति सतिकुडोचित्रमिति न्यायेन प्रौढित्वसूचकमुक्तम्। नन्वथवेत्यादिभाष्यात्तस्यपक्षान्तरत्वेनन तत्प्रत्याख्यानबोधकमितिचेत्। पूर्वत्रारुच्यैवोत्तरपक्षबोधनात्प्रत्याख्यानस्यैवयुक्तत्वात्। परन्तूद्योतेज्ञापकस्यशैथिल्यमुक्तमित्याहुः। यद्यपि भाष्येप्रसज्यप्रतिषेध उक्तस्तथापि स नयुक्तः वाक्यभेदासमर्थसमासापत्तेस्तद्ध्वनयन्नाहासत्वेइति। नन्वेवं भाष्योक्तप्रसज्यप्रतिषेधफलेविप्रातीति। विप्रइत्यत्राति प्रसङ्गस्तत्रप्रशब्दस्य क्रियाविशिष्टद्रव्यवाचकत्वात्समुदायस्यच द्रव्यभिन्नत्वात्तदन्यत्रवर्त्तमानत्वात्। इष्टापत्तिस्तुनाव्ययसंज्ञायांतदन्तविधिसत्वेन तदन्तस्याव्ययत्वेसुपोऽश्रवणापत्तेरत आह। विशेष्येति। अत्रसत्वशब्देनसतोभावः सत्वमिति। साध्यावस्थायत्क्रियारूपासत्तानोच्यते चादिनान्तद्वाचित्वाद्किन्तु-

सीदन्ति क्रियागुणादयोऽस्मिन्निति व्युत्पत्त्याद्रव्यन्तदाह । द्रव्येतिभट्टा आहुः । गतिश्च प्रतिप्रणीतमिति । प्रसङ्गादनन्तर इत्यस्यव्यावर्त्यप्रदर्शनायप्रतीति।अत्रप्रस्यतत्समावेशोबोध्यः। प्रकृतिवदित्यतिदेशेन सुपोलुकितुनिरित्यादौ रुत्वादिस्यादत आह। प्रेति यथासम्भवंलौकिलालौकान्यतरप्रयोगानुकरणानीत्यर्थः । अन्यथादुसिति स्वपयोर्दुसिच्स्थः कुरित्यसंदिग्धन्यासेनदुस्येवकुप्रत्ययोङ्गोक्रियतान्नदुरिति सुषामादिषु दुष्टुशब्दस्त्यज्यतामिति भावः । यावताविनानुपपन्नमिति । प्रतिपदोक्तपरिभाषापिनेत्यबोध्यम् । ननु निरःकुषः सुदुरोरधिकरणेनिसस्तपतावित्यादिनिर्देशात् । त्रितयस्यसफलस्यसत्वेऽपि दुसःकिंफलमत आह । दुसःपाठेति । नवेतिवि । ननु तत्सूत्रसत्वेपीतिमास्तुशब्देकार्यस्यबाधादत आह । तयोरेवेति प्राप्ते ति विभाषोपपदेनप्रेत्यादिषु। अप्राप्ते ति । विभाषोर्णोरित्यादिषु स्वरूपं इदं नसंज्ञापरं पूर्वनिर्देशात् रुपग्रहणेनार्थस्यापि ग्रहणविवक्षयेति भाष्यविरोधापत्तेश्च । रूपंशब्दस्य संज्ञे तिभाष्येतुसंज्ञाशब्दः संज्ञायतेइति व्युत्पत्त्याबोध्यपरः। नियमार्थमिति आर्थिकनियमार्थमित्यर्थः । शाब्दस्तुननवेत्यादावगते । ननूभयोर्गोश्वृङ्गवत् समवप्रधानयोः संज्ञित्वांशे आनर्थक्यमुक्तदोषापत्तिश्चातोविशिष्टस्यतत्वं वाच्यं । तत्रहि विनिगमकमाह अर्थोनेति । नन्वेवमप्यशब्दसंज्ञे तिव्यर्थमर्थेकार्यास्यबाधादत आह । दाधेति आदिरन्त्येत्यस्यपरत्वादेतदुपन्यासः परत्वेति । तत्रकौण्डिन्यन्यायेन तुनसर्वबाध्यत्वमस्य अतिशदन्ताया इत्यनेन संज्ञिनोस्तेनतदभावज्ञापनात् । बाधेति सं-

ज्ञाद्वयप्रयुक्तकार्याश्रययोभेदाद्विरोधाभावेन समावेशस्तुनापा-
दितःषान्तस्यषट्संज्ञाकरेणेन तदभावज्ञापनात्। आकडोइति
नियमात्। अन्यत्रसडचिइति तुनयुक्तंसंज्ञायाएकत्वात्।
संज्ञिनोश्चभेदात्। इति एकासंज्ञे तिहि सूत्रंनत्वेकः संज्ञीइति
च अस्यपरत्वेपि प्रतिपदोक्तत्वात्ताः स्युरेवाऽत आह। षाङ्के ति
कर्मसंज्ञादेरिति। आसांषरत्वेप्यन्तरङ्गत्वादियमेवस्यादिति
भावः। तासांचारितार्थ्यंतुकर्मणोरोमन्थेत्यादावूहनीयम्। प्र-
त्यासत्तिसिद्धार्थानुवादकत्वेन यथाकथञ्चित्सूत्रसार्थक्येपि नि-
षेधस्तुत्यर्थएवात आह। लक्ष्येति। ननु लक्ष्यानुसारादिना-
सिद्धप्रत्याख्यानं नयुक्तमत आह। अतएवेति लक्ष्यानुसा-
रस्य तवाप्यावश्यकत्वादेवेत्यर्थः। अतएवभगवतेति तत्सिद्ध-
स्यासार्वत्रिकत्वादेवेत्यर्थः। सिद्धंविद्यमानंवचनं अशब्दसं-
ज्ञे ति। अन्यथाप्रत्याख्यानपक्षेपितद्दोषसत्वादसङ्गतिः स्पष्टैवे-
तिदिक्। येनवि। अस्माकंनकेवलं सुविभक्तावेवेदं किन्त्वन्य-
त्रापीत्याह। किंबहुनेति। अन्यत्रार्थेइति। अत्रमानंकर्तृकर्मणोः
कृतिअर्थस्वामीत्वाद्यर्थनिर्देशः इतरत्रलक्षणयासाधुत्वेतु तद्दे-
यर्थ्यंस्पष्टमेव द्वितीयेमानमाह प्रत्यय इत्यादिना उक्तहेतोरे-
वात आह। तृतीयान्तेनेति गौणलक्षणयेति भावः। मम-
तुनतद्विरोधः विशिष्टार्थानुशासकाभावात्। बोधस्यतत्प्रका-
रकस्यैवाङ्गीकाराच्च नन्वयंविशेष्येपीत्यत आह। तदुक्तमिति।
तथाच भाष्यप्रामाण्यात्तथेति भावः। धातोर्यंतमिति। अवध्य
वधिमद्भावःषष्ठ्यर्थः। अतएवयस्मात्परइति तृतीयकोटिनोप-
लक्षिताः सम्बन्धसामान्यषष्ठ्यैवतल्लाभात्। उपलक्षणमिति।

अतएवस्योन इत्यस्यासिद्धिमाशंक्यैतदुक्तिः संगच्छते। अन्यथा यणिऊनशब्दानाश्रयणात्। तदसंगतिः स्पष्टैव बार्तिकेपि येनेत्यस्यसम्बन्धात्तस्यापि विशेषणेएवप्रवृत्तिः। जरायाजरसित्यादावपिअङ्गाद्यु द्दिश्यजराशब्दादिभिर्जरसादेशविधानान्नासङ्गतिः वस्तुतोजराशब्दस्यादेशेपि उद्देश्यतायाः शाब्दमर्यादयांगेएवसत्वात्। नन्वेवमपि इकोयणित्यादौशब्दरूपं विशेष्यमादायस्यादेवेति भाष्यासङ्गतिरत आह। तत्रेति। ननु यस्मिन्परतोविधिस्तस्याकरणत्वेवान्तोयीत्यादौ तदादिविधिर्नस्यात्। अतउभयस्यावधारणबीजमाह। तच्चान्तरंगेति। पाठ्यमिति। अन्यथा लोकन्यायसिद्धस्यव्यपदेशिवद्भावस्य वचनेनबाधः स्यादिति भावइत्याहुः। वस्तुतस्त्विदंचिन्त्यंतदन्तेकार्यबोधनेनसार्थक्येनबाधकत्वायोगात्। व्यवदेशिवदितिपरिभाषावतरणस्थस्वग्रन्थविरोधाच्च। पृथक्योगस्यदृष्टफलाभावेन प्रत्याख्यातत्वेप्युत्तरत्रानुवृत्तौ बाधकाभावाच्च। तस्यचेति पाठफलंतुव्यपदेशिवद्भावोऽप्रातिपदिकेनेत्यस्यविषयेरोणीत्यादौ बोध्यम्। प्रत्ययांशेइति समासांशेतुनमानमिति भावः। शब्दानांनित्यत्वादाह। उच्चारणेति। तच्चवर्णोत्पत्तितद्ध्वंसनान्यतररूपम्। ननु तदभाववतावुद्धिंप्रतितद्वतावुद्धिः। प्रतिबन्धिकेतिहरिरित्यादावुच्चारणसत्वेनतदभावात्तदसिद्धिरत आह। सचेति फलान्तरमपि दुर्वलभाष्योद्योताभ्यामवगन्तव्यम्। व्याख्येति। संज्ञातत्तद्विधिवैयर्थ्यलक्ष्यासिद्धिमूलकादित्यर्थः। परःसंनिकर्षः प्रायःपरेणेत्यादि अयंभावः। परनिरूपितमनान्तरोयककालाव्ययेन पूर्वत्वंसंहितातथैवपूर्वनिरूपितंच परत्वं

विनिगमनाविरहात्। संहितायामितिचप्रदेशेकार्यिविशेषणंतदाश्रयत्वमेवंच तद्विषयंतदुभयमपि निमित्तोपादानेतन्निरूपितमेव प्रत्यासत्तेः अनुपादानेतुयत्किञ्चिन्निरूपितं कस्याप्यप्रत्यासन्नत्वात्। तदुपादाने यथा इकोयणचिझयोर्हो। आद्येअज्निरूपितं इग्निष्ठं पूर्वंसाद्वितोये हनिष्ठंझयनिरूपितं परत्वं सा अनुपादानेतुयथावावसानेइति। तत्र सप्तमीनिर्देशानांबहुत्वादुक्तं प्रायइति। पञ्चमीनिर्देशानामवसानकार्याणांचाल्पत्वादुक्तं क्वचिदिति न्यायसिद्धेर्थेलिंगमप्याह। अतएववावसाने इति। अतएव वासुदेववाचकाकारस्य संवृद्धाव इत्यत्रानुनासिकःर इत्यत्रनविसर्गःद इत्यत्रचर्त्वन्नननुविसर्जनीयस्य स इति। सूत्रभाष्यपर्यालोचनयापूर्वत्रतानोष्यन्तएवतथाच तत्र भाष्यं संहितासंज्ञायां प्रकर्षगतिर्विज्ञायतेसाधीयोयः परः सन्निकर्षइति। कश्चसाधीयः यःपूर्वपरयोरिति तस्यायं भावः। अनुयातपूर्वपरोभयनिरूपितमऽनान्तरीयककालव्यये तंनान्तरीयककालगतंपौर्वापर्यसमूहः संहितातद्विषयत्वंच तत्परत्वमेव संहितामितिचप्रदेशेपञ्चम्यन्तोपादाने तद्विशेषणं सप्तम्यन्तोपादानेऽनुपादानेचकार्यिविशेषणं उभयोपादानेतूभयोर्विशेषणं उपात्तोभयेत्यनेन निरूपकोभयमध्ये अन्यतरोपादानसत्वमिति विवक्षितं तेनसादेशस्यनावसानेप्रवृतिरिति एवञ्च पूर्वत्वंसंहितेति पर्यवसितम्। तथाचावसानकार्येऽसंभवात्। संहितापदासम्बन्धेन पूर्वत्वतेषां इष्टत्वादिति चेन्न उत्तरभाष्येतस्य दूषितत्वात्। गौरवादुक्तसाधीयस्त्वस्य निर्मूलत्वाच्चतस्यैकदेश्युक्तित्वान्नचैवमपि संहितायामिति सूत्रे-

काशायाः संहितायाइति । अइत्यत्रापि नावसानसंज्ञासाफल्य मवसानकार्याणां संहिताधिकारेपाठात्तदऽप्राप्त्यासंज्ञायाः फलाभावेनाचिरादेशस्येवानवकाशस्य वक्तुंशक्यत्वात् । प्रतिवर्णमवसानत्वेतस्याव्यभिचारात्संज्ञावैयर्थ्यं तत्रतत्रावसानपदवैयर्थ्यमनूद्यभाष्येवाध्यबाधकभावंविचारकरणाच्चास्यैकदेइयुक्तित्वमिदमेवाऽभिप्रेत्याऽथवेत्यादिग्रन्थप्रवृत्तेश्च । न्यायेनविषयभेदेपि बाधः स्यादिति। तदऽनुवादकाकडारसूत्रेणेत्यर्थः। तस्य न्यायस्यसंज्ञाविषयेऽप्रवृत्तेस्तत्सूत्रेवक्ष्यमाणत्वात् । अतएव समाधौसूत्रस्यैव सङ्कोचः । नन्वेकस्यैकैवसंज्ञे तितदर्थात् । कथं तस्यापि प्राप्तिरिहसंज्ञिनोर्भेदादिति चेत्सत्यम् । संज्ञाद्वयप्रयुक्तकार्यस्यैकवर्णवृत्तित्वेन संज्ञिनोरप्यैक्यमभिप्रेत्य भाष्येबाध्यबाधकभावोक्तिरिति कैयटएवस्पष्टत्वात् । वस्तुतस्तुन तत्प्राप्तिरिति सिद्धत्वेनायासंविनैव समावेशइति बोध्यम् । शङ्कित्रभिमानानुसारेणैवोत्तरयति । तदिति । अयुक्तत्वादिति। इदमुपलक्षणम् पूर्वोक्तलक्ष्यासिद्धेरपि एतेनसादेशेखरीत्यस्य मण्डुकानुवृत्तिरेकदेशे स्वरितत्वप्रतिज्ञाचतव मम–तुसूत्रद्वये संहितायामित्यस्य मण्डूकगतिरिति सममेवेत्यपास्तम् । परेणैवसंहितेति बहुतरगौरवप्रदर्शितत्वाच्च केचित्तुपूर्वोक्तप्रत्याख्याने न तेषामनभिधानकल्पनाद्यथाश्रुतंसाधित्याहुः। सुप्तिङन्तम्।सुप्तिङित्यस्यप्रत्याहारत्वेतिङ्साहचर्यस्य नडिसम्बुद्ध्योरिति ज्ञापकस्यचोद्योतोक्तस्य सम्भवेपि टाप्ङाप्ङीप्चाप्त्यप्पाशप्कल्पप्सुकतमपकारेणेत्यत्रतदसम्भवात् । तदऽपहायोभयसाधारणमाह। व्याख्येति। स्वादिष्वित्यादिग्र-

हादित्येके नचतिङ्साहचर्यादेकसूत्रोपात्तएवसुबपीति वाच्यम् । प्यङ्ष्यङ्डांसत्वात् तत्रापि व्याख्यानस्यशरणीकरणीयत्वात् । सुब्ग्रहात्तिङेकसूत्रोपातएवेत्यपि केचित् यद्यपीति उक्तेरिति पंचम्यन्तस्यशब्दरूपविशेष्याध्याहारेहेतुत्वं । शब्देति तदादीत्यत्राऽन्यपदार्थजिज्ञासायां तदऽध्याहारस्यावश्यकत्वात् । गुणानांचेति न्यायाच्चेति भावः । एतेन तदादेरिति विशेष्यमादायैवतत्सिद्धौ तदऽध्याहारोमुधेत्यपास्तम् । पूर्वसामानाधिकरण्यासंभवेन तद्विशेषणतयातत्कल्पने क्लृशाच्च किंचप्रत्ययग्रहणेतदादीति विशेष्यमादायतदन्तविध्यङ्गीकारेऽपञ्चम्या इत्यस्यापूर्वत्वं स्यात् । तस्य प्रत्ययविशेषणतयाऽन्वयासम्भवात् । शब्दरूपस्यतुतस्योभयरूपेणाऽन्वयसम्भवेन विशेषणविशिष्यभावेकामचारेण तत्रैव तात्पर्यग्राहकं तन्मतेपिनापूर्वम् । नन्वलौकिकेऽप्यभिचारात् संभवएवात आह । आक्षिप्तस्येति अनुमितस्येत्यर्थः । शब्दरूपविशेष्यस्यत्वध्याहारादन्वयोभवत्येव तवतुप्रत्ययेनेति हेतूपादानादाक्षेपपदेनानुमितिरेवाभिमतेति भावः । तेनगौरीति । षष्ठीतत्पुरुषोऽयमतोनपुंवदितिकेचिदाहुः । वस्तुतोघसंज्ञासूत्रेस्त्रीलिङ्गे समानाधिकरणे ह्रस्वइत्युक्तेर्बहुव्रीहिरेवायम् । गौरीत्यसंज्ञे तिनपुंवत्वम् । अथवा कन्याकुमारीगौरीतुनग्निकानागतार्तवेतिकोशाद् वयोवाचकोयम् । तत्रजातिकार्यं विकल्पेनेष्यतेऽतोजातेश्चेति निषेधान्नपुंवत्वम् । प्रत्ययग्रहणेचापंचम्याइति वार्तिकेकैयटेऽपञ्चम्याइत्यस्य दृष्टत्वीर्णेति प्रयोजनमुक्त्वासंज्ञाविधौतर्हितदन्तविधिनिषेधस्य किंफलमि-

त्याशङ्क्तिमेवञ्चतत्सामर्थ्यात् । प्रदेशेषु तदभावेदृष्तीर्णेतिसिद्धौनेदमसाधारणमस्य प्रयोजनमितिच तदाशयस्ततश्च यदिसंज्ञाविधौ प्रत्ययग्रहणेतदन्तस्यसंज्ञास्यात् । प्रदेशेषु पुनस्तदन्तविधिः स्यादिति प्रत्ययान्तङ्गृह्यतेतिसमाहितं घादिभिरुत्तरपदस्य विशेषणादिति भावः । एवंचकुमारीगौरब्राह्मणितरेत्यत्रकुमार्याह्रस्वः प्रसज्येतेति तद्व्यावृत्त्याचरितार्थमिति सङ्गतमेवप्रयोजनमिति तदाशयस्तत्रसमाधेःफल्गुत्वात् । कैयटङ्कटाक्षयन् सिद्धान्तत्वेनशङ्कांनाटपति एतन्निषेधेति । पूर्वोक्तप्रयोजनं तुनसतिसम्भवे उत्तरपदेत्यस्य विशेषणत्वात् । अतएव तदधिकारेप्रत्ययग्रहणेएवनिषेध आरब्धस्तस्यप्रत्ययविशेषणत्वासम्भवात् । नचेति यद्यपि सामर्थ्यान्नभविष्यतीति । समाधिरनुपदमुक्तोवक्तव्यस्तथापितत्प्राप्तिरेवनेति न्यायंसमाधिमाह । पदत्वेति तत्रत्योद्योतस्यभाव इत्युक्त्याप्रदीपाशयप्रतिपादकत्वान्नतद्विरोधः । अन्येतु स्वरूपव्याक्रियैवपराक्रियेति न्यायेनशङ्कात्वेनैवानुवादोऽतएवतदऽव्यवधानेनैवशङ्कासमाधानान्तरंच सङ्गच्छतइत्याहुरिति दिक् । यद्वा ननु संज्ञाविधावित्यत्रसम्बन्धसामान्यषष्ठ्यासमासेन प्रदेशेपितन्निषेधः परिभाषयैवसिध्यतीति सामर्थ्येन तद्वारणफलङ्कर्मषष्ठ्यासमासविशिष्टज्ञापनेत्वन्तग्रहणसार्थक्यं दुर्वचमित्याशयेनशङ्कते नचज्ञापितेपीति अन्येतु नन्वत्रोत्तरपदाधिकारेप्रत्ययग्रहणेतदन्तविधिर्नास्तीति तदन्तविधेःप्राप्तिरेवन नन्वत्रद्वितीयतदन्तविधेरभावएवतयाकल्प्यस्तथासत्यणन्तेउत्तरपदे इत्यर्थापत्तौहार्द इत्यस्यासिद्धिरिति चेन्न रात्रेःकृतीत्याद्यर्थंय-

त्रप्रत्ययस्यविशिष्योक्तिस्तत्रैव तत्प्रवृत्तेर्वाच्यत्वयातदप्रवृतेः नन्वेवमपिरदाभ्यामित्यादौ प्रत्ययग्रहणेचापंचम्याइति तदन्तविधेरप्राप्ते श्चारिताथ्यान्नसामर्थ्यमिति चेन्न रदाभ्यामित्यस्य प्राधान्यात्तकारविशेषणतयानिषेधाप्रवृत्तेरत एवचरितमित्यादौ न नत्वंनचस्फायःस्फीनिष्ठायामित्यत्रनिष्ठांत इत्यर्थवारणायपञ्चम्यन्ताबध्याक्षेपेण प्रत्ययग्रहणेचेतितदन्तविध्यभावात्। तत्रचारिताथ्यमिति वाच्यम्। अनयैवरीत्यातदन्तविध्यभावेसिद्धे आक्षेपेमानाभावात्। न चक्ष्विशःत्कानिष्ठयोरित्यत्रत्कांशेप्रत्ययग्रहणंचेति निषेधात्तदभाववन्निष्ठांशेपि तदभावात्तत्रचारिताथ्यं मुक्तरीत्यैवनिष्ठांशेतदभावेत्येतत्साहचर्यात्। त्कांशेपि तदभावइत्याहुः। इत्याद्यनुवृत्तेरिति सनाद्यन्तेत्यादावुक्तरीतेरसंभवात्। परिभाषैकदेशोपस्थिते रावश्यकत्वेन स्वरितत्वप्रतिज्ञानंमुधेत्याहुस्तन्न। अङ्गमितियोगविभक्तेतत्संबन्धाच तत्वस्यावश्यकत्वात् वृहस्युपस्थितेरप्युक्तत्वाच्चनक्षोदः। नन्वेवमप्यत्रतदावश्यकत्वेकार्यकाल इयानित्यादौ कथम् प्रातिपदिकत्वमत आह। इयानिति। इदंचान्यथासिद्धसुपलुगर्थं पूर्वप्रवृतसंज्ञायाएकदेशविकृतन्यायेनात्रातिदेशात्। नहिकार्यकाल उपदेशेनैवैकवाक्यतानातिदेशेनेत्यत्रमानमस्तीति स्पष्टंचादेच इत्यत्रभाष्येवृहदेवचोदिष्यतेचास्माभिरप्युपदिष्टात्। ध्वनितश्चास्यतत्वम्वस्त्वन्तात्स्वार्थइति प्रयोजनानन्तरंवदतागूरुथकृता न्यायसिद्धमप्यर्थं प्रमाणयति हलिसर्वेति। हलोन। ननु ब्राह्मणभोजनन्यायेन प्रत्येकमेव किंनस्यादत आह। अनन्तरेति। अयंभावो हलित्येकवचने-

नैव वर्णग्रहणेजातिग्रहणात् हलन्ताच्चेत्यत्रैवाजव्यवहितहल्-समुदायस्यसिद्धौ समूहबोधकैकशेषबोधकं बहुवचनंभोजन-न्यायेन प्रत्येकंसंज्ञायामनर्थकं स्यात्। ननु वर्णग्रहणेजाति-ग्रहणेपि लिडित्यत्रासमुदायेपि प्राप्नोत्यतः समुदायेएवप्रत्ये-कं यथा स्यात्। केवलेमाभूदित्येवमर्थम् बहुवचनमिति चेत्त-ह्याह। अनन्तरेति बहुवचनेनकेवलव्यावृत्तावनन्तरग्रहणंव्य-र्थमेव स्यात्। अतोऽनन्तरग्रहणेनैव केवलव्यावृताविति रिच्य-मानं बहुवचनंप्रकृतार्थसाधकमेव ननु केवलेपि कदाचिदान-न्तर्यस्य दृष्टत्वेनकथमनन्तराइत्यनेन तद्वारणमत आह। त-स्यविशेषणतेति। अतिरिक्तस्यैवेति। अतएवैकाजित्यादिव्यव-हारोऽसहायेभेदारोपेण कृतोभाष्येतदेतन्मन्यते व्यपदेशिवदे-कस्मिन्निति। प्रकृतेतुससहायत्वान्नसोऽन्वर्थत्वेचाभेदबाधादन-न्तरहल्समुदायवर्तिविशिष्टलक्षणेतिभावेनाह। पदेति। ननु बाधात्ससहायेव्यपदेशिवद्भावएवाङ्गीक्रियतेनलक्षणेति चेन्न। लिडित्यत्रापि व्यपदेशिवद्भावेन संज्ञापत्तेः मन्मतापेक्षयाऽधि-कमात्राणान्दृष्टार्थकत्वकल्पनेगौरवाच्च। वाक्येति। पदभिन्नपद-घटितसमुदायोत्रवाक्यशब्देन विवक्षितस्तेनपाहिमाधवउपेक्ष-सेकिंमामित्यादौवोपेक्षस इत्यादेः संयोगत्वेऽकाराकारस्यगुरु-त्वेप्लुतापत्तिरिति भावः। यद्वानबहुवचनेनसमूहस्य संज्ञावि-धानान्नब्राह्मणभोजनन्यायावसरइति सम्भवेदुत्प्रेक्षायदितद्-हुत्वेस्यात् प्रकृतेजात्याख्यायामित्यनेनैकस्मिन्नपि तस्यसम्भ-वादत आह। अनन्तराइत्युक्तेश्चेति। जातौचानन्तर्यबा-धात् तस्यवैयर्थ्यमिति भावः। ननूपलक्षणत्वेन तत्सार्थक्यमत

आह। विशेषणेति। अनिष्टेति। व्रीहयःसंयुज्यन्तेस्मिन्राशावि-त्यत्रवर्तिपदार्थस्यैवान्यपदार्थत्वाङ्गीकारेपि विनिगमकाभावइ-ति भावः। किञ्चसमूहस्यैव प्रकारतयावर्त्तिपदार्थत्वेन व्यपदे-शिवद्भावे तथा व्यवहारेपि प्रकृतेससहायत्वान्नतथेति बोध्य-म्। ननुद्व्योर्नस्यादत आह। हलइति आश्रयगतंबहुत्वंधर्मे-आरोप्यजात्याख्येत्यस्यप्रत्याख्यानात्। प्रकृत आरोपेणतत्वा-ङ्गीकारेपि पुनरपिद्व्योर्नस्यादतः सौत्रमिति। अनर्थकमिति भावः। एकहलस्तुना नन्तर्य्यमित्युक्तेः यद्वाहलौचहलश्चेति। उभयोरेकशेषःप्राचामनुरोधात्। स्वमतेबहूनां संयोगत्वेफला-भावस्य वक्ष्यमाणत्वादुभयोरेकशेषेनफलम्। किन्तुहल्चहल्-चहल्चहलइत्येव तत्रत्रयाणांसमूहेफलाभावात्तदऽव्यवेऽवतरं-तोद्व्योः समूहेपर्यवस्यति नत्वेकस्मिन् अनन्तराइत्युक्तेः हला-वित्येवसिद्धेबहुवचनंतुव्यर्थमेव मात्रालाघवार्थं वा हलावन-न्तरावित्युक्ते। रेकमात्रागौरवादिति बोध्यम्। चिन्त्यमेव फलाभावादिति ननु मड्क्तामड्क्तुमित्यत्रान्त्यात् पूर्वमिति। संयोगादिलोपः फलमस्त्येव न च जकारेझलिसः सङीतिवा-र्तिकेन झलादौ प्रत्ययेतद्विधानादिति चेन्न। मस्जोपि मिदं-त्यात्परएवास्तु नचैवंमग्न इत्यादौ नलोपानापत्तिरिति वाच्य-म्। नलोपविधायकेएवमड्क्ते त्युक्त्यादोषाभावात्। यद्वानु-म् विधायकेएवयोगविभागोस्तुनशोझलिमस्जेः स इति। म-स्जेः सकारस्यनुमादेशइत्यर्थः। भ्रस्जोरोपधेत्यत्रैव सकारस्य-निवृत्तिरिति बोध्यम्। प्लुतःस्यादिति यत्तुपाठः समुदिता-नामिति पक्षेपीदश्चोक्तं सम्यगेवेत्यन्तमनूद्यतत्रानंतराइत्युक्ते

र्विजातीयव्यवधौ तदनिष्टेरिति तच्चिन्त्यंतकाराकारोकारयोर्व्यवधानाभावात्। तितउइन्द्रइत्यादावसंहितयानिर्देशेउइत्यनयोः संयोगसंज्ञावारणेनानन्तराइत्यस्यसार्थक्याच्च। द्रप्समिति भाष्येतुपनसमित्युदाहृतं झल्पदानुवृत्त्याझलन्तसंयोगादेर्लोपविधानेन प्रकृतेतद्वारणेतुसंदित्यादौ तदापत्तिर्बोध्या। किंत्वेनेति। अपवादोपीति न्यायस्यतुनायंविषयःअपरनिमितकत्वेनसर्वत्रैवान्तरङ्गत्वादन्यत्रचारितार्थ्याभावात्। भूतपूर्वलघूपधेति भूतपूर्वोयोलघुस्तदुपधेत्यर्थः। धर्मिग्राहकमानेनलघुत्वांशेप्युपधात्वेपि तदाश्रयणेमानाभावादेतेनकुण्डतिष्ठ्युच्छतीत्यादावागमप्रवृतेः पूर्वंलघुत्वसत्वादङ्गविशेषणत्वेनुमितस्य गुणापत्तिरित्यपास्तम्। नचैवमपि हरिमेतीतिहरीत् स इवाचरतिहरीततीत्यादावति प्रसङ्गएवेति वाच्यं। हलन्तेभ्यआचारक्विपोऽनभिधानात्। भौतपूर्विकलघुत्वाश्रयणेपि स्थानिद्वारकतदाश्रयणेमानाभावाच्च। संधिकार्येति टिसंज्ञातुन तथा तत्रटिपदानुक्तेरितिशिवम्। इति शेखरविवृत्तिसंग्रहे संज्ञाप्रकरणम्॥ इकोगुण विधित्वेपि मिदेर्गुणइत्यादीनामनिकिविधानेनौर्गुणइत्यादीनांनियमार्थत्वेनच चारितार्थ्यसम्भवादाह। व्याख्यानेति सामर्थ्यादितितेन तत्पदविहितयोर्लक्षणाबोध्या स्वबोध्येतुनेयम्। त्यदादीनामइत्यादौदोषात्। संज्ञिपरमेवेत्यादि। शब्दाधिकारइति भावः। इदंचगुणवृद्धिपदानुवृतिमभिप्रेत्यादेङादैच्पदानुवृत्तिकरणेत्वर्थाधिकारेणापीष्टसिद्धिरिति बोध्यम्। योजनयेति इतेःप्रत्येकमन्वयः उच्चार्येतिशेषःतस्यचविधानेऽन्वयः अतीनद्वन्द्वाऽसाधुत्वम्।

गुणोगुणोवृद्धिर्वृद्धिरिति योजनेतुतत्वं स्यात्। एतल्लाभः। तृतीयांतघटितमौलवाक्यार्थलाभः ननूक्तरीत्यातयोरत्रानुवृत्तयोरर्थपरत्वात्कथमयं वाक्यार्थोऽतअहस्वादीति उचितार्थाधिकारानुरोधादिति भावः। तथाचोक्तनियमस्तत्वावच्छिन्नादन्यत्रोपाततजातीयजशब्दान्तरविषयकइति बोध्यं। नन्वेवंक्वचिद्दोषापत्तिरप्यतआहप्त्यान्तेतीति। तदन्तत्वेति। षांतत्वनांतत्वर्थः। एतेनानुवृतयोरसमस्तयोरेकवचनांतयोर्द्विवचनांतसमस्तैकदेशभूतगुणवृद्धिविशेषणत्वासम्भवेनशाब्दमूलोक्तपक्षासम्भवः नहिभवतिचैत्रमैत्रौदण्डीस्रग्वीतीति चिन्त्यमिदमित्यपास्तम्। अत्रत्यनञ्तत्वंछायातोबोध्यं। यत्तुविभाषादिक्समासइति। सूत्रबल्लक्षणेति न्यायेननिर्वाह। इत्यनुवृत्यैव सिद्धेगुणवृद्धिग्रहणंचिन्त्यप्रयोजनमिति प्राञ्चस्तत्खण्डयतिलक्षणेति तत्रपरिभाषायांगातिस्थेत्यादौपे इत्यस्याग्रहणायसाक्षाद्ग्रहणमिति। विभाषादिक् समासेतत्पुरुषेतुल्यार्थेस्याद्यनुरोधेनाह। साक्षात्तदिति शीघ्रोपस्थिति कत्वेनहृयोरनुगमइतिभावः साक्षादुच्चारितस्येति नन्वेवंसखीमतिक्रान्तोऽसखिरित्यादावनङादिकंस्यात् प्रातिपदिकस्य कुत्रापिसाक्षादुच्चारणाभावादितिवाच्यम्। साक्षादुच्चारितस्येत्यस्यगुणैर प्रापितस्येत्यत्रतात्पर्यादिति। वार्थादिति नचैवंगणयतीत्यादौ दीर्घेन स्थानिवदितिनिषेधःस्यात् वृद्धेरपिदीर्घत्वादितिवाच्यम् अनुस्वारदीर्घजशित्यत्रपूर्वोत्तरसाह चर्यणतच्छब्दविहितस्यैवतस्यग्रहणात् णयल्लोपावितिवार्तिके पोयङादिसाहचर्यादन्यतरोपादान उभयत्रनस्यादित्युभयोपादानमेवं वृद्धौत्वेत्यत्रा-

पि बोध्यम्। ध्वनितमिति अतएवत्कीधिकरणेचेत्यादि विहितेक्ते निष्ठाप्रयुक्तकार्यं लटः शतृविहितयोःसत्कार्यम् शालादौ वृद्धकार्यं पचन्तीत्यादौ गुणकार्यं तत्रादिशब्देन यणोमयइतिरेफस्य ह्रित्वदीर्घपदाविहितेपि शालादीनामाकारदीर्घचेति गुरुत्वंह्रस्वपदाविहितेपि देवदत्तादिपदघटकह्रस्वे संयोगेगुर्विति गुरुत्वंच सिध्यति। अपास्तमिति विधीयतेइत्यध्याहारेच पुनर्गुणवृद्धोग्रहणमेव मानमितिभावः नचैवमपिसंपूर्णं पूर्वसूत्रह्रयाऽनुवृत्तिः क्रियते तत्रोभयानुवृत्तिसामर्थ्यादपेक्षितार्थोभविष्यतीति तद्वैयर्थ्यमेवेतिवाच्यम्। विधीयते इत्यस्याध्याहारेपि यत्तगुणपदमस्तिमिदेर्गुणइत्यादावऽतो गुणइत्यादौचयत्तच्चादेऽऽस्तित्यदादीनामइत्यादावुभयत्रापिप्रवृत्तिसंपादनेनोभयानुवृतेः सार्थक्यात्। अचश्चेत्यत्रव्याख्यानेननिर्वाहेपि प्रकृतेतदाश्रित्यसिद्धप्रत्याख्यानेनासूयेति पंक्तिर्विंशतीतिसूत्रभाष्योक्त्यानचमत्कारकारीविधौपरीति। लिङ्गस्यविशेषणत्वेइत्यर्थः। पदस्यापिप्रकारतयाभानात्प्रकृतेनदोषइति बोध्यम्। अनुवादेपिप्रवृतिरिति। कर्मणिघञ्। अनूद्यमानविशेषणविशेषणत्वेस्वस्यलिङ्गस्येत्यर्थः। तेनेतिपदोपस्थापकप्रकृतपरिभाषाह्रयाऽतिरिक्तपरिभाषाणामनुवादेपि प्रवृत्यङ्गीकरणेनेत्यर्थः। प्रत्ययस्थेति आपीत्यस्यककारविशेषणत्वेपीत्यर्थः। इत्यादौनदोषइति। आदिनाल्लोपोनइति। तत्रयजादिनाऽनकारंविशेषयित्वाऽऽद्याकारस्यलोपवारणंभाष्योक्तं विरुध्येतपरिभाषासत्वेइति बोध्यम्। स्पष्टार्थमेवेति परिभाषामङ्गीकुर्वतस्तवमतेविधीयते इत्यध्याहारेतात्पर्यग्राहकं प्रकृतसूत्रगुणवृ-

ङ्किग्रहणमेवेत्यर्थः । न च ममविधावितिपरिभाषानित्यत्वबोधनार्थन्तत् । तेनोदात्तस्वरितयोरित्यादौ नदोषइति वाच्यम् । एवं सतितामनङ्गीकृत्यैवस्थानेग्रहणेनपरिभाषासामान्यस्यैवचानित्यत्वज्ञापनेन स्वाभीष्टस्यसाधयितु मुचितत्वात् । मन्वेवंपदोपस्थापकत्वेमिदेर्गुण इत्यादौ दोषएव स्थानषष्ठीनिर्णयस्येव गुणवृद्धिपदेविधेयसमर्पकत्वग्रहस्यापि वाक्यार्थबोधादनन्तरभावित्वेनालोन्त्यपरिभाषापेक्षयाऽस्याप्यन्तरङ्गत्वाभावादित्याशंक्याह । तत्रेति । वाक्यार्थबोधपर्यालोचनेपि विधेयत्वग्रहेप्रतिबन्धकाभावविशिष्टप्रथमान्तपदमात्रदर्शनेन तत्वज्ञानंसुलभमिति भावः । वृद्धिर्यस्येत्यादौ चयच्छब्दयोगस्य प्राथम्यस्यचप्रतिबन्धकत्वं बोध्यम् । प्राथम्यञ्चप्रथमान्तपदापेक्षयैव तेनगुणोयङ्लुकोरित्यादौ नदोषः । तेनचेच्छिद्यते इत्यादावनन्त्येकोगुणसिद्धिः परस्त्रीपरशुञ्चेत्यादौतु प्राप्तत्वादिपर्यालोचनंप्रतिबन्धकं प्रथमायास्तत्वमेवेत्यर्थः । न तु प्रथमायामेवतत्वमिति । तेनपरशुमित्यादौ नदोषइति बोध्यम् । अचश्चशेषमिति पदोपस्थापकत्वंशब्दव्यापाराश्रयणं विधीयतेइति पदाध्याहारश्च तेनह्रस्वइति सूत्रेत्यदादीनामइत्यादौच्छेचेत्यादौच नदोषः । अन्यथापरत्वादलोन्त्यस्यप्रवृत्तौ च्चिच्छेदेतिनसिध्येत् । त्यदादीनामइत्यत्वमन्त्यस्यन स्यात् । श्रीपच्छत्रमित्यत्रैवतुक्स्यात् नदैवच्छत्रमित्यादाविति बोध्यम् । आद्यन्तौटकितौ । नैकत्रान्वयइति । विशेषणतयाविशेष्यतयाचेत्यर्थः । आद्ये सविशेषणत्वात् द्वन्द्वोनस्यात् । अन्त्येसाहित्याभावादेकशेषोन स्यादिति बोध्यम् । द्वन्द्वोनप्रा-

प्नोतीत्यत्र द्वन्द्वपदमे॰शेषस्याप्युपलक्षणम्। परत्वादमुम्बाधतइति। नचैकप्रत्ययउभयोरपि समावेशसम्भवाद्विरोधाभावेनविप्रतिषेधसूत्राप्रवृत्तावन्त्यत्वेनधातुत्व आर्धिप्रर्धिपश्येत्यादावेरनेकाचइति यण्प्रसङ्गइति वाच्यम्। तेनतस्यैवाबध्यबधिमद्भावस्यावयवावयविभावस्य चलोकतन्त्रविरुद्धत्वात्। प्रकृतसूत्रभाष्यन्त्वेकदेश्युक्तमिति बोध्यम्। नन्ववयविनःसूत्रेऽनुपादानादाद्यन्तपदाकांक्षितोऽवययीकस्तत्राह। आद्यन्ताक्षिप्तइति। तदाकाङ्क्षितइत्यर्थः। यच्छब्दार्थइति। यत्रटित्किताौतत्राद्यन्तपदोपस्थितिरिति सूत्रार्थेनतत्रतत्रषष्ठ्यन्तस्यसत्वेन तदन्वयेननैराकांक्ष्यमिति भावः। इताविति किमिति। मत्वर्थीयेनिनाट्किताविवक्तव्यं कुकश्चककारोनकार्यइति लाघवंपदलाघवंचधुडादौ टोच्चारणेनोपदेशेटकारवान् ककारवांश्चेत्यर्थइति प्रश्नःपर्यायेणेति टुकिटकारवत्वककारवत्वोभयसत्वेनोभयोरपि प्राप्त्याविरोधात् समावेशाऽसम्भवेनविप्रतिषेधसूत्रभाष्योक्ततृजादिदृष्टान्तेनेत्यर्थः। इदमुपलक्षणमप्रतिपतेरपि तत्रोक्तप्रेष्यदृष्टान्तेन तस्याअपि प्राप्ते र्वह्निरङ्गे णसिद्ध्यतीत्यचः परस्मिन्नितिसूत्रभाष्योक्तरीत्याऽनिष्टमेव तुनापादितमुभयोरपि विशिष्टापेक्षत्वेनतत्वाभावाच्छब्दपरविप्रतिषेधाश्रयणेतुनमानमिति भावः। तदाश्रयणेतृशुषः कआदेश्चकःघान्तस्यटोराङ्गः कत्वखरित्ववावसाने वाक्षडित्यादौदोषो बोध्यः। यद्वा तदपिमास्तुट्कावाद्यन्तयोःसंज्ञइत्येवार्थोधुडादौत्वधुइति पृथक्पदंटइतित्व आद्यंस्वरूपपरं नपुंसकं धुट्भवतिअकारआद्यावयवइत्यर्थोयत्वचटिकादावुच्चा-

रणाथष्टकारस्तत्राद्यादेशापत्यापृथक्पदत्वासम्भवस्तत्रकर्मधारयोबोध्यः । परनिपातस्तु अनित्यत्वात्प्रकरणस्य पूर्वोक्तैर्जश्चरादिपदैर्विहितेतु नातिप्रसङ्गउच्चारितस्यैव प्रत्यायकत्वात् । तत्रचादौमध्येचतवकममकौठस्येकःक्तांतात्कइत्यादौ तत्रापि जस्त्वाभावेनसमासाभावनिर्णयेन नदोषोयत्रचादेश्चक इत्यादावुच्चारणार्थवर्णसहितस्तत्रापि विशेष्यानुक्त्यादिर्भवतीत्याद्यर्थासम्भवेन परेश्चघेत्यादाविवव्याख्याने न चस्वरूपपरत्वमेवेति नदोषइति प्रश्नाशयःपर्यायेणेति विशेष्यानुपादानेपि प्रकारतयोपस्थितस्वरूपस्यैवतत्वं स्यात् । तथाचटुकिरादन्तत्वस्ययौगपद्यासम्भवेनटस्यैव पर्यायेणतत्वापत्तिः संज्ञिभेदान्नशब्दपरविप्रतिषेध इत्युत्तराशयःमिदचोऽन्त्यात्परः मस्यश्रवणार्थत्वेनापि सार्थक्यसंभवादाह । निर्देशेति । नन्वऽक्षरसमाम्नायेऽचांमध्येऽन्त्य औकारएवेत्यऽतिप्रसङ्गोऽव्याप्तिश्चेत्यत आह । यस्यसमुदायस्येति । एतेन तस्यैवेतिद्वितीयतच्छब्देनपरामर्शात् । प्रथमस्यप्रक्रान्तत्वंबोधितम् । सौत्रमितिनिर्धारणविभक्तेः समूहवाचकादुत्पत्तेर्वक्ष्यमाणतयाऽच्पदेएकशेषावश्यकत्वेनतस्यन्न समाहारद्वन्द्वविषयेऽप्राप्त्याबहुवचनं द्विवचनं चतत्रन्याय्ये कारकेइति सूत्रस्थवक्ष्यमाणत्वस्यापूर्वार्थकल्पकत्वेमानाभावात् । एतेन तत्रतत्सौत्रभाष्यमपि न्यायसिद्धएवार्थेलिङ्गं समाहारद्वन्द्वे तुनिर्धारणविभक्तेरिष्टापत्तिस्तु भाष्यकल्पनापेक्षयाप्रकृतनिर्देशेन तद्भाष्यस्य सप्तमीसङ्कोचकत्वमेवोचितम् । षष्ठीशेषइत्यस्यापिसङ्कोचकल्पने मानाभावादित्यपास्तम् । यस्यविहितस्तस्यैवेति ।

अन्त्याच्चस्तुनपरामर्शःततःपरत्वस्य तदऽवयवत्वस्यचैकत्रविरुद्धत्वात् । न्याय्यऽर्थेलिङ्गमप्याह । अतएवेति । परग्रहणंकुर्वतः सूत्रकृतोपिसमुदायभक्तत्वमेवसंमतम् । अन्यथामिदच्चोऽन्त्यस्येत्येववदेत् । ननु तथैवास्तुकिमन्त्याजऽवयवत्वेसाधारणंदूषणमिति चेत् अजनिष्टधर्मस्यविशिष्टेऽतिदेशेनतत्तत्कार्यापत्त्यातत्रतत्रपरिभाषानित्यत्वप्रयुक्तं गौरवमितिगृहाण । इतिभावइति । तथाचवक्तुमूलकृतइति भावः । वस्तुतस्तूरण्परइति सूत्रेस्वयं वक्ष्यमाणरीत्यापरशब्दस्यैवावयववाचकत्वेनपूर्वनाभेः कायस्येत्यत्रैवान्त्याऽजवयविकपरत्ववान् समुदायाऽवयवोमिदितिसूत्रार्थः तदऽनुवृत्तिप्रतिपादकं सूत्रद्वयस्थभाष्यन्त्वेकदेश्युक्तमिति बोध्यम् । यद्वान्त्यपर्यायएकःपरशब्दःपञ्चमोप्रयोजकोदिग्वाचकश्चापरो नत्वेकस्यैवोभयार्थकत्वमुक्तभाष्यात् । प्रकृतेचपंचमोनिर्देशाद्दिग्वाचकत्वनिर्णयेनानुवृतेरावश्यकत्वमिति । प्रकृतसूत्रस्थसकलग्रन्थतात्पर्यम् । परशब्देतु अन्तपर्यायेबाधकाभावात्तथैववक्ष्यतेतत्सूत्रस्थभाष्यन्त्वेकदेशेस्वरितत्वप्रतिज्ञायाः कृत्स्नत्वादुपायान्तरपरमिति बोध्यम् । वस्तुतस्तु अनुवृत्तिपरसूत्रद्वयस्थभाष्यविरोधान्मानाऽभावाच्च पूर्वपरशब्दयोर्नावयवत्वांशेपि शक्तिरुरण्परइति सूत्रस्थावयववाचिनेत्यस्य वस्तुतस्तद्वाचिनेत्यर्थः । नतुतत्वेनेति । अतएवाग्रेऽनुनासिकात्परइति विहितस्यावयवत्वेमानाभावइति वक्ष्यते ऐचोरपिहरदत्तमतेनावयवत्वंवक्ष्यते पूर्वनाभेरित्यादौतु षष्ठीवाच्योऽवयवावयविभावइति बोध्यमिति सर्वमवदातम् । नन् समुदायनिरूपितत्वचरमत्वोभ-

यविशिष्टावयवत्वस्यान्तपदार्थत्वेन विशिष्टस्यायोग्यत्वेपि अवयवत्वमात्रबोधोस्तुयोग्यत्वात्तत्राह। फलाभावादिति। तस्मध्यपतितन्यायेनैवतत्वसिद्धेरिति भावः। विशिष्टाभिप्रायेणाह। अयोग्यत्वादिति। इत्यंशाऽप्रवृतिरिति। ननु विनिगमकाभावादन्त्याऽन्त्यःपरत्वांशस्यैव प्रवृतिरस्त्विति चेन्न। तद्बोधनवैयर्थ्यस्यैवगमकत्वात्। न च हलन्तेऽप्रवृतिरेव तद्बोधनफलम्। वा तावन्मात्रफलकत्वेमिदजन्तस्येत्येव ब्रूयादिति भावः। षष्ठीस्थानेयोगा। निरूपितसम्बन्धेति। सचविषयविषयिभावादिः। उक्तत्वादिति। स्थानस्यसम्बन्धत्वेतत्तव्यधिकरणविग्रहप्रदर्शनमफलंस्यादिति भावः। अध्याहारइति। जगन्नाथपण्डितराजस्तु अस्यैवसप्तम्यन्तस्यस्थानेपदोपस्थापकत्वमाह। योगेति। कर्मणिघञ् सप्तम्यन्तस्थाने इत्यनुकृष्यस्थानेयायुज्यतइत्यर्थइत्यादिना तदाननिपातनक्लेशइति बोध्यम्। प्रसङ्गइतीति सचाहार्यज्ञानरूपापतिरूपःस्थानित्वञ्च तद्विषयतापर्याप्त्यऽधिकरणत्वमादेशत्वञ्च तत्सत्ताज्ञाप्यसत्तापर्याप्त्यधिकरणत्वम्। यद्वाऽऽपत्तिविषयबुद्धिविषयतापर्याप्त्यऽधिकरणत्वंस्थानित्वम्। आपत्तिसत्ताज्ञाप्यसत्ताश्रयबुद्धिविषयतापर्याप्त्यऽधिकरणत्वमादेशत्वम्। अतएवाऽपवादउत्सर्गकृतमतिदेशेन प्राप्यप्रकारान्तरेणवारितंभाष्ये। अथवास्थानपदान्वितत्वं स्थानपदार्थनिरूपितसम्बन्धवाचकप्रत्ययप्रकृत्यर्थत्वमिति यावत्स्थानपदान्वितसत्ताज्ञाप्यसत्तान्वयित्वमादेशत्वम्। अतएवस्थानिवत्सूत्रेकैयटेऽपवादप्रसङ्गस्त्विति प्रतीकमुपादायबुद्धिविपरिणाममात्रंयदि-

स्थान्यादेशभावइति भावइत्युक्तं तत्रयदीत्युक्त्याऽन्यथोत्सर्गकृतप्रसङ्गोनास्तीतिसूचितं तच्चतयोरुक्तलक्षणत्व एवसङ्गच्छते । प्रसङ्गश्चेति । इहशास्त्रे गृह्यतेइति शेषः । सतिसंभवेइति । सार्थक्यस्येति शेषः । अचःपरस्मिन्नित्यादौतु तदसंभवादऽनर्थकप्रसङ्गोपि गृह्यतेइतिभावः । बीजमाह । अर्थप्रत्यायनार्थमिति । अयंभावःनित्यत्वानुरोधेन तस्यैवसोऽन्तस्यापि तस्यस्वीकारेतत्वंस्यात् । पदस्यवाक्यस्यचनित्यत्वं तदवयवस्यत्रसङ्गस्वीकारेऽनित्यत्वं स्पष्टमेव । तेस्तुरिति । इदञ्चनशाब्दं किन्तुफलितंसर्वत्रस्थानिवाचकादेशवाचकयोस्तदघटितेलक्षणयेकारघटितस्योकारघटितइत्येवं क्रमेणैकरूपएवशाब्दोऽर्थइति बोध्यम् । अतोनेति । तदघटितेलक्षणाङ्गीकारादेवेत्यर्थस्तेस्तुरितिकल्पनादेवेतितुनार्थस्तेनपचत्वित्यादेः समुदायस्यानित्यत्वावारणात् । तत्कल्पनन्तुप्रत्ययादेरपिकल्पितार्थकत्वेन तन्नित्यत्वसंरक्षणद्वाराप्रक्रियानिर्वाहमात्रफलकंनत्वन्यथासिद्धमन्यत्फलमस्ति पचतेःपचतु इत्यनेनैवतदनित्यत्वस्यापिपरिहारात् । बुद्धिप्रसङ्गइति । स्थान्यादेशसमर्पकयोः स्वबुद्धिलक्षकत्वमिति भावः । इत्यप्यर्थइति । अपिनालक्ष्यार्थबोधात्पूर्वभाविनइकारस्योकारेत्यादेः शक्यस्यसंग्रहः अतो नकिंचेति । चेनपौनरुक्त्यं इदन्तु बोध्यम् । प्रक्रियायैआवश्यकतदघटितलक्षणयैव नित्यत्वस्यापिसंरक्षणेसिद्धेबुद्धिलक्षकत्वस्यनिष्फलत्वात । नहिबुद्धिलक्षणयापचत्वित्यादेः पदत्वंसाधयितुंशक्यतइति । अतएवेति । शक्यार्थाङ्गीकारादेवेत्यर्थः । आदिनानपदान्तसूत्रपरिग्रहः । स्थानेऽन्तरतमः ।

त्रिरोधादिति तुल्यन्यायात्तस्मिन्नित्यादेरपि संभवात्पदोप-
पस्थापकस्यतत्वंसूचितम् । तमप्किमिति । येनकेनचित्
सादृश्यस्यकेवलान्वयित्वादन्तरग्रहणसामर्थ्यात्प्रकर्षलाभेसि-
द्धेतद्व्यर्थमिति प्रश्नाशयः । यथा स्यादिति । यथाज्ञापितें
चारितार्थ्याभावेप्यऽणुदित्सूत्रीयाप्रत्ययपदस्य भाव्यमानपरि
भाषाज्ञापकत्वं तथास्यतमपोप्यनेकविधान्तर्यसत्ताबोधकत्व-
मित्युत्तराशयः तृज्वत्क्रोष्टुरिति सूत्रेक्रोष्टुरिति षष्ठ्यन्तमिति ।
भावः । स्त्रोपुंवच्चेत्यादौतु षष्ठ्याःस्थानेप्रथमास्पष्टञ्चेदंस्था-
निवत्सूत्रेकैयटे तुन्नन्तात्प्रथमेत्यादिवक्ष्यमाणग्रन्थास्तु प्रकृ-
तसूत्रप्रत्याख्याने लोकन्यायेनसिद्धिरित्यभिप्रायेण नहितत्रापि
यत्स्थानषष्ठीत्यर्थोस्ति सूत्रारम्भेपूर्वविप्रतिषेधवार्तिकस्थतृज्
वद्भावग्रहणस्य यथासाफल्यं तथातत्रैववक्ष्यते । तस्मिन्निति ।
पदार्थकइति । इदंचइति शब्दमपर्यालोच्यतत्पर्यालोचनेतु
यथार्थस्तथावक्ष्यति स्वतन्त्रस्येति । अनुकरणस्येति शब्दपर-
तंत्र्यादस्यतत्वं तत्रतत्रतथार्थेन तद्रूपेणशक्तिग्राहकानपेक्ष-
णेनवा । इत्यत्रैवेति । तस्मिन्नूतस्मात्पदघटितेएवेत्यर्थः ।
बोधनायेति । तत्सत्वेउपस्थित्यातस्यैव प्रकृत्यर्थत्वनिर्णयइति
भावः । समानेति । इदञ्चनफलंपदोपस्थापकत्वेकिन्त्वाद्य-
मेवेति बोध्यम् । पुनस्तस्येति । त्वर्थेपुनरिति विशेषेवाइति
शब्दभावेसप्तम्याउपस्थिततरत्वेन प्रकृतेस्तदर्थस्यैव गृह्यते-
ऽतस्तस्यतदर्थपरत्वेतात्पर्यग्राहकइति । एतेन शब्दपरस्यार्थ-
परत्वमित्यस्य शब्दतात्पर्येणोच्चारितस्यार्थतात्पर्यकत्वमित्यर्थः ।
तच्चविरुद्धं एकशब्दोच्चारणविलम्बेतात्पर्यभेदाऽसम्भवादिति ।

परास्तम् । दिशिरुच्चारणइति । अवसानकार्येप्रत्ययलोपेप्रत्ययलक्षणविषयेचास्यबाधादेतदंशविकलैवेयमुपतिष्ठते । वस्तुतस्तूच्चारणार्थकत्वेफलाभावात्समानार्थकत्वेपिनक्षतिः । जनपदेलुबित्यादौ च औपश्लेषिकस्तस्यऽभावादानन्तर्यबाधाच्च नदोषः । बौद्धमिति । अयंभावः । सामीप्यंपौर्वापर्यंचकालिकंदैशिकञ्चेतिद्विविधम् । तच्चयुगपदवस्थितानामेवेति शब्देयौगपद्यासम्भवेनहयोरप्यऽसंभवेप्येकबुद्धौ विषयतयाऽनेकेषामपियौगपद्यसम्भवः यद्यपि लोकेचैत्रात्पूर्वःफाल्गुनइति भिन्नकालिकयोरपिकालिकं पौर्वापर्यमस्तितथापि शास्त्रे तथावक्तुंशक्यं प्रत्ययनिमित्तककार्याणांप्रत्ययोत्पत्तेः पूर्वमपिकालिकतत्परत्वमादायप्रवृत्त्यापत्तौ बह्वपप्लवापत्तेरिति स्पष्टंचेदं संहितासंज्ञासूत्रेभाष्यकैयटोद्योतेषु कर्तृकर्मणोरिति । प्रत्ययलोपेप्रत्ययलक्षणमित्यत्राप्येवं तत्रपरसप्तमीत्वेव्यवहितस्यततः परस्यचकार्यंनस्यादिति बोध्यम् । निर्दिष्टपदमिति । उत्तरसूत्रएवनिर्दिष्टादितिकर्त्तव्यमिति भावः । यद्वा इहाध्याहृतोपश्लिष्टस्येत्यस्यैवानुवृत्याविपरिणामः । अधिकारश्चेति । तदऽधिकारत्रयम् । संज्ञासूत्रंचेति । एतेनेति । प्रत्याख्यानभाष्येणबहिर्भूतानामधिककालव्यवाये प्रवृत्तेरनिष्टत्वानुमानेनेत्यर्थः । अनङादीति । आदिनापदात्परस्य युष्मदाद्यादेशादयः । छन्दसीति । एतेनपरलव्यवहितार्थत्वं व्युदस्यति । अलोन्त्यस्यस्थानेविधीयमानइति । अलोन्त्यस्येत्यनेनतस्यावयवषष्ठीत्वकल्पनात्कथमिदं तस्मात्पूर्वसूत्रेषष्ठीपदस्य संभावितस्थानयोगकस्यसत्वात्तत्रापि तस्यैवानुवृत्याफलतोद-

ङ्कोभवतीत्याशंक्याह । विधीयेति परिभाषाणांफलविशेषस-त्वएवप्रवृत्तिरित्येतल्लभ्यमाह । अल्समुदायेति । षष्ठीसमा-सेनाल्घोधकसमुदायेत्यर्थः । नत्वस्यफलेऽभिनिवेशः कार्य्यः परस्यस्थानेइति परत्वविशिष्टस्यस्थानइत्यर्थः । विहितविशे-षणत्वादिति यद्यपि विहितपदाध्याहारे पंचम्युपपत्तयेपरशब्द स्याप्यध्याहारइत्यङ्गसंज्ञासूत्रउद्योतउक्तम् । तथापि तत्रपरो-योविहितइत्यर्थादुपलक्षणपरत्वम् । प्रकृतसूत्रस्यतुमुख्यविशे-षणत्वेप्रवृत्तिरितिनविरोधः । इति शेखरेविवृतिसंग्रहेपरिभा-षाप्रकरणम् ॥ इकोयणचि । संहितायाअविवक्षयानणुट् ननु पूर्वेणापि संहितायाउक्तत्वात् । दधिआनयेतिप्रयोगानापत्ति-रेकपदेतन्नित्यत्वेनधकारेणतस्याः सत्वात् । संहितायामित्य-स्यविषयसप्तमीत्वेनविषयेइति पुनरुक्तञ्चात आह । कार्येति विषयभूतेतिच्च । अधिक्रियमाणविषयसप्तम्यन्तत्वस्फुटीकर-णायसमानाधिकरणंसत्सप्तम्यन्तद्वयमिति भावः । विषयश-ब्दोऽजहल्लिङ्गःपरिनिष्ठितेनरेखागवयन्यायेन बोध्यम् । बोध-कंशब्दस्वरूपमित्यर्थः । एतेनेति । मुख्यजातिपक्षेयथासं-ख्यसूत्रेणपरत्वाद्धाधात् स्थानेन्तरतमइत्यस्याप्रवर्तनेनेत्यर्थः । व्यक्तिपक्षेप्याह । स्थानतइति । अन्यानपेक्षस्वप्रयुक्तका-र्यप्रवर्तकतयेतरबाधकत्वेनैवहितस्यप्रावल्यं वाच्यम् । तथा सतितत्वंभज्येतेति भावः । नन्वेकत्रस्थानेऽनेकान्तर्यतो-ऽनेकप्राप्तौ यत्रानेकविधमित्यस्यविषयोऽत आह । सप्त-म्यन्तेति। अनचिचेत्यत्रचेदमे ओङ्सूत्रादाविति पाठः। तत्र-हिसंध्यक्षरेषु तपरोपदेशइति पक्षेप्लुतादिष्वज्विधिरितिवा-

र्तिकं। अनचिच। अचउत्तरस्ययरोर्द्वे भवतइति द्विर्वचनंनप्राप्नोतीत्युक्तम्। आदिनाहयवरट्सूत्रं तत्राप्ययोगवाहानामविशेषेणपाठपक्षेपञ्चफलीमध्येत्वंरूपफलापपादऽनावसर उरःकइत्यत्रानचिच अचःपरस्ययरोर्द्वे भवतइति द्वित्वंसिद्धंभवतीत्युक्तम्। प्रकृतसूत्रेपियणोमयइति वदतावार्त्तिककृतापीदंध्वनितमिति व्याचख्युः। ननुशाकल्यस्यद्वित्वनिषेधादेवरूपद्वयसिद्धौवापदानुवृत्तिर्व्यर्थेत्यत आह। शाकल्येति। एवञ्च तन्मतेऽभावघटितस्यसाधुत्वेपि अन्यमतेनस्यादऽतोऽनुवृतिरिति भावः। अन्येत्वऽनुवृत्तिमऽपेक्ष्यलाघवादाहेत्यवतारयन्ति प्रसज्येति। अचःपरस्मिन्नितिसूत्रशेषउद्योतेतुपर्युदासपक्षोक्तिसमर्थितः स्थानेद्वित्वपक्षेलक्ष्यभेदइति खण्डनकाराद्युक्तिंखण्डयति। इदमिति। आष्टमिकंवर्णद्वित्वमित्यर्थः। पदइति। आदिनायणोमयश्शरःखयइति षष्ठीत्वेति बहुव्रीहेस्त्वन्यत्रवीति। अत्रयथा ह्रस्वोनपुंसकइति सूत्रस्थभाष्यविरोधेन तथातत्रैवोद्योते स्पष्टम्। स्थानिवदा। अनलित्यस्यपर्युदासत्वेस्थान्यऽल्भिन्नाश्रयविधावित्यर्थेव्यूटोरस्केनेत्यादौ दोषोविशेषणन्तुखट्ठाभिरित्यादौ ह्रस्वत्वानतिदेशेनैसादिव्यावृत्याचरितार्थं प्रकृतसूत्रेप्रतिषेधइति भाष्याऽसङ्गतिश्चात आह। नतुस्थानीति। प्रत्यासतीति तत्स्वरूपन्तुप्रकृतसूत्रस्थभाष्यप्रदीपोद्योतेषु स्पष्टम्। वस्तुतःफलानुरोधाल्लाघवाच्चपर्युदासोऽयं भाष्यन्तुफलितार्थकथनपरमतएवशास्त्रीयेकार्यएवतत्प्रवृतिस्तथाच तस्यतत्वेऽयंसूत्रार्थः पर्यवसितोनल्वृतिधर्मत्वेन स्थानितावद्वृतिकोऽनल्मात्रावृतिरल्मात्रावृ-

तिधर्माऽघटितश्चयोधर्मस्तदाश्रयेतद्वृत्तिरुक्ते तरधर्मानाश्रयेच्च विधौकर्त्तव्येस्थानिवद्भवतीति मूर्द्धाभिषिक्तव्यावृतय इत्थम्। वृक्षस्तत्रेत्यादावति व्याप्तिवारणायाद्यधर्मविशेषणमत्रमानन्तु भोभगोइति सूत्रस्थंभाष्यमग्रहीदित्यत्रेकारस्येट्त्वेन स्थानितातस्यचेद्शब्देपिसत्वादनल्वृत्तित्वमिति तदऽतिदेशोभवत्येव ग्रहोऽलिटोत्यत्राऽनियमत्वेमानाभावेनाचश्चेत्यस्य परिभाषात्वेनानुपस्थिते रुपस्थितावऽप्यऽजभिन्नस्येटइडभिन्नस्याच इति वाऽर्थादिट्त्वेन स्थानिताभवत्येवाव्यत्वात्यं भाष्यंमानम्। एवं साम्नोइमेइत्यादावप्यौकारस्यौङ्त्वेनसातस्यचौट्इत्यत्रसत्वादनल्वृत्तित्वं तेनकार्यकालपक्षेस्वादित्वातिदेशेनभत्वेऽल्लोपोद्विर्वचनत्वातिदेशेप्रगृह्यत्वेच्च। एवंरामायेत्यादावेकारस्यङेशब्दवृत्तिङेत्वेनसेति सुप्त्वातिदेशोऽतिखट्ठोनिष्कौशांविरित्यत्राकारेकारयोः स्त्रीप्रत्ययत्वेनाप्त्वादिनावासागोस्त्रियोरितिह्रस्वविधौप्रतिलक्ष्यंवाक्यभेदात्प्रतिप्रत्ययविधायकेविषयेऽनियमेपिटाबादिविषयकेषु तदऽभावेनाचश्चालोन्त्यस्येत्यनयोरनुपस्थितेरुपस्थितावप्युक्तरीतेर्वातेनाप्त्वादेरतिदेशः। अतएव हल्ङ्याबित्यत्रदीर्घग्रहणंङ्याब्ग्रहणेऽदीर्घइति वार्तिकंचसङ्गच्छते। आकारादिप्रश्लेषश्चातिखट्ठायेत्यत्राकारस्यसुपिचेतिदीर्घविधावत्वेनस्थानित्वात्तस्यचाच्छङ्के पिसत्वादनल्वृत्तित्वं तपरसूत्रस्यतुतपरबोध्य इत्यर्थेइति तद्वृत्त्याप्त्वातिदेशेयाडापइति स्यादऽतोङ्याब्ग्रहणेदीर्घइति वक्तव्यमित्यव्यत्यम् भाष्यंसङ्गच्छते। एतेनाद्यविशेषणेह्रस्वोनपुंसकेक्रुन्मेजन्तः स्थानिवदादेशेतिसूत्रभाष्यविरोधः तथाहि आद्यचातिखट्टार्थमऽति-

खट्टाइत्यत्रदीर्घएकादेशेसत्युपसर्जन ह्रस्वत्वमाशंक्यवहिरङ्गा-सिद्धत्वात्समाहितम्। त्वद्रीत्यात्वकारवृत्तित्वात्। स्त्रीप्रत्य यत्वातिदेशएवनेति द्वितीयेतुआधयेच्चिकोर्षवेकुम्भकारेभ्यइ-त्यत्रसन्निपातपरिभाषयाऽव्ययसंज्ञावारिता त्वद्रीत्याकृत्वा-ऽनतिदेशात्प्राप्तिरेवनेति तृतीयेऽग्राव्ग्रहणेऽदीर्घइति वार्तिके-ऽदीर्घइत्युक्तम्। तद्धिखट्टाइत्यत्रसलोपार्थमाप्त्वातिदेशाय-त्वद्रीत्याकृतेपि प्राप्तिरेवनेतीत्यपास्तम्। अतिखट्टार्थमति-खट्टाउभयत्राप्यकाराऽऽकारयोः सवर्णदीर्घविधौपूर्वत्वेन परत्वे नच्स्थानित्वात् तस्यचानल्वृतित्वात्। आद्ये पूर्वान्तत्वेना-प्त्वस्यसुलभत्वाच्च। अन्त्येपरादित्वेन आप्त्वाच्चातिदेशस्य-निषेधोमासम्भाव्यतामित्यऽदीर्घइति विशेषणमित्युद्योतेस्पष्ट-मुक्तेश्च स्वरूपमित्यस्याविषयेतत्स्थानेति लौकिकन्यायेनसि-द्धेर्वक्ष्यमाणतयाकृत्वातिदेशस्यसुलभत्वात्। पूर्वस्मादऽपिवि-धौस्थानिवत्वप्रवृत्यास्थानिनिभवन्त्याःकृत्संज्ञाया आदेशेएव प्रवृतेश्च। अन्तरङ्गेकृत्त्वेवहिरङ्गगुणादेरसिद्धत्वेनाग्नीइत्यादौ प्रगृह्यत्वस्येव तद्बुद्ध्यादेशेसुलभत्वाच्च। एवमन्यदऽप्यूह्यं अन्यच्चेदं नन्वाद्यविशेषणेऽतोलोपइति सूत्रस्थभाष्यविरोध-स्तत्रहिण्यल्लोपयोरियङादिभ्यः पूर्वप्रतिषेधोवक्तव्योनवक्तव्यः सन्त्यऽत्रैतेविधयएतेषु कृतेषु स्थानिवद्भावाण्णिग्रहणेनग्रहणा ल्लोपोभविष्यतीति नैवं शंक्यमियङि अन्तलोपप्रसज्येतेत्यु-क्तम्। तवत्विथङादिविधावल्त्वेन स्थानितेतिप्राप्तिरेवनेती-ति चेन्न। षञ्चमीसमासाभिप्रायकत्वादस्येदमेकदेश्युक्तमि-त्युद्योतेस्पष्टमुक्तत्वाच्च नन्वेवमपिकुमारीमिच्छन्कुमारीत्यत्रा-

कृत्सार्वेतिदीर्घेहल्ङ्यादितिसुलोपोनस्यात् । अन्त्वेनस्थानि-
तेतिङीप्त्वाऽनतिदेशादिति चेन्न । अपरनिमितकन्त्वेनान्तरङ्गे
लोपेदीर्घस्यासिद्धत्वात् । पञ्चमीसमासेनस्थानिवत्वाच्च । न-
न्वेवमप्यपश्योधावनमृगइत्यादौसिपोरुत्वेउत्वेगुणेपूर्वरूपेचकृ-
तेतिङऽतिङइति निघातःस्यात् । सकारवृतितिङ्त्वस्यत्वन्म-
तेरेफेऽनति देशादग्रे प्ररोहासम्भवेनातिङन्तात् परत्वादिति
चेन्न । रुत्वस्यासिद्धत्वेनरेफएवमध्यगसादृश्यबुद्ध्यातिङ्संज्ञा-
याअग्नेइत्यत्रप्लुतेप्रगृह्यत्वस्येव पुनःप्रवृत्याऽग्रे प्ररोहसंभवात्।
एवमतृणेडित्यादौ हल्ङ्यादिलोपविषयेहल्त्वेन तत्वेपिसु-
प्त्वादिनापि स्थानितेतिस्थानिवत्वं प्रवर्ततएवेति बोध्यमिति
दिक् । रमाभीरामायेदमित्यादावत्वैच्त्वयोस्तथात्वादति-
देशऐसयादिश्चस्यादतोहितीयंधर्मविशेषणमत्रत्यमानमाऽऽका-
रप्रश्लेषेणङ्याप्ग्रहणेऽदीर्घइति वार्तिकप्रत्याख्यानपरंभाष्यं-
चान्यथाऽऽस्वादेरिवात्वेत्वयोरप्यऽतिदेशः प्राप्नोत्येवेति तदऽस-
ङ्गतिः स्पष्टैवालृवृतिरित्येवोक्तौत्वाप्त्वेट्त्वयोरतिदेशोनस्या-
दऽतस्तन्मात्रइत्युक्तम्। अत्रमानम् पूर्वोक्तंभाष्यमुन्नेयम् । प्र-
दीव्येत्यादौवलादित्वातिदेशः स्यादऽनस्तृतीयंधर्मविशेषणम् ।
अत्रमानंविधिग्रहणंभाष्यञ्च प्रदीव्येत्यत्रैवतथाविधार्द्धधातुक-
त्वाश्रयत्वादिड्विधेतिदेशः स्यादऽतस्तद्वृत्तीत्यादिनाविधिर्वि-
शेषितोऽत्रमानंभाष्यप्रयोगादिकं यथायथमूह्यम् । क्षोदिष्यते-
त्येदं यथाध्ययनम् । अत्रेदमवधेयम् । लस्येत्यधिकृत्यविहि-
तेषु तिबादिषु लकारवृतिलिट्त्वादेरतिदेशोभवत्येवोच्चारणा-
र्थत्वेपिलत्वस्यानलृवृतित्वानपायात् तेनचक्र इत्यादावादेशो-

त्तरंद्वित्वसिद्धौरेवतिकादौयस्येतिलोपसिद्धिश्चठस्येकइत्यत्रवर्ण निर्देशस्यैवसिद्धान्तात् । अतएवकितिलिटिविधीयमानावे- त्वाऽभ्यासलोपोकृतार्थौ नचैवंवर्णनिर्देशेत्वऽल्विधित्वात् मा- थितिकेकादेशोनेतिठस्येकइति सूत्रस्थभाष्यविरोधइति वा- च्यम्। विशिष्टनिर्देशेपिष्ठमात्रस्यैवोद्देश्यताबोधविषयत्वेनतस्य- चाल्मात्रवृत्तित्वादऽतिदेशाभावेनकादेशाऽप्राप्तेरिति स्थानि- भूतइति। व्यपदेशिवद्भावसिद्धमिदं स्पष्टप्रतिपतयउक्तं स्प- ष्टञ्चेदमऽत्रैवोद्योते । अतएवरेफेति । आद्यार्थाङ्गीकारादेवे- त्यर्थः । एवमेवाग्रे पुनःपूर्वेति लक्ष्येलक्षणस्येतिनात्रसंज्ञा- विषयेतदऽप्रवृत्तेःप्रगृह्यसंज्ञाप्रकरणेभाष्येस्पष्टत्वात् । तस्या- पोति । अभ्यासस्यानर्थकत्वादृऋइत्यस्याऽर्ऋइत्यादेशेस्था- निवद्भावेनद्विरुक्तधातुत्वम् । पूर्वभागत्वत्वार्थसमाजग्रस्तम् । तथाज्ञानेति स्थान्यादेशभावज्ञानइत्यर्थ इत्याहुः । परन्त्वत्रा- शास्त्रीयातिदेशोभवति । अन्येतु तत्स्थानापन्ने ति लौकिक- न्यायेनाल्वृतिरपि पूर्वभागत्वस्यातिदेश इत्याहुरेवं ह्यभ्यास- त्वमेव कुतोनातिदिष्टमिति कैयटेनोक्त्वाच्चेति । नन्वेतत्त्वया- फलत्वेनकथमुक्तमिति चेन्न । पञ्चमीसमासानङ्गीकारकर्तृ- मूलमतेतत्सत्वात् । भविष्यतीत्याद्यसिद्ध्यान्तरङ्गासिद्धत्वमि ङ्विधौनेति तेनाप्यस्यासिद्धिरन्त्यफलमाह । प्रदीव्येति । अन्यथानल्पपीतिलिङ्गादऽशास्त्रीयस्यकित्वस्यैव बलादित्वस्या- प्यतिदेशः स्यादिति भावः । अतएवनप्रपठेतीत्युक्तम् । व- भूविवेति । यन्निमितेतिप्रत्यासतिफलंदातुङ्गष्टायेत्यस्यत्यागो ननु बलादित्वस्यवस्यापि सत्वात्स्यादेवनिषेधोऽतःप्रत्यासत्या-

प्रतिपादयति नहीति। स्थान्यलिति स्थानितोऽल्तदऽसाधारणोधर्मोयस्मिन्नस्यभावेइत्यर्थेऽसाधारणेत्युक्तीरेफस्थानिकेति पूर्वग्रन्थविरोधात् प्राचामनुरोधेनेत्येके द्वितीयार्थाभिप्रायेणेत्यन्ये वस्तुतस्तु शब्दतइति वक्ष्यमाणत्वेन तद्विरोधाभावात् समानफलकत्वाच्चयुक्तैवसेत्यवोचाम अतएव प्रकृतसूत्रउद्योतेयत्तशास्त्रे विशेष्यतयाविशेषणतयावाऽऽदेशस्य स्थानिभूतोयोऽल्तत्स्थानसंबन्धीचयोल्तन्मात्रवृतिधर्माश्रयणं तत्रविधौनिषेइत्युक्तिः सङ्गच्छतेनहि तत्रद्वितीयार्थाभिप्रायकतावक्तुंशक्याननुभोभगोरिति सूत्रस्थभाष्यविरोधइति तन्न अननुनासिकोकारघटितरुत्वस्य रेफमात्रवृतित्वेन रेफस्थानिकविसर्गस्यरुशब्दत्वन्नेति भाष्यउक्तमिति नतद्विरोधइति दिक्। स्वशास्त्रेणैवेति। इत्यन्तस्यबोध्यमिति वक्ष्यमाणेनान्वयः। अत एवेति। अन्यथानेनदीर्घइत्येवब्रूयात्परत्वादिति तुगऽपेक्षयेतिबोध्यम्। कार्यमनेनेति। अथात्रायंसूत्रार्थ आदेशःस्थानिवद्भवति सादृश्यंकार्यभाक्त्वेन कार्यभाक्त्वंच प्रयोगित्वनिमित्तत्वोभयरूपंपूर्वपक्षेतुतन्निष्ठव्यवहारवत्त्वेनसादृश्यमिति नचान्त्यपक्षेरामोरामस्येत्यादावतिदेशेन दीर्घःस्यात्। तथातिसृणामित्यादौत्रयादेशादिःस्यादुपदेशाऽप्रवृतेःसुप्त्वयञादित्वआमपरत्वत्रित्वरूपनिमितवैकल्पप्रयुक्तत्वेन तन्निमितातिरिक्तनिमित्तत्वादतिदेशस्येति वाच्यम्। यद्यन्निमित्तवैकल्यप्रयुक्तयदुपदेशस्याप्रवृतिस्तस्य तस्यनिमित्तस्यवतिप्रकृत्यर्थवृतित्वएवातिदेशप्रवृतेः स्वभावसिद्धत्वात्। अतएवेति। अत्रैवेति पाठउक्तेरिति पञ्चम्यन्तस्याग्रे सत्वात् शास्त्रीयमेवेति तत्वंचशा-

स्त्रबोध्यतापर्याप्त्यधिकरणत्वं त्रित्वाद्वेरतिदेशायविधेयतेतिनो क्तम् दुर्लभमिति नचाण्निमित्तिकाण्णन्तेसुलभेति वाच्यम्। प्रत्यासत्त्यासर्वनामस्थाननिमित्तिकायाश्चाश्रयाणान्तुम्विधौन चकार्यकालेअग्नीइत्यत्रैव यथोद्देशेपि वा औइत्यत्रपूर्वान्तवत्वे नाण्त्वं परादिवत्वेनसर्वनामस्थानत्वेन पुनःसंज्ञाप्रवृत्त्यात-न्निमित्तिकापिसुलभैवसेति वाच्यम् । एवमप्यण्विधानावधित्वस्यश्रेयसित्यत्रसत्वेन श्रायसमित्यत्रन्यायं विनादुर्लभत्वात् । नवानुमानिकेनस्थानिवत्वेन तल्लाभःश्रेइत्यस्याप्यऽर्थवत्वेन तस्यस्थानिधर्मत्वाभावादिति दिक् । परिच्छिन्नेति । प्रातस्विकरूपेणबोधितं परिमाणमानुपूर्वीविशेषोयस्यार्थस्य तद्वाचकेत्यर्थः । तदऽभावादिति । ननु गङ्गाप्रविष्टनदीदृष्टान्तसिद्धत्वेनाकोरिति प्रतिषेधज्ञापितेन यन्मध्येतिन्यायेनाक्तपरिमाणानां धात्वादिशब्दानांसङ्ख्यनम्केसाकच्केयथा प्रवृत्तिस्तथाश्वपुच्छदृष्टान्तसिद्धेन प्राग्दीव्यदितिज्ञापितेनानेनापितिङ्त्वातिदेशःकुतोनेति चेन्न । वैषम्यादक्तपरिमाणानामधिकेप्रवृत्तिमन्तराकोरित्यादेर्नसार्थक्यं प्राग्दीव्यदित्यस्यार्थबोधकत्वाद्यतिदेशेनसार्थक्यमिति नन्वेवमङ्गसंज्ञाचाप्यऽक्तपरिमाणानामित्यङ्गसंज्ञासूत्रस्थभाष्यादङ्गत्वस्याक्तपरिमाणनिष्ठतयाऽनतिदेशेश्रायसावितिं पूर्वभाष्यंविरुध्येत । तथाजरात्वबदुदकत्वाऽनतिदेशेहितीयं भाष्यंविरुध्येत तथा प्राग्दीव्यतोऽणितिसूत्र उक्तपरिभाषांज्ञापयित्वातेनैवपदत्वेसिद्धेपचत्वित्यादौ स्थानिवत्सूत्रोक्तमेकदेशविकृतोपसंख्यानञ्चोदितं तन्नकर्त्तव्यमिति भाष्यकैयटादिकमपिविरुध्येतेति चेन्न । श्रा-

पसावितिभाष्येणाद्यस्यैकदेश्युक्तत्वात्। पूर्वोत्तरेतिपरिभाष-
यापूर्वमेव स्वरप्रवृत्याद्वितीयस्यापि तथात्वात्रूपान्यत्वाच्चेति
प्रकृतसूत्रेभाष्यएवप्रत्याख्यानस्य दूषितत्वेन तृतीयस्यापितथा
त्वादक्तपरिमाण उक्तन्यायाऽप्रवृत्यसाधारणफलन्तुसजुष-
माचष्टेसजू इत्यत्ररुत्वाभाव आनुमानिकस्तुनजुषोऽप्यर्थवत्वे-
नसजुषत्वस्यस्थानिधर्मत्वाभावादित्याहुः। इदुदुपधेभ्योणि-
चतुएरमनभिहितोऽन्यैरिति दिक्। तण्डुलेति सतितत्वेनलो-
पः स्यात्। ननु नादेशविधेर्नसइत्यत आह। आदाविति।
तेनस्मिन्नन्तसंग्रहोऽवहि सर्वस्मिन्शयइत्यत्रालुकिनलोपेपि-
संज्ञाविधौतस्यासिद्धेन संयोगेगुरूसंज्ञाया स्मोतोकारस्यप्लुत-
त्वेननोच्चोरणस्यसार्थक्यमिति। प्रत्ययान्तत्वेपीति। कृतपूर्व-
सवर्ण आसित्यादावादिवत्त्वेनप्रत्ययत्वं तत आनुमानिके आ-
नादौ स्थानिवत्त्वेनप्रत्ययत्वं तदन्तत्वंत्वऽर्थसमाजग्रस्तमिति
बोध्यम्। विशिष्टातिदेशस्तुन अशास्त्रीयत्वात्। त्वापतिरिति।
एवमऽचिनवमित्यादौ पित्वाऽतिदेशेपिङित्वापतिरिति बोध्यम्।
स्थानिवत्वेनैवेति निष्टात्वस्याक्तपरिमाणनिष्टतयाश्वपुछदृष्टा-
न्तसिद्धेनासिद्धेरितिभावः। नचानिष्टायामित्यस्यननिष्टाव्या-
वृत्तिः फलंकिन्तु कृत्वेनसादृश्यग्रहणंतिङन्तव्यावृतिरेवेतिक-
थंज्ञापकतेति वाच्यम्। तन्मात्रफलकत्वेकृतीत्येववक्तव्य-
त्वात् प्रत्यज्येति। अस्यबीजमाख्यातशेखरतोवसेयम् लक्ष्यानु-
सारीति न च भृशादिसूत्रेऽङ्ग्वे रिति पर्युदासोज्ञापकइति वा-
च्यम्। अभूततद्भावेप्रवर्ततेनसार्थक्यात्। नह्यऽत्रतदेववव-
क्तुंयुक्तं गौरवात्। नन्विदुदुपधेति सूत्रेऽप्रत्ययपर्युदासोज्ञा-

पकः नहिप्रत्ययावयवत्वं स्थानिवत्वाद्वारकं विसर्गोऽस्तीति न च्भिसिएकदेशविकृतन्यायेन अक्तपरिमाणत्वात् नापितस्था नापन्नेतिलौकिकेन प्रकृतसूत्रोयोद्योतोक्तरीत्याविभक्तित्व-स्येव प्रत्ययत्वस्यापि स्वरूपमित्येतद्विषयत्वाविशेषात्। न च तदऽविषयःप्रत्ययावयवत्वमेवातिदिश्यतां तथा सतितथैवफ-लानां सिध्याज्ञापकानुपयोगादिति चेन्न। उक्तार्थोज्ञाप्यता मसमर्थसमासोवेति संदेहेलक्ष्यस्यैवानुसर्तव्यत्वादिति भावः। अशाब्लोयेति प्रत्ययान्तत्वेत्यर्थः। यातिरितिसिध्यर्थंवरेयग्रहण ज्ञापितसंभावितप्रत्ययत्वादिकमादायउवङिति प्रकृतेतद्घना-श्रयणेपियणेष्टं सिध्यतोत्याशयेनाह। यणिति। अन्यथेति मात्रनिवेशेतुभोभगोइति भाष्ययोजनैवतत्फलं बोध्यम्। अ-ल्व्यवहारेति नचात्रपक्षेऽशितीत्यत्रकर्मधारये तदादिविधिर्न-स्यादिति वाच्यम्। असत्यपितत्रेतिशकारेऽव्यवहितेपरइत्यर्थे-नशवादौ तस्यलोपइत्यस्यस्थानिवत्वात्तत्परत्वेन एशादौत्वेका रादिनाऽव्यवधाऽनेनेष्टसिध्याबाधकाऽभावात्। अत्रपक्षआदे-चइति सूत्रस्थस्यात्रापि शप्शिद्भवतीति भाष्यस्यशबऽवयवइ-त्संज्ञकशकारइत्यर्थोबोध्यः। आदेचइति सूत्रस्थशेखरस्तूपा-ध्यायानुरोधी नन्वेवदेवश्चोरइत्यादौटिलोपस्यस्थानिवत्वाद्ध-ल्ङ्यादिलोपः स्यात्। तथाविमलदिवोत्यादौशलोपस्यतत्वा-द्हलिलोपः स्यात्। प्राचांमतेत्वऽनुबन्धमात्रवृतिधर्मवदुद्देश्य-केऽनल्विधाविति निषेधोनप्रवर्त्ततेज्ञापकसाजात्यादिति नदो-षइति चेन्न। ममापिहल्ङ्यादिसूत्रादिषुङ्याबादिग्रहणेना-नुबन्धमात्रावृतिधर्मप्रयक्तं कार्यमनुबन्ध्यादेशेनेत्यर्थज्ञापने-

नादोषइत्याशयात् । अन्येतूक्तज्ञापकेनक्वचिदऽव्यवहारोपी-
तीत्येवज्ञाप्यते लक्षानुसाराच्चव्यवस्था एवं ह्युत्तरग्रन्थविरोधो
पिन अतएवौङ आपइत्यत्रभाष्येऽतीत्यत्रयस्मिन्विधिरित्य-
स्यसञ्चारइत्याहुः । नन्वेवम् प्राचीनमतार्त्किलाघवमिति
चेत्शृणुप्राचाहिनानुबन्धेति अनुबन्धकार्येतिलाश्रयमनुब-
न्धकार्येति क्वचिन्निषेधप्रवृत्तिरिति वा वचनत्रयीज्ञापनीया-
मयातत्हयोति ननु भाष्यस्यशेषपूरणेन व्याख्यानेकिंमा-
नमत आह । ध्वनितमिति । अन्यथाऽऽदेशेतत्कार्यमप्रा-
प्यतत्परिहारयत्नविचारोऽसङ्गतः स्यात् । ममत्वऽनेकाल्सू-
त्रेकृतत्वान्नासङ्गतिरिति भावः । अचःपर । अचएवेति ।
इदंचप्रकृतसूत्रेभाष्ये स्पष्टम् । नाग्लोपीति सूत्रभाष्यंत्वे-
कदेश्युक्तिरिति तत्रैवोद्योतेस्पष्टम् । मारयतीति । इदुदुपधे-
भ्योणिचोऽनभिधानन्तुलुङेयवेतिणौचङोति सूत्रस्थोद्योतरीत्या-
इदं सामान्येनणिजऽत्रनेति प्रदीपरीत्यातुभवन्तमाचष्टेभावय-
तीति बोध्यम् । यलोपोनस्यादिति यलोपेनिषेधस्तुलोपाजादे
शएवेति बोध्यम् । दीर्घेनस्थानिवत्वमिति दीर्घविधौनिषेध-
स्तुलोपाजादेशएवेति भावः पूर्वविधिशब्दइति सूत्रघटकवि-
पिशब्दइत्यर्थः । सम्बन्धसामान्येति कर्मप्रत्ययान्तस्यतेनैव
तत्सम्भवात् कर्तृषष्ठ्यन्तेन तदऽभ्युपगमेतु पूर्वस्याव्यावृत्ति-
प्रसङ्गः कर्मषष्ठ्यातुनतत्सम्भवः भावंप्रतीति तद्विवरणेनाकर्मक-
त्वात् । षष्ठीस्थानेइत्यस्यतुनप्रवृत्तिः एकार्थीभावापन्नत्वात्
षष्ठ्यन्तस्यगुणानामिति न्यायाच्चेति भावः । कस्यचिद्विधेयस्या-
भावादिति न च यस्येतिलोपस्तथास्पष्टंचेदं तत्रैव प्रदीपोद्यो-

तयोरिति वाच्यम् । वार्तिकमतेकतोत्यादौ स्थानिवत्त्वेनप्राप्तगुणादिवारणायनलुमतेति सूत्रेबाध्यसामान्यचिन्तावश्यंभावेनाचः परस्मिन्नित्यस्यापि निषेधात् । आनुकितुनसःप्रत्ययैपरतःपूर्वकार्याभावात् वार्तिकोदाहरणस्य तद्रीत्येवदातव्यत्वात् नियमत्वमितिभाष्यमतेपि निषेधमुखेनप्रवृत्तिरिति पक्षेतस्या आवश्यकत्वाच्चविधिमुखेन प्रवृतिरितिपक्षेपिश्रविष्टादिपरित्यागेनानुकपर्यन्तं धावतोभगवत आनुकएवाभिप्रायविषयत्वात् एवंस्थितेचिन्त्यमिति ब्रुवंतोमान्याः इतएवारुरुत्वेराह । प्रकृतसूत्रेपीति सोपीति ननु कर्तृषष्ठ्यन्तपूर्वशब्देन भावार्थकविधिशब्देन समासेपूर्वत्वस्यविधानोतरकालिकस्य चाश्रयणेसंज्ञायां भाविपूर्वत्वस्याप्यऽभावात्तत्रकर्त्तव्येऽयंनस्यादिति संबन्धसामान्यषष्ठ्यासमासोविज्ञायतइति षडिकादेरपि सिद्धिरितिप्रदीपोक्तरीत्यासर्वेष्टसिद्धौमास्तुतन्त्रादिभाष्यञ्चय थाश्रुतमेवास्त्विति चेन्न । अनाश्रीयमाणायामपि प्रकृतावतिदेशज्ञापनायद्वितीयस्यावश्यकत्वात्स्पष्टंचेदमत्रैव भाष्यप्रदीपोद्योतेषु ध्वनितंचेदं विधिग्रहणं स्वाश्रयनिरासार्थमिति प्रदीपप्रतीकएवाप्यर्थइति वदताउद्योतेज्ञापकान्तरेण तत्साधनेतुमास्तुतन्त्रादिर्ध्वनितश्चेदंकेचिदिति वदतातत्रैवोद्योतेइदन्तुचिन्त्यम् । अस्तुकर्मसाधनएव ऐनेयेति सन्नियोगेतिपरिभाषयापूर्वसम्बन्धिनीनिवृत्तिर्विधेयेति नदोषः परिभाषायामतिदेशप्रवृतिस्तुवेतस्वानित्यत्रैकदेशविकृतन्यायेन रुत्वाभावायावश्यिकाऽपरविधावित्यादिभाष्यंत्वेकदेश्युक्तिरित्युक्तमेव वैयाकरणे आयादेशापत्तेश्च तस्यतत्वमिति यत्वत्रपश्च-

मीसमासेनातिदेशप्रसक्तिमाशंक्यसमाहितमुद्योते ऐज्विधा-
नसामर्थ्यान्नभवति स्थानिवत्वमितिपटेति तस्यायं भावः।
सतिस्थानिवत्वेपदांतयकारवकारासम्भवेन विधिवैयर्थ्यात्।
ऐज्विषयेतदऽप्रवृतिरिति एतेनादेशेपठनीयइत्यर्थं बुध्वागौर-
वादुत्तरत्रचारितार्थ्यादिदमसङ्गतमिति यदूयांचक्रुस्तदपास्तम्।
नपदान्तघटितान्येति। इदञ्चफलकथनम्। न तु ज्ञाप्यशरीर-
म्। अन्यलधातुग्रहणे इत्यादिवदिति बोध्यम्। विसर्गादि-
सिद्धिरिति। अन्यथारुत्वेकृतएकदेशविकृतन्यायाऽप्रवृत्याऽपद-
त्वाद्विसर्गोनस्यात् कार्यकालमाश्रित्येदम् अन्यत्रतुरान्तेएवरु-
त्वासिध्योपदेशप्रवृत्यासिद्धमिष्टम्। स्पष्टंचेदमिति प्रकृतसूत्रे-
तुभावसाधनत्वमात्रं नतुप्रकृतंफलं ननु वेतस्वानित्यत्वरुःप्राप्नो
ति यथोद्देशेऽन्तर्वर्तिविभक्त्यास्वादिष्विति वाऽकारान्तेप्रवृतस्य
पदत्वस्यैकदेशविकृतन्यायेनसान्तेसत्वात्। कार्यकालपक्षेप्यु-
क्तन्यायेन तदादित्वमऽतिदिश्योपदेशद्वयेनसान्तेतत्वमिति त-
त्वकर्त्तव्येस्थानिवत्वंतुनाऽनेननिषेधात् अनेनचसाक्षात्परंपरया
वासूत्रोपात्तप्रतिबन्धकं तत्प्रापकंचप्रतिषिध्यते स्थानिवत्वम्।
तत्रचसाक्षात्प्रतिबन्धकं एषोयन्निति साक्षात्प्रापकंकानिस-
न्तीति परम्परयाप्रतिबन्धकं द्वेधासाधकप्रतिबन्धात् प्रतिब-
न्धकप्रवर्तनाद्वा आद्ये वेतस्वानित्यत्रपदसंज्ञाप्रतिबन्धकः सि-
द्धान्तेतु एतदुदाहरणंमृग्यम् द्वितीयेरलावित्यत्रप्रकृतिभावप्र-
वर्तनात्परम्परयाप्रापकं प्रतिबन्धकत्वात् यथासिद्धान्तेवेतस्वा
नित्यत्रमत्वरूपप्रतिबन्धकस्यसान्ते प्रतिबन्धाद्रुत्वप्रापकत्व-
मतिदेशस्य नचैवं षडिकासिद्धिः लोपविधानादिति पञ्च-

प्रश्लोगादे स्पष्टम् । अत्रमानन्तु रुत्वापादकंभसंज्ञाऽत्रबाधिकाभविष्यतीति अथवेत्यादिचभाष्यमिति यथायथ मूहनीयं स्पष्टंचेदमत्रैवोद्योते इति चेत्तत्रसिद्धान्तरीत्यासमाधते । अत्रपदेइति । प्रत्यासत्येति पदेइत्यत्रपरपदस्योपस्थितत्वात्तत्स्थएवादेशोगृह्यतेइति भावः । अत्रचाभ्यस्तसंज्ञासूत्रस्थं भाष्यंलिङ्गमपि तत्रहि यत्रखण्डद्वयश्रुतिस्तत्रैव संज्ञार्थमुभेग्रहणंकुतोन अतएवऐर्त्सन्नित्यादौ जुस्नेत्याशंक्यस्थानिवत्वाज्जुस्नभविष्यतीति नतदर्थन्तदित्युक्तम् । अन्यथाऐर्त्सन्नित्यत्रस्थानिवत्वनिषेधाज्जुस्स्यादिति तद्दारणायतस्यावश्यकत्वेन तदऽसङ्गतिः स्पष्टैव एतेनात्रपदान्तसाधकस्यापि पदान्तग्रहणेन ग्रहणमित्यत्रकिंफलमिति प्रश्नेदिवितिप्रातिपदिकादाचक्षाणएयन्तादिच्चिअश्वशब्देन समासेपदत्वेपिप्रातस्थानिवत्वनिषेधे उत्वेदध्वश्वसिद्धिरिति फलंपरंप्रदर्शयन्तःस्वयंपरमशान्ताःपरास्ताःवेतस्थानिति। इदंच प्रत्यासतिमन्तरापिसिद्धम् तथापिपिपठोरत्रेति प्रत्यैषिषन्निवेत्यादौतु तत्फलंबोध्यम् । अतिरिक्तस्यैवेति धात्वऽनवयवोयःपदचरमावयवस्तद्विधायकातिरिक्तेत्यर्थः । तेनपिपठोरितिसिद्धः यद्वापदशब्देनात्रयस्य स्थानिवद्भावप्रतिषेध्यतेतादशादेश हेतुभूतप्रत्ययनिमित्तकपद संज्ञावत् गृह्यतेतेनतिरश्चः पिपठीःकल्पमित्यत्रापि नदोषः अत्रत्योत्तरग्रन्थविरोधश्चनेत्याहुः । शित्यस्यैवेति अतएवपदान्तविधिंप्रतिनस्थानिवदित्युपक्रम्यब्रह्मबन्धेत्यत्रजस्त्वं प्राप्योतीत्युक्तम् । अन्यथाजश्पदेननिषेधस्यदुर्वारत्वात् । प्रकृतेविचारोनिष्फलःस्यादिति बोध्यम् । द्विर्वचनग्रहणादिति तत्प्रतिब-

न्धकप्रवर्तकातिदेशस्याप्यऽनेन निषेधाङ्गीकारादिति भावः ।
अदर्शनम् । शास्त्रतोऽनुबन्धादीनामर्थतोल्यबन्तइति बोध्यम् ।
उभाभ्यांप्रसक्तिंदर्शयन् प्रत्ययलोपविषयेनिषेधएवकुतोनेत्या-
शङ्कांदूरीकुर्वन्नाह । तत्रेत्यादिना यथाश्रुतंत्वाश्रणायलोपावश्य-
कत्वेन प्रत्ययलक्षणार्थमित्यस्यासङ्गतिः प्रसक्तस्येतिकिमिति ।
इति तुनेतिशेषः कौस्तभेपञ्चम्यापत्तेरित्येवपाठात् । तत्वेतु
इति ग्रामस्थलयबन्तार्थनिरूपिताधिकरणत्वेत्वित्यर्थः । दिगि-
तिएङ्ह्रस्वादित्यत्रेव प्रत्ययग्रहणपरिभाषोपस्थानेनैं तद्वारणे-
तुसोमसुत्रपुइति प्रत्युदाहर्त्तव्यम् । अत्रहिसुनोतोःप्राप्तस्य
क्विपोऽनर्शनस्यसुनोतेरऽग्रे इवत्रपुशब्दादऽग्रे पि सत्वेनतस्या-
पि लोपसंज्ञायां प्रत्ययलक्षणेनत्रपुशब्दादग्रे पि क्विप्बुद्धिसत्वें
न तद्बुध्यबधित्वस्य सुनोतावविवादत्वात् । तदादित्वस्यत्र-
पुशब्दान्तेसम्भवादक्षतिः कृदऽतिङ्सूत्रभाष्योक्तरीत्याधातु-
पदानुवृत्त्यातद्वारणेतुसोमसुत्पुलीयतीत्यादौ दोषोबोध्यः यत्तु-
विवरणेनियमाभावान्नपरिभाषोपस्थानन्तु विधावित्युक्तम् ।
तस्यायं भावः । सोमसुदाद्यर्थमावश्यके प्रसक्तानुवर्त्तनेनिय-
मोनेति तेनैवत्रपुसिद्धिर्नान्यथेति भाष्याशयइति भाष्यानु-
यायित्वादुद्योतस्यासूयानविधेयाः ननु प्रत्ययलक्षणस्य निय-
मार्थत्वात्स्थानित्वेन तुगापादनीयस्तच्चापवादें उत्सर्गकृतवार-
णाय षष्ठीनिर्दिष्टस्यैवेति नप्रकृतेइति चेन्न । प्रसक्ताननुवृ-
त्तावुक्तविषये एवविध्यर्थसम्भवेन नियमार्थत्वस्यैवायोगादि-
त्यादिदिगऽर्थोबोध्यः विनिगमनेति भाष्यारुढत्वादित्यपि बो-
ध्यम् । आकृतेरिति स्वरूपस्येत्यर्थः । चरितःकृतइत्यर्थः अ-

धिकमुद्योततोऽवसेयम् । नादिन्या । प्राधान्येति । अतएवपुष्या-
दिन्यां लिङ्गविशिष्टपरिभाषयानातिप्रसङ्गः नाव्यवहितातिरि-
क्तव्यवायात् नाचिचआदिन्याक्रोशेपुत्रस्येत्येव सिद्धेनद्वयो-
पादानं स्पष्टार्थमित्याहुः । आक्रोशएवेति । अत्राहुः श्रुतएवएव
कारान्वयइति ब्रह्मभ्रूनेति सूत्रस्थोनोक्तावृक्कोवाव्यनियमए-
वयुक्तोनोचेत्तयोस्तस्मिन्पुरस्थेति तृतीयाश्रुतउपेक्षित इति
चिन्त्यमिदमितित्रिप्रभृ। अतएवेति । विजातीयद्वित्रिप्रभृतीत्य-
स्यायमर्थोऽचःपरस्यत्र्यादिष्वर्णेषु मध्येयरोद्वित्वेति ततश्च-
हर्यनुभवेऽप्यऽनेनसिद्धौ किन्तनेतीति भावइत्याहुः । अत्रति-
स्रोऽसङ्गतयोऽचःपरस्यानेन प्रतिषेधस्तेनरहाभ्याम् परस्यवि-
धिरिति कविषयैक्यमित्येकाशाकटायनमतेप्रतिषेधादन्यत्र त-
त्सार्थक्यमित्यपराऽनन्तरत्वादनचित्येत्येव प्रतिषिध्येतेति तृ-
तीयातत्रानन्तरस्यापवाद्यत्वेपि परत्वादस्यापि वाध्यत्वमित्य-
न्ताशुद्धतरा पूर्वत्रासिद्धीयमद्वित्वइति निषेधादाद्ये त्वभिमा-
नकल्पनमन्तरादुरुद्धरेतिमन्यते भाष्यसम्मतेति । उदःस्था-
शइछोटोत्युत्तरमऽभ्यासेचर्चेति प्रतीकधारणात्तस्य तत्संम-
तत्वमनुमीयतइति भावः । हलोयमां । अत्रपर्वयतेऽपर्व्वातिः
शुक्रयतेःशुक्रातिशुक्लयतेःशुक्ल्लातिचर्मयतेःचर्म्मातिवृङ्-
वृञश्चास्पष्टेविच् वर्ङ्ङवतेवर्ञ्ञवत इत्युदाहरणानिबोध्यानि
वर्णयतेर्वर्ण्णिचमाहेत्यपि तत्रनपदान्ताहलोऽण इत्यनेनमो-
नुस्वारेण चकेषां चिन्निराकरणेप्यन्त्यानिनिरावाधानोत्याहुः ।
अवावौयोति। वान्तइति न्यासेवोपि व्यपदेशिवद्भावेन तदन्त-
त्वाद्ग्रहः स्यादितिमन्यते । तस्यलो । विपरिणामेति लोपस्य-

कर्मसाधनत्वेतुनायम्। दिगितिनन्वादिर्जिदृडुनामिति न्यासेनव्यञ्जनस्योपदेशेऽजित्यञ्चश्चेत्त्वेद्विलो ऽथुजित्यादावुभयतोग्रहणेनसिद्धौ किन्तस्यग्रहणेनेति चेच्छ्णूदित्वादुदितोवेत्यस्य प्रसङ्गःतत्कर्मधारयस्त्वऽशक्य उवङ्दिरुतृदिरित्यादीनामसंग्रहापत्तेरित्यादिर्दिगऽर्थोऽवसेयः वान्तो। मानाभावेति ननु यथा वान्तपदेसामान्यतः श्रुतेविशेषाकांक्षायां पूर्वसूत्रपर्यालोचनं तथास्थानिजिज्ञासया वाक्यार्थपर्यालोचनमावश्यकमिति चेन्न। स्थानिजिज्ञासायामेचइति श्रुतेनतस्याःशान्तावपिविशेषस्थान्यंशेनिराकांक्षत्वेन तदऽलाभादित्याहुः। पदपर्यालोचनेऽर्थावगतिर्जातैवात आह। यथेति हलिसेत्यत्रवग्रहणासम्बन्धात्तस्यासिद्धत्वाच्चाह। लोपःशेतिविधेयविषयश्चेति। अयंसङ्कोचोनिष्फल आद्ये नैवसर्वंसामञ्जस्यंस्यादित्याहुः। अन्त्यइति। उत्तरयोर्नित्यङ्कौटिल्येलुपसदेत्यनयोर्विग्रहेण वृत्तिप्रतिपाद्यविशेषयोः कौटिल्यगर्ह्ययोःशक्तिस्वभावेनासंप्रत्ययान्नित्यग्रहणमनर्थकं क्रियासमभिहारेतद्दारणायतदित्यपिन गत्यर्थकात्तत्रापीष्टत्वेन लुबादिभ्यश्च यङेवनस्वभावेनसमभिहाररूपविशेषाप्रत्ययेन तद्दारणस्य सुकरत्वादित्यादितिङन्तशेखरेद्रष्टव्यमित्याहुः। धातोस्त। नयकीतितुनसूत्रितम् जनाविसाधुर्जनौयमित्यत्रावादेशापत्तेरित्याहुः। ममतुतन्निमित्तत्वाभावाद्धातुसंशब्दनेन विहितप्रत्ययपरत्वाभावाच्च नसः अतएव क्विबन्तभूशब्दात्तत्रसाधुरिति यतिभोयमित्येव औयतइति नन्वऽत्रापि वान्तादेशेवहिरङ्गयकोऽसिद्धत्वंरियतोत्यत्रयथेति चेन्न। एतादृशान्तर[illegible]स्यजा-

सवहिरङ्गासिद्धत्वनियामकत्वंनेति परोक्तत्वात् । अतएव क्षीयत इत्यादौयकिदीर्घादिसिध्यतीत्याहुः । यद्यप्यत्रसूत्रे धातोरादौतोश्चेदिति व्याख्येयंनियमस्यतत्रैव [illegible] तन्निमितस्येत्येकवचनानुरोधादेवमुक्तमित्याहुः । क्षय्यहिंसायामित्यस्याग्र इत्यस्येतिशेषः । अतोनाग्रिमद्विवचनासङ्गतिः क्षय्येत्यत्रप्रकृतिभूतयोरेककोटितया वा ननु सानुबन्धकत्वादयं नग्राहिष्यतेऽत आह । क्षैइति लक्षणप्रतिपदोक्तेत्यस्यतु नायं विषयःप्रतिपदोक्तानुपूर्व्यश्रुतेः व्याख्येति । ऐचोभावादित्यपि बोध्यम् । क्रय्यस्तु । शाब्दमर्थमाह । क्रयार्थेवस्तुनोति व्याख्यानात् गुणेति तच्चतदर्थेतिविशेषणासङ्गतिरूपमत्रैवसूत्रेप्रदीपोद्योतयोः स्पष्टम् । अत्रमतेक्रीणातिःक्रयार्थःक्रय्य ॥ स च द्रव्यदानपूर्वक धान्याद्यादानम् । एवंचक्रे तृकर्तृ क्रियाश्रयोधान्यमित्यर्थकं क्रे तृभि≍क्रय्यन्धान्यमितिसिद्ध्यति केचिन्मतेतु सोत्रविक्रयःसच्चलाभेच्छया द्रव्यादानपूर्वकधान्यादानमेवंचविक्रे तृभिः क्रय्यङ्क्रे तृभिःक्रेयमित्येव व्यवस्थितमिति बोध्यम् । ननु विनिमयाश्रयत्वाविशेषाद्द्रव्येपि प्रयोगद्वयं स्यादऽत आह । द्रव्येति । इदंचमतद्वयेपि बोध्यम् । स्वरसेति क्रे यंनोधान्यं नचास्तिक्रय्यमिति प्रत्युदाहरणस्वरसेस्यर्थः । आहुरिति । तस्यममापियोजयितुंशक्यत्वमरुचिः । लोपःशाभोभगेति । अयंभावः गौर्यत्रेति व्यावृतयेऽपूर्वस्येति तावदऽनुवर्तनीयमेव व्योरित्यत्रापि ततश्चभोयच्युतोनसिद्धेरतोभोभगो इत्यपि स्मरितव्यं स्मृतवादीनामनभिधानेगौतौगार्ग्यस्येत्यत्रासम्बन्धेदोषाभावेपि हलित्यत्रावर्णमात्रस-

म्बन्धेदोषस्यस्पष्टत्वात् वस्तुतस्तु ओतोगार्ग्यस्येत्यत्रापि दोषए-
र्थःयर्थःशम्भोयर्थ इत्यत्रभो इत्याद्यनुवृत्तेरभावेलोपापत्तिरूपः
न च सगुणएवेति वाच्यम् । ओतोगेति सूत्रेभाष्येसिद्धेलो-
पेनित्यार्थमिदमित्युक्तं तद्विरोधात् । अन्यथाऽप्राप्ते विध्यर्थ-
मेववदेदतएवतत्रवक्ष्यति भाष्यानुसारिणस्त्विति । एवं इश्च-
उश्चयूतदर्थ्यवर्थमित्यत्रलोपवारणाय हलिसर्वेषामित्यत्राप्यु-
भयानुवृतिरावश्यकी एतेन तल्लोभयनिवृत्येष्टसिद्धिरित्यपास्त-
म् । दध्यानयेत्यादीनामिवैषामनभिधानस्यावश्यकत्वात् अ-
च्चिश्नुधातुभ्रुवांय्वोरिति निर्देशेनेष्टापत्तेः कर्त्तुमशक्यत्वादिति
ननु अशग्रहणानर्थक्यं नह्यऽत्ररुरस्तीत्यऽशग्रहणप्रत्याख्यान-
परसिद्धान्तभाष्येरुग्रहणादऽलसूत्रेरुसम्बन्धेन तत्स्थानिकय-
स्यैव लोपोनेन स्यात् । अन्यथाऽन्यत्राभावादित्युक्तोक्तरीत्या-
तन्नऽन्यारुयत् कार्यिणोऽभावादिति वक्ष्यमाणरीत्यासामान्यत-
एववदेदत आह । सतस्माआइति असम्बन्धइति । एवंचरुप-
दमुपलक्षणमिति न तद्विरोधइति भावः । यद्वाभोभगोइति
सूत्रशेषोद्योतोक्तं वृक्षवादिज्यावृतये हलिसर्वेषामित्यत्ररुपद-
सम्बन्धेन रुस्थानिकयस्यैवग्रहणमिति पक्षान्तरेऽत्रापिसम्ब-
न्धःस्यादऽत आह । सतस्मेति । क्विपित्विति णिचःपूर्वभा-
विनमाश्रित्यतु नोठोवहिरङ्गत्वेनटिलोपस्यासिद्धत्वात् एतेन
केति । आद्यान्ययुक्तिद्वयेनपदान्तेति निषेधाप्रवर्त्तनेनेत्यर्थः ।
अन्यथावहिर्भूतसुपापदत्वात् स्यादेवेत्याहुः । ननु पदादिसं-
ज्ञायां यथोद्देशस्यैव सत्वात्कथंपूर्वत्रासिद्धत्वमत आह । सा-
क्षादिति । अन्यपरम्परावारणायाह । पदत्वादीति । आदि-

नाभत्वम्। साक्षात्प्रतिबन्धकातिदेशोदाहरणंराज्ञिश्चुत्वेपदत्व-द्वारकपरम्परयाप्रतिबन्धकस्यतुपिपठोरिति उभयरीत्याप्रापक-स्यतूदाहरणं मृग्यमऽनन्यथासिद्धम् तत्प्रतिबन्धकेति पाठः। नपदान्ताइति लण्सूत्रस्थभाष्यात्पदान्ताहलोऽजोनसन्तीति हेतोर्वृक्षवादेरनभिधानमेवेतियोजनातत्रहि भाष्येऽण्ग्रहण-सामर्थ्यात्पूर्वेणाणोप्रगृह्यस्येत्यत्राण् अन्यथाऽच इत्येववदे दि त्युक्तम्। अभिधानेत्वेषान्तदऽसङ्गतिः स्पष्टैवेति तत्रैवोद्योते स्पष्टम्। यथाश्रुतपाठस्यकौस्तुभे दूषितत्वादेवं व्याख्यायते अष्टमेकैयटस्याप्ययमेवाशयः। उक्तभाष्येति। उक्तार्थतात्पर्य-कभाष्यइत्यर्थः। उरण्॥ लक्षणयेति। तस्यतत्रताल्वादि-स्थानबोधकत्वादिति भावः। वस्तुतस्तु आवश्यकस्वरितत्व-प्रतिज्ञकस्य षष्ठीस्थानेइत्यत्रस्थानपदस्यात्रानुवृत्तिः। एवंचा-धिकं स्वरितत्वंलक्षणात्रन। तथा भाष्यंत्वेकदेश्युक्तिरिति। अत्रैवोद्योतेस्पष्टं। यद्यप्याररादिरूपेण विधानेऽभक्तत्वादिश-ङ्कैवनास्तितथाप्यणमनूद्यरपरत्वमिति पक्षमाश्रित्यभाष्येपक्ष त्रयंचिन्तितमन्तग्रहणमनुवर्त्यपूर्वान्तत्वपक्षश्च स्थापित इति कौस्तुभंकटाक्षयन्नाह। रपरइत्यवयवेति। ननु रेफशिरेत्यादि-भाष्यमनूद्यरपरत्वमिति पक्षेणातद्गुणसंविज्ञानबहुव्रीहिणा-वासुयोज्यमिति चेन्न। प्रकरणविरोधादतस्तत्त्यं कैयट-माह। स्थानइति न केवलमाकरग्रन्थविरोधएवापि तु ल-क्ष्यविरोधोपीत्याह। अतएववत्रेइति। अभ्यासस्यनैरर्थक्या-न्नात्रानुमानिकादेशस्य स्थानिवत्त्वेनाभ्यासत्वलाभोर्धविकारा-च्चनैकदेशविकृतन्यायेनापीति भावः। यदित्ववयत्ववादि-

नाप्यत्रप्रक्रियाज्ञानवतामित्युक्तरीत्यैव पुनरभ्यासत्वंवाच्य मिति ममापितद्वीत्यानोक्तदोषइत्युच्येत तदातुगौरित्यत्ररेफा न्तधातोरभावाद्दोर्घोनस्यात्। आनुमानिकादेशावसरस्तुनप्रा- साऽप्राप्तविवेकन्यायेनास्य रेफमात्रविधायकत्वेन तदऽननुमा- नादित्यत्रैवोद्योते स्पष्टम् । तथा माहिस्मतेपिपरुरित्यादाव- भ्यस्तानामादिरिनि स्वरोपिफलम् । अन्यथारेणव्यवायान्न- स्यादित्यादिभाष्योक्तमनुसन्धेयमिति दिक् । यद्यपि भाष्ये- ऽन्तपदानुवृत्त्यापूर्वान्तत्वमुक्तं नपरशब्दस्यावयववाचकत्वेन तथापिअन्तपदस्यरेफेन्वयात्सौत्रसमासकल्पनामपेक्ष्येदंलघ्वि ति भावः । अतएवपरादित्वपक्षोनाशङ्कितोऽत्रनियमानुपेति आन्तर्यांविशेषेणत्रयाणामापत्तेरिति भावः । कौस्तुभंकटाक्ष- यति। अत्रपक्षेइति । सम्भवादिति । अयंभावः। अत्रापिपक्षेप्रा- सेति न्यायेनपूर्वान्तौरलौविधीयेतेतत्रांत्तरतमपदानुवृत्यान्तर- तमौतौभवतः साधारणधर्मस्तुअवयवावयविभावतादात्म्यान्य- तरसम्बन्धेनयोलकारवान् प्रसज्यप्रसज्यकभावतादात्म्याऽन्य- तरसम्बन्धेन तत्संबन्धित्वम् । यद्वाऋस्थानिकाऽणः स्थाने- न्तरतमोरपरएवविधीयते सादृश्यन्तु प्रसज्यप्रसज्यकभावता- दात्म्याऽन्यतरसम्बन्धेन लवत्सम्बन्धित्वमिति प्रतिपत्तिगौ- रवात्तूक्तम् सम्भवेति मूर्द्धादीत्यादिनांताःनकार्यमिति॥अयं- भावः । यथान्यासेऽष्टौमात्रागुणादि संज्ञाविधौरलपरोच्चार- णेऽप्यऽष्टावेववर्धन्तइति यद्यपि समंऋतइदित्यादौ तकारेणरे- फोनुमेयइति सोऽपिसमएव तथापि आनङ्ऋतइत्यत्रनङ्योः प्रयोजनाभावान्नवक्तव्याविति लाघवमेवं लपरश्चेति वाक्यं-

वक्तव्यमितिच्च तथा योगविभागाभावात्प्रतिपत्तिगौरवाभावौ-
च्चलाघवमिति भृजामित्यादाविति । अयंभावः यथान्यासे-
विभर्तीत्यस्य हलादिशेषस्मृतिपूर्वकप्रयोगोभ्युदयोमिमिते-
जिहीत इत्यादेस्तु तदऽपूर्वकेप्यत्वन्यासेतत्रपरोच्चारणे सर्व-
त्रापि तत्पूर्वकएवतस्मिन्सस्यात् । अरपरेतुविभर्तीत्यत्वापि
तदऽपूर्वकेसस्यादिति सनाथयिष्यतेचेदं ग्रन्थकृत्सम्मतिदानेन
आदिनाङ्कत उत्सर्वत्रादृष्टव्यत्ययश्च संगृह्यतइति दिक् ।
वस्तुतस्तु शङ्कायां तत्रतत्रेति वीप्सासत्वात् तदऽनुरोधेन
भृज्रामिदित्यत्रदोष उक्तस्सच्चसर्वादेशत्वापत् तिलक्षणः
सूत्रारम्भेतु सन्निपातपरिभाषयानमातुरित्यत्वाप्ययं बोध्य-
इति । उरणोरगिति तु न सूत्रितम् । चाकर्तीत्यत्रा-
भ्यासस्यकित्वेन दीर्घोऽकितइति दीर्घानापत्तेः तत्प्रकरण-
स्थकितएवविसर्जनमिति वक्ष्यमाणंमाधवादिमतंतु नन्या-
य्यम् । मानाऽभावात् नुक्रोक्रिक्रुक् एषांसर्वेषांवर्जना-
नापत्ते र्बाध्यसामान्यचिन्तायां आवश्यकत्वात्सत्यभिधाने-
च्छायतइत्येव वस्तुतस्तु अकिद्ग्रहणस्याऽभ्या सविकार-
इति परिभाषाज्ञापकतापरभाष्यप्रामाण्येनाभ्यासनिमित्तक-
कितएवग्रहणमिति दीर्घोऽकित इत्यत्रोद्योते स्पष्टत्वादत्व-
न्यासेनदोष इति तत्प्रामाण्यात्तुहाकोहाङश्चानभिधानान्नय-
ङ्लुकावित्यप्युद्योते तत्सूत्रउक्तन्तदातुदोषइति झरोकैयटम-
तेनाह । झयेतिभाष्यसम्मतपाठ आह । वावसेति । उभयसं-
ग्रहायाह विकल्पइति । इत्यर्थकेनेति विध्यर्थतात्पर्यकेण न
तुद्वित्वेपूर्वत्रपरमसिद्धंनेत्यर्थकेनासमर्थसमासापत्तेरिति भावः ।

पूर्वद्वित्वेऽसकृज्जश्त्वमन्यथा सकृदेवेति प्रक्रियायांविशेषसत्वा-
दाह । रूपइति प्रवृतेरिति । आष्टमिकवर्णद्वित्वस्यहि:प्रयोगत्वें-
व्यक्तिभेदेनचासकृत्प्रवृतेरित्यर्थः । परिभाषात्वेति वार्तिकत्वे-
पि परिभाषायावृत्तिकृद्भिस्तत्वेनोक्तत्वादिति भाव: । एवंतुवि-
प्रतिषेधसूत्रस्यापि परिभाषात्वस्योक्तत्वात् विप्रतिषेधपदंकि-
मर्थमिति चेच्चिन्तयिष्यते यणोमयइति द्वित्वेचतुर्थमपि बो-
ध्यम् । अतएवेति । एवेनानुवृतिव्युदास इदंचानचीत्यत्रेत्य-
स्यासम्बन्धपक्षेतत्सत्वेतु ततोपितत्वं बोध्यम् । कश्चिदिति
पूरणगुणेति सूत्रे सिद्धान्तयिष्यमाणरीत्येदमेवयुक्तं नत्वत्रास्व-
रसोद्भावनम् । जनौरित्यत्रसम्भवादाह । एत्येधत्योरिति । इ-
णेवेति । इणीकारादौप्रतिषेधइति वार्त्तिकारम्भात्सानुबन्धक-
त्वेऽप्यऽस्य ग्रहणमिति भावः । ननूभयोरस्त्विति चेन्न । आ-
रम्भप्रत्याख्यानयोः फलभेदापत्तेरित्याहुः । तीत्यादाविति ।
आदिनोपधतइत्येवाशंक्यतदाशङ्कांहृदिनिधायेत्यर्थः । वि-
वेकइति । अतएवमूलेगुणस्यपरनिपात इणनिर्दिश्यमानपरि-
भाषया इष्टसिद्धेराह । अत्रेति । ऐक्यरूप्यादाह । एत्येधत्यो-
रिति सूत्रेत्युपलक्षणं वार्त्तिकस्यापि आदेःपरस्येति कुतोनस-
माहितमऽत आह । यमेवेति परस्यैवविधानेतत्प्रवृत्तिरित्यन्ये
तत्मानफलेमृग्येलक्षणसूत्रे ति मकाररहितानुकृतिरेषा ऊठि-
संप्रसारणेति तत्संज्ञकेऊठीत्यर्थः । संप्रसारणपूर्वेतिपाठेतत्प्र-
युक्तपूर्वेत्यर्थः । अनभिधानेति ननु प्रत्याख्यानभाष्यात् वा-
र्त्तिकइण्पदमुपलक्षणमित्येव कुतोने ति चेन्न । एवंसति ।
अन्यत्रास्यार्थस्यानुक्तत्वेनात्रैव वक्तव्यत्वेन तदऽनक्याभ-

मवतावार्त्ति कुरुते सस्यान्यत्वाकरणेन चोपक्रमस्यप्रावल्ये-नातूतथादुर्वचत्वात् । निवृत्तिरिति तथासावकाशत्वेविप्रति-षेधशास्त्रबाधेमानाभावश्चेत्यपि बोध्यम् । पूर्वान्तवत्तयेतिपाठ-इत्याहुः । नन् पूर्वधातुसाधनेनेति नयेऽस्यसार्थक्येननयान्त-रेऽन्तरङ्गत्वात् । रूपान्तरंस्यादत आह । पूर्वधातुरिति पररू-पोद्देश्यतावच्छेदकाक्रान्तएववृद्धिप्राप्त्यानमूलासङ्गत्यावतरणं युक्तं यथाश्रुतस्यतुलक्ष्यासिद्धान्तत्वंध्वनयन्नाह । सिद्धान्तेति । तपरकरणेति यद्यप्युपङ्कारयतीत्यलप्रकृतसूत्रे एवफलंदे-यम् । तथापि परत्रैवफलप्रदर्शनपरवृत्तिप्रामाण्येनैधत्यादि-साहचर्याच्चगणपठितस्यैव धातोरत्रग्रहणमिति भावः । भा-ष्यानुग्रहस्त्वत्रमृग्योवासुपीति पदच्छेदाऽभिप्रायेणानुकरण मिदम् । व्याख्यानादिति धातुग्रहणाभावेप्रर्षभवनमित्यत्रा-तिव्याप्तिदानपरप्रकृतसूत्रस्थभाष्यरूपादित्यर्थः । षयाहेति । लब्धमिति शेषःसमुदायादेशापत्यायथाश्रुतासङ्गन्तेराह । पूर्वे-ति । अन्त्याद्ययोरिति । अलोन्त्यस्यादेःपरस्येति परिभाषाभ्यांल-ब्धमिदम् । सिद्धान्तमतेनाह । उपसर्गेति तात्स्थ्यात्ताच्छब्द्य-मिति भावः । निर्दिश्यमानपरिभाषाप्रापकत्वेन यथाश्रुतेमू-लंसङ्गच्छते लक्ष्येचनिर्बाधेकथं लक्षणावैयधिकरण्यगर्भित-स्यास्यौचित्यमिति चिन्त्यमेतत् । अन्तादिव । एकग्रहणप्रत्या-ख्यानादाह । इहपूर्वेति । क्वचित्त्विहैकः पूर्वेतिपाठोऽन्यथा वर्णवृत्तिधर्मस्यातिदेशस्स्यात् । समुदायनिष्ठस्य च न स्यात् । स्थानिपराविति । अवयवत्वेनबोधकाविति समुदायाक्षेपकत्वा-त्तयोः समुदायश्च पूर्वपरएवान्तादोच्च तत्स्थानिभूतावेवेति

भावः । अन्यथा कृतएकादेशेऽवशिष्टपूर्वसमुदायस्ययोन्तोवर्णभिन्नःतन्निष्टसमुदायस्यातिदेशः स्यात् । तथाच परमपादस्य अःपरमपादाः तेनपरमपादाइत्यादौ विभक्त्यैकादेशात्प्रागेकादेशरहितपूर्वसमुदायान्तः पादितितद्धर्मातिदेशेपादःपदितिपद्भावः स्यात् । अचःपरेतिस्थानिवत्वंतुन पूर्वमात्रविधित्वाभावात् । निर्दिश्यमानपरिभाषातुस्थानिवद्भावइवान्तवद्भावेपि नातएवखट्टे खट्टायाः खट्टयोरित्यादौ परादिवद्भावेन आप्त्ववत्याकार आङिचापइत्यादिनैत्वसिद्धिस्तत्रस्थानिवत्वेनत्वाप्त्वन्दुर्लभम् । अनलृतिधर्मवत्वेनस्थानितावद्वृत्तिकत्वाभावात् । अतएव प्रकृतसूत्रभाष्येखट्टे त्यत्रपरादिवत्वेन हल्ङ्यादिलोपःसाधितइति भावः । तद्घटितेति । तदोभयोःपरामर्शःपरस्यचसमुदायस्येति पाठः । विनापिचमन्यत्रेवसमुच्चयोवापार्थक्याभावउपमानस्यैवाभावात्सादृश्यासङ्गतेराह । पृथगिति । कृतैकेति । एकइत्येकादेशविशिष्टपरं प्रत्यासत्तिलभ्यंवातदिति भावः । न तु तद्वर्णेति ससहायेव्यपदेशिवत्वाऽभावेनवर्णस्य समुदायत्वाभावादिति भावः । मात्रवृतयइति । इदमुपलक्षणम् तदघटितानामऽदन्तत्वादीनामपि तेन खट्वाभिरित्यादावदन्तत्वातिदेशोपिनेति बोध्यम् । मात्रपदंसफलयन्द्वितीयार्थस्यफलमाह । तेनरामेति पूर्वमान्तेति । इदंप्राचीनवासनया व्यपवर्गानपेक्षणेनान्तादिवत्वाभ्यामऽप्यऽस्यसिद्धिः ननु यत्रपूर्वःपरोवावर्णःससहायस्तत्रोक्तरीत्यातद्वृतिधर्मातिदेशोमास्तुयत्रत्वसाहायस्तत्रतद्वृत्तेरपि धर्मस्यातिदेशइष्यतएवयथाशिवेहोत्यत्राङ्त्वं खट्टे त्यत्राप्त्वञ्च एवंचायज-

इन्द्रमित्यादौ न्यायसाम्यादिक्त्वादेरप्यति देशःकुतोनेतिचे-त्तत्राह। अतएवेति। आदिवत्त्वेन। अन्तत्वेनतूक्तरीत्यात-दऽतिदेशोनप्राप्नोतीति भावः। प्रदीपकृद्रीत्यासूत्रंस्थापयति क्षीरेत्यादिनाभवत्येवेति कृतएकादेशेऽवशिष्टःपइतिपूर्वस्तच्चर-मावयवत्वातिदेशेयदागमन्यायेनोत्तरपदवत्वमेकाच्त्वं स्वाश्रि-तमित्यर्थसमाजग्रस्तंतदितितद्भावः। अनेनविशिष्टातिदेश-स्तुदुर्लभोऽल्मात्रवृतिधर्मघटितत्वादस्याप्यऽप्राप्तेरेनेत्यत्रपरा-दिवत्त्वेन विभक्तित्वंव्यपवर्गानपेक्षणेनोभयत इत्यस्याप्रवृत्ते-रेकदेशविकृतन्यायेन तुनेत्यत्रतत्वंदुर्लभम्। अक्तपरिमा-णनिष्ठत्वाद्विभक्तित्वस्येत्याहुः। एकाच्त्वंस्वाश्रितम्। उ-त्तरपदत्वमात्वन्तु प्रार्थ्यतेतत्रचानल्विधाविति निषेधोदु-र्लभः स्थानिसम्बन्धिवर्णानाश्रितत्वादितिरीत्याप्रदीपस्योद्यो-तएवदूषितत्वाद्विधेरेवा प्राप्तत्वेननिषेधपर्यंतं प्रदीपकृतोधाव-नंव्यर्थमिति चध्वनयन्खरीत्यासूत्रंसफलयति किंचेत्यादिना अन्येतु समुदायस्येतीत्यन्तस्यमध्यमणिन्यायेनोभयान्वयित्वा-न्नैतल्लभ्यमित्यत्रहेत्वंतरमाहुः। भियइत्यादाविति। आदिनो-द्योक्तक्षीरपेणेत्यस्यसंग्रहःमनोरमादेः पूर्वापरविरोधं सूचयन् तन्मतेनाह किञ्चोभेइति। असङ्गताविति सूत्रसत्वेत्वन्तादि-शब्दाभ्यां पूर्वपरशब्दाभ्यांचविरोधस्य पुरःस्फूर्तिकत्वात्तदऽस-ङ्गतिरिति भावः। ननूभयतआश्रयेनस्थानिवदित्यपूर्वमार-भ्यतेतत्राह। इष्यतएवेति। दिगितिदिगर्थइण्धातुस्थशेखरा-दवसेय उपस्थितावपीति। अत्रपक्षेपरिभाषादृष्ट्यात्रिपाद्यसिद्ध-त्वरूपप्रतिबन्धकाऽभावादिति भावः। कथमिति न च पूर्वत्र-

कर्त्तव्येपरासिद्धत्वेपितत्रकृते तदऽसिद्धत्वेमानाभावइति पंचा-
नामित्यत्रवक्ष्यमाणरीत्याजातगुणादेरसिद्धत्वमिति तयेतियु-
ज्यतएवेति वाच्यम् । नभकुर्छुरामितिकुर्ग्रहणेनपूर्वत्रेत्यस्य
विषयसप्तमीत्वबोधनेन पूर्वदृष्टापरमसिद्धमित्येवतदर्थात् ।
अन्यथा कुर्वन्तीत्यादावुदितिपरत्वसामर्थ्यादेवगुणस्येवदीर्घ-
स्यापि व्यावृत्तौ किन्तेनातएवचंचूर्यत इत्यादौ दीर्घसिद्धिः
अन्यथाचंचूर्तीत्यत्रगुणस्येव दीर्घस्यापि उत्परस्यातइति तपर-
त्वेननिवृत्तिः स्यात् । विसर्जनीयसूत्रस्थंभाष्यमपीहमानमु-
त्तरग्रन्थस्त्वरुचितयानेष्यतइति दिक् । विनिगमनाविरहेति
पूर्वत्रेत्यस्याधिकारत्वेनप्रागेवप्रवृतिः श्रुतत्वंचविनिगमकमपि
बोध्यमन्यत्रोक्तम् । इमामेवेति । एवंहीत्याद्युक्तमिति भावः ।
लक्षणत्वादितीत्युक्तमिति पाठः । अनुसरणंवेति झलित्यप-
कर्षस्याप्युपलक्षणमिदम् । दीक्षितङ्कटाक्षयति तत्संज्ञयेत्या-
दिनानन्वन्तर्भूतक्रियायोगनिमित्तकोपसर्गत्ववति प्रर्षभादौ
योऽतिप्रसङ्गस्तद्भङ्गायतदित्यत आह । यदर्थेति नन्वसतिधा-
तुग्रहण ऋकारनिरूपितोपसर्गत्वस्याप्रसिद्धत्वात्प्राद्युपलक्षकं
तत्स्यादित्यऽति प्रसङ्गएवात आह । प्रत्यासत्येति तन्निरूपि-
तस्याप्रसिद्धत्वेपि तदघटितनिरूपितग्रहणं प्रत्यासन्नमिति
भावः । कृतेपिधातुग्रहणेयदर्थेत्युक्तार्थस्यावश्यकत्वंध्वनयन्नृ-
षभंत्यजतिऋद्धइति धातुग्रहणस्याटश्चेत्युत्तरार्थतायानमाङ्-
योगेइति सूत्रेभाष्यउक्तत्वेनकथमिति दूषणाभासम्परिहरति
प्रकृतसूत्रेति सुबन्तप्रकृतिकेति तत्प्रकृतिकक्यजादिघटितइ-
त्यर्थः । सुबन्तावयवइत्येवकृतोनोक्तमत आह । शास्त्रइति

धातुप्रकृतिकत्वेनेति तत्संज्ञप्रयोजकक्यजादिप्रकृतिकत्वेनेत्यर्थः। सूत्रे सुप्पदंलाक्षणिकमिति भावः। उपार्षभपुरुषतीत्यत्रतृनित्यमेववृद्धिः ननु आतइति सूत्रे वक्ष्यमाणरीत्यासुबन्तोपश्लिष्टःसन्यङ्कारादिधातूपश्लिष्टइत्यर्थात्। सुबन्तावयवकधाताविति यर्थोन्यायसिद्धइति लक्षणैवनिर्मूलेति चेन्न। तथा सतिसुबन्तधातूभयनिरूपितोपसर्गत्वस्य उपार्गित्यादौ सम्भवेनतत्रैवस्यादिति तुल्यास्यसूत्रभाष्यासङ्गत्यातस्यैवमानत्वात्। नहिसतिसम्भवेतद्घटितनिरूपितग्रहीतुमुचितम्। उक्तार्थैलक्षणावाऽवयवेलक्षणेत्यत्रभाष्यानुग्रहः परञ्चिन्तनीयः ऋतीति सुबन्तविशेषणमित्युपर्षभीयतीत्यस्यसिद्धिरित्युक्तङ्खण्डयति ऋषभेति। ऋकारादेर्धातुत्वेनत्वदुक्तार्थासङ्गतेरित्यपि बोध्यम्। अत्रापिधाताविति। अतएवऋतिह्वस्वादुपसर्गाद्वृद्धिर्विप्रतिषेधेनेतिवार्तिकं सामान्यतःसूत्रह्रयविषयकतयाप्रवृतं धाताविंत्येतत्सामर्थ्यात्प्रत्याख्यातम्। ऋत्यकइति सूत्रेभाष्य उपार्छतीति तदुदाहरणन्तुवासुपीत्युदाहरणोपलक्षणम्। नमाङ्योगइति सूत्रस्थस्यधाताविंत्युभयोःशेषइति भाष्यस्यतूपसर्गाद्वृद्ध्योरित्यादिरर्थइति भावः। विशेषाभावेनेति। इदमऽसिद्धवत्सूत्रेषु भाष्येस्पष्टम्। नदृश्यतइति यत्तु औतोम्शसोरिति सूत्रउद्योतेकेचित्त्वत्रसूत्रेसुब्ग्रहणमनुवर्ततें वाग्रहणंनिवृत्तमिति भाष्यउक्तं तत्रनिवृत्तपदस्वारस्यापि स्वरितत्वमस्त्येव तत्फलन्त्वेङिपररूपमित्यत्रानुवर्त्यवाक्यभेदेन व्याख्यानमित्याहुरित्याद्युक्तं तदऽरुचिग्रस्तमिति स्पष्टमेव तथासत्यत्रनसम्बध्यत इत्येवन्नू-

यादुत्तरत्रावश्यकसम्बन्धस्य निवृत्त्ययोगात् निवृत्तस्यसम्बन्धायोगात् तस्मादननुवृतिरेव निवृत्तिस्तत्रभाष्यार्थइति तत्रैवोद्योतेस्पष्टं धातावित्यनुवृत्तेरिति ननु विश्वौहइत्यादौ संप्रसारणेगुणएज्लक्षणवृद्ध्यै वसिद्धावूङ्विधानंवहिरङ्गपरिभाषांज्ञायतीति वाहऊठ्सूत्रस्थभाष्यादुपसर्गादित्यस्य मण्डूकानुतावपिधातावित्यनुवृतिः किमर्थाइति चेन्न । तथा सति एङ्निरूपितोपसर्गत्वाप्रसिध्याप्राद्युपलक्षतामाभूदित्येतदर्थत्वात् । उचितंतूपसर्गादित्यनुवृतेरित्येव क्लप्त्यादोत्यादिनामर्थः । अचौं । षष्ठीतिसौत्रमेकवचनम् । गमकत्वादिति सौत्रत्वादितियावदन्त्यपदस्यावयविनं प्रतिसाकांक्षत्वेपि निर्धारणावधिम्प्रत्यनाकांक्षत्वादित्याहुः । मृतण्डादागतइति भागवतादिप्रसिद्धमपिभवरूपार्थं भगवतोऽनित्यत्वप्रसङ्गात् त्यत् त्काआगतइत्युक्तमलमर्थः परिभाषेन्दुशेखरादवसेयःशब्दज्ञानानुपातीति पञ्चप्रयत्ने नावश्यंनिरोद्धव्यप्रमाणविपर्ययविकल्पनिद्रास्मृतिरूपपञ्चवृतीनांमध्येविकल्पलक्षणमिदम् शब्दश्चज्ञानंचशब्दज्ञाने तेऽनुपातिनीजनकेयस्य सः श्रोतुःश्रूयमाणशब्दहेतुकः प्रयोक्तुःपदार्थोपस्थितिहेतुकोबाधनिश्चयेपि कलहादौशशशृङ्गादिप्रयोगाउत्प्रेक्षादौच सर्वानुभवसिद्धश्चवस्तुशून्योबाधितविषयः प्रत्ययोविकल्पाख्यावृत्तिरित्यर्थः । शब्दज्ञानेत्यादयुक्तेरित्यन्तस्य मध्यमणिन्यायेनोपयोगाऽभावेतादृशज्ञानसत्तायांच हेतुत्वेचान्वयोऽलव्याकरणेयत इति । शेषोवाइत्याहुः । सिंहावलोकितन्यायेनविशेषंवक्तुमाह । पतञ्जलिरितीति पतितइति। एतेनपतन्नञ्जलेरिति विगृह्यनूरङ्गा-

करः कटाक्षितोलडर्थस्यबाधात्। तल्लोपइति। इदमुपक्षणंजश्त्वाभावस्याप्येवञ्चात्रगणेऽस्यपाठोऽनार्षइति भावः। यद्वेतशब्दस्यलोप इत्यत्राकारउच्चारणार्थ एवंचेद् भागस्यलोपेऽकारस्यत्वनेनपररूपेतस्यस्थानित्वान्नजश्त्वम्। अन्यथापाठोऽनार्षइति साक्षादेववदेत्। समासार्थंमयूरव्यंसकादित्वस्यावश्यकत्वेनपृषोदरादित्वकल्पनंकिमभिप्रेत्येतितुचिन्त्यम्। अन्येतुमयूरव्यंसकादित्वात्समासेऽलपाठादितशब्दस्य पररूपेऽर्द्धाधिकविकारेणपदत्वाभावात्। जश्त्वाभावेसिद्धमिदम्। नह्यवटेरित्युपातमस्तीत्याहुः। केचित्तुमयूरव्यंसकादित्वादेवतितशब्दस्यतमादेशमाहुः। ओत्वोष्ठ। ओष्ठस्यपरनिपातःप्रकरणानित्यत्यात्। समासग्रहणवैयर्थ्यंपरिहरति। अत्रसमेति वस्तुतस्तु तदुपस्थानेपि नतद्वैयर्थ्यङ्कालओष्ठीयितुंशक्तस्य ओष्ठीयितुमित्यादावुपपदेनक्यजन्तप्रकृतिकतुमनन्तस्यैकार्थीभावसत्वेन तत्रातिप्रसङ्गवारणेन तत्सार्थक्यात्। तदऽयंभावः। अत्रतदुपस्थानेयत्रावर्णस्य ओष्ठादिनासामर्थ्यङ्कम्भकारोष्ठ औपगवोष्ठइत्यादौ तत्रैव समासःस्यान्नतु दन्त्योष्ठादौपदादेरकारस्यानर्थकत्वेन सामर्थ्याभावादिति समासविधावव्याप्त्यासर्वस्यद्वइत्यादावतिव्याप्त्याह। सुबन्तत्वेनचेति। इदंचाभ्युपेत्यवस्तुतःपदविधित्वं वस्तुतस्तदेवनेत्याह। ओत्वोष्ठादीति मात्रशब्दःकात्स्नेभ्यामादौ तत्वेपिजसादिषु तदऽभावादिति भावः। अत्रचाभावेपि हेत्वन्तरतयैवव्याख्यानं सम्यक् वृहतितद्दर्शनात्। स्पष्टैवेति एवंचप्रयोगानुरोधात्। व्याप्तिन्यायाश्रयणमिति भावः। अन्यत्रप्रतिपदेति। अत्रयद्वक्तव्यंपरि-

भाषेन्दुशेखरविवृतिसंग्रहेतदुक्तं वक्ष्यतेचाग्रे पि। अव्यक्तानु। अविद्यमानेत्याद्विबहुव्रीहिपूर्वपदःकर्मधारयः। इत्याहेति। इत्याशयेनाहेत्यर्थः। अतइतिकिमिति। इदंचिन्त्यम्। तदऽभावेविशिष्टानुकरणस्यादेशः प्राप्नोतीति प्रश्नस्यनिरालम्बनत्वात् इष्टस्यैवासिद्धेः मूलेपटितीति।अत्रैकदेशविकृतन्यायेनपदत्वाज् जश्त्वंनाचःपरेति स्थानिवत्वादज्झलस्थानिकत्वेपि अजमात्रस्थानिकत्वात् कृष्णर्द्धिरित्यादा ऋवर्णस्थानिकत्ववन् नपदान्तेतिनिषेधस्तुपरपदमात्रस्थाजादेशएव अतएवघटानयनमित्यादौ जश्त्वादिनेत्याहुः। नाम्ने। अतइति चैतिच्चेनेताविति सूत्रमनुवर्त्ततइति तुवक्तव्यम्। फलकल्पनेति नाम्ने डितेत्यंशस्यान्वाचयशिष्टत्वज्ञापन द्वारावटक्वटकइतीत्यादौ परूपमन्त्यस्यभवतीति फलकल्पनाभिनिवेशइत्यर्थः। तस्यप। सिद्धेरिति पूर्वोभ्यासइत्यत्रेवेति भावः। अन्योत्पेक्षितं फलमन्यथासाधयति अन्यदिति। तस्यसंज्ञायां शूद्रमविभइत्यादौ आम्ने डितंभर्त्सनइति प्लुतापत्तिरित्याहुः। तस्यग्रहणाभावेक्षिप्रक्षुद्राणांपरमित्यादिनिर्देशादवयववाचियोगेषष्ठीति बोध्यम्। जलाञ्ज। निवृत्यर्थमिति स्वधोर्ग्रहणंतत्सम्बन्धेपीतरव्यावर्त्तकमिति निवृतिबोधनेसमर्थनम्। अतएव दधस्तथो श्चेतिसूत्रेभाष्येझलीत्यनुवर्त्यतथोश्चेति प्रत्याख्यातम्। झलीतिमण्डूकप्लुत्यानुवर्तत इति तत्सूत्रीयोद्योतस्तुपक्षान्तरपरः तत्सामर्थ्यात् तन्निवृत्तमिति वक्ष्यमाणमूलन्तुसूत्रमतइति बोध्यम्। तदनुवृतिस्तुकिन् प्रत्ययस्यकुरित्यादावनिष्टार्थैवस्यादिति भावः। नन्वेवंकिन्प्रत्ययस्यकुरन्तइति न्यस्यतांप्रकृ-

तेचझलीत्यस्यसम्बन्धोस्तु एवंचझशिविधायकंमास्तु खरि-तुचत्वेननविशेषः। हेपरेपदान्तोझलत्वसम्भव्यभ्यासेचचेत्यादिचतुः सूत्रोत्विहैव पाठात्तत्र वावाजश्पदं झलामितिचनकर्त्तव्यमिति चेन्न। तथासतिसुध्युपास्य इत्यादौ द्वित्वस्यासिद्धत्वेझलोझल्परत्वाभावेन जश्त्वानापत्तेः षट्स्वित्यत्रेवशुष्कइत्यत्रजश्त्वापतेश्च खरिचत्वस्यझलिजश्त्वापवादत्वेतुपक्षादौ दोषोवोध्यः। ननु झषस्तथोरिति सूत्रे भाष्येऽतृत्यान्तइति योगविभागमाश्रित्यततृत्यमधइति प्रत्याख्यातंतत्कथंतस्य झलोति निवर्त्ततेसामर्थ्यमिति चेन्न। तदभावेपिजश्झलामितियोगविभागेन तत्प्रत्याख्यानसम्भवादिति दिक्। अकःस। अदवादेतिबाधकसाम् यान्निषेधेऽप्यपवादव्यवहारः। अइउण्सूत्रेतिऋलक्सूत्रानन्तरम् पठतोरलाकरस्याशयश्चिन्त्यइति भावः। नपरत्वमिति। अनयोरयोगवाहत्वमङ्गीकुर्वतःकौस्तुभकृतोमतेतुरपरत्वापत्तिस्तेषामिकारात्प्राक्पाठादिति भावः। विवृतत्वसाम्येन रेफवत्तासाम्येन चेत्यन्यतरोक्तावोषत्स्पृष्टऋकारोपि स्यादिति भावः। प्रत्याख्यातमिति द्विमात्रत्वाभावेदोर्घसंज्ञाभावात्तदसङ्गतमेव स्यादिति भावः। व्यवस्थासिध्यतोति ननु लकारवृतिपूर्वोक्तरीत्याविवृतत्वरेफवत्वसाम्याद्विवृत्तऋकारईषत्स्पृष्टलकारवत्वसाम्यात्स्यात्। ईषत्स्पृष्टऋकारस्तु रेफवत्वसाम्यात्प्राप्नोतिनान्तरतमइति कथं सङ्करप्राप्तिरिति चेन्न एकरेफवत्वेह्युक्तरीत्यारेफवतिलकारवति चास्याप्राप्त्याक्षरसमाम्नायेपाठसामर्थ्येन भवन्नव्यवस्थयास्यादित्याशयात्। द्विरेफत्वेतुसामर्थ्यविरहेणनसङ्करइति भावः।

यद्वास्थानेऽन्तरमङ्गति सप्तम्यन्तपाठेद्विरेफवत्त्वाभावेसङ्करःप्राप्नोति यथाहोतृलकार इत्यत्रेकरेफवत्त्वाद्धोतृऋकार इत्यत्रलकाराभावत्त्वादन्यतरगुणकृतान्तर्थमादायोभयत्रापीषत्स्पृष्टप्रवृत्तेरिति । अभितइतोति । अभितइत्यस्ययद्यप्युभयतइत्यर्थस्तथापीहसर्वतइत्यर्थो बोध्योऽतएवभक्ते रित्येकवचनं सङ्गच्छते सामर्थ्यैरिति । इदंचिन्त्यम् द्वन्द्वइति शब्दद्वयप्रवेशः कथमिति शङ्कासमाधानयोरकरणेनेत्यर्थकैकदेशेषष्ठ्यन्तद्वयार्थस्यान्वयमभिप्रैति नन्वेवमादितस्तद्भागोस्तुपरतस्तुतत्सत्वेकिंमानमत आह । यत्तदिति रेफात्भक्ते रित्येतेसमानाधिकरणपञ्चम्यौरेफरूपभागात्परं यत्तेनव्यवधानादित्यर्थः । हयवरट्सूत्रस्थेत्यपपाठएओङ्सूत्रस्थत्वादस्य । भाष्येणचेति चेनकुलङ्कर्तृरमत इत्यत्ररोरीत्यस्य लकारइत्यत्रयणोमयइत्यस्यच शङ्कासमाधानाकरणस्यसंग्रह आरम्भप्रत्याख्यानयोरफलभेदंभञ्जयत्यत्रेत्यादिनाऽनयोरित्यर्थः । ऋतीति तपरकरणेति । इदञ्चन्यायसिद्धमपिभङ्गान्तरेणोक्तम् । लृतोति । अन्यथाऋतिऋलवेत्येवब्रूयादिति भावः । पूर्वस्यह्रस्वत्वेमानमाह । तुल्यास्येति वार्तिकस्यतद्द्वयस्याच्त्वंवक्ष्यामीति तृतीयस्यचेत्यर्थः । वैयर्थ्यापतेरिति । इदञ्चवाशब्दश्चार्थइतिमतेस्पष्टश्चतस्यतदर्थकत्वन्तुल्यास्यसूत्रस्थभाष्यप्रदीपोद्योतेषु विकल्पार्थत्वेतुदीर्घेत्यनुवृत्त्यैवसिद्धौविधेयनिर्देशस्यवैयर्थ्यंबोध्यम् । एतेनविवृतत्वेपिनित्येप्राप्ते विकल्यार्थंवचनन्तेन पक्षेयणादेशफलमिति परास्तम् । एङःपदां । भवतीति ननु भवतेरिति निर्देशोपष्टम्भेनापदान्तात् ङसिङसोरेवेति

नियमात्सिद्धमिदमिति चेन्नानुबन्धादौ चेत्तयोरेवेति नियमऔपगवासिद्धेः वर्णकातान्तवेनुगवमायामइत्यादिनिर्देशाश्रयणेपि शस्भिन्नेचेत्तयोरेवेति नियमापत्त्येरेशब्दस्यशसिइरयइत्यस्यासिद्धिरेवेति भावः। प्रतिपत्तिगौरवन्तुस्पष्टमेवोत्तरार्थमस्यावश्यकत्वादन्तग्रहणं स्पष्टार्थमेङन्तात्पदादित्यर्थेप्यलोन्त्यपरिभाषयासिद्धेः सर्वत्रेत्यादावपि प्रत्याससत्यासिद्धेः।अवङ्स्फो। अयन्मपरायणंप्रतिपाद्यमिति यावत्कस्तस्येत्यर्थइति पाठः । स्फोटायनोवङ्स्मर्तेति विभाषापदानुवृतेस्तस्योभयस्मारकत्वाच्चिन्त्यमेतदतएवप्लुतप्रगृह्या ति सूत्रेनित्यग्रहणङ्किमर्थं विभाषामाभूत् पूर्वस्मिन्ने वयोगेविभाषाग्रहणंनिवृत्तमिति भाष्येपूर्वस्मिन्योग इत्येकवचनंसङ्गच्छते निवृत्तपदस्वारस्यञ्च तत्रकैयटोपि पूर्वस्मिन्नितीन्द्रे चेत्यत्रेत्यर्थइति व्याख्यत् तत्रोद्योतेप्यारम्भसामर्थ्यादितिभाव इत्युक्तम् । अतएवसामर्थ्यान्नित्यमित्युत्तरग्रन्थसङ्गतिः । स्फोटायनग्रहणस्य पूजार्थत्वेहितत्सङ्गच्छते ऽन्यथामतान्तरेतस्मिन् तत्सिद्धयेतस्यावश्यकत्वात्तदऽसङ्गतिः स्पष्टैवभाष्यादाविति यद्यपि कण्ठरवेणभगवतानैवमुक्तन्तथापि पूर्वस्मिन्नेवनिवृतमिति निर्हेतुकं वदन्नुक्तं हेतुप्रसिद्धत्वादभिप्रैतीति भावः । उक्तभाष्यस्ययोगविभागसामर्थ्यान्नित्यमित्यभिप्रायकत्वेनापि सुयोजत्वादुक्तमादाविति। तेन वृत्त्यादिपरिग्रहोऽतएवगवोद्घादयःप्रयोगाभाष्येसङ्गच्छन्तइति दिक्। अनित्यत्वादिति। अनेनयथासंनिपातपरिभाषाशेषस्थपरिभाषेन्दुशेखरविरोधोनतथातत्रैव तद्विवृत्तिसंग्रहेस्पष्टम् । देवला-

तेत्यादिनुदविदेतिनत्वं संज्ञायांन देवेत्युपलक्षणंभवत्रातादेः क्रियाशब्देवाऽचिविभाषेतिलत्वं प्राण्यङ्गे नित्यंविषेनैवक्रियाशब्देवाविभाषाग्रहइति लोजलचरेनित्यंसूर्यादौन क्रियाशब्देवा लक्षणहेत्वोरिति शत्रादिविधिर्हन्तीति पलायतइत्यादाविति शब्दप्रयोगें तेनत्वादयोमिथएकस्मिन्विषयेनविकल्पन्तेकिन्तुविषयभेदेनेत्यर्थः । एवंवातायनेनित्यमऽवङ्प्राण्यङ्गे न गवाङ्गमित्यत्रवा। शाच्छोरितोत्वंव्रतविषयेनित्यं संशितोब्राह्मणोन्यत्रवेति बोध्यमित्याहुः । नेदंपरिगणनन्तेन भाष्योक्तान्यसंग्रहइत्याह। अग्नीदिति एतदिति। अग्नीदितिप्लुतइत्यर्थः। घटितमिति। उक्तोदाहरणेनातिप्रसङ्गायओश्रावयाश्रावयोःपरस्परेरिति न्यासान्तरेकृतेऽन्यसंग्रहायबहुलमन्यत्रापीतिन्यासान्तरमित्यर्थः । विभाषेतितदग्रिमविभाषापृष्टेतिसूत्रीयेत्यर्थः । ध्वनितमिति। अन्यथाबहुलग्रहणेसत्वओश्रावयाश्रावयाभ्यामन्यत्रबहुलंप्लुतस्तत्रापितत एवनादेर्नपरस्यापित्वन्त्यस्यनित्ययोगविभागेतुनैवं व्यवस्थेति प्रत्याख्यानासङ्गत्तिरिति भावः । इतिचव्यवस्थितेति तेनण्वुलादौनित्यम् । वलादौवाघञपोर्नेति भावः । इन्द्रे चेतिव्यर्थमिति । इतोपिग्रन्थस्वरसात्स्फोटायनग्रहणस्यपूजार्थतैवलभ्यते। अप्रामाणिकमिति यंयंविषयमुपादायययस्यस्यव्यवस्थितविभाषात्वमुक्तन्तदितरविषयकस्यतस्यतस्यतत्वमप्रामाणिकमिति भावः । परत्वासम्भवेनेति विभक्त्याव्यवधानादिति भावः । अनुकरणेत्वभिव्यक्तेति न्यायादिति भावः । यत्तदेतेभ्यइत्यादौवतुवदनुकरणस्यप्रकृतिवद्भावेसम्भवोऽस्त्येवेति समासापेक्षेति तेन-

च तत्र दाक्षेपः सिद्धान्तेत्वजनुवृत्तिसामर्थ्येननतदाक्षेप इति भावः । इदञ्च व्यरीत्यामनोनारोहति तथापि भाष्योक्तमित्येतावतोपन्यस्तमिति दिक् । अन्येत्विदमुपेक्षणीयं पुरोधेनोक्तं स्वमतेतूत्तरपदेत्यस्याध्याहारस्तत्फलंचत्रिपदद्वन्द्वबह्वोह्योर्गविन्द्रदेवदत्तागविन्द्रप्रिय इत्यादावप्रवृत्तिरतएवप्रकृतसूत्र इन्द्रादाविति वक्तव्यमित्युक्तन्तस्यचायं भावस्त्रिपदेऽतिव्याप्तिवारणायाजादाविन्द्रशब्द उत्तरपदइत्यर्थेगवेन्द्रयज्ञेऽव्याप्तिरत इदं वक्तव्यन्तदर्थस्त्विन्द्रस्यादियोऽच्तदादावुत्तरपदइति नाव्याप्तिरितीन्द्रशब्देयोऽच्तदादावुत्तरपद इत्यर्थमाश्रित्यतत्प्रत्याख्यानमित्याहुः । प्लुतप्र । वैपरीत्येनाह । प्रगृह्यत्वेति वैयर्थ्यमिति । पूर्वसूत्रेनित्यग्रहणं पठन्हिरुत्तरसूत्रेऽपठनादिदञ्चिन्त्यम् । इहभाष्येपठितमितिप्रामाणिकमिति वाशयः । अनुवर्तमानेति जानुउरुजतीत्यादौ पूर्वेणसन्धिवारणायेति भावः । तेनजानूइति । नच्चेण्डिशीनामित्युक्तरीत्यासिद्धमेवेदमिति वाच्यम् उअस्येत्यनयोःपूर्वसम्बन्धेपश्चाज् जानूपदसम्बन्धेप्रकृतिभावस्यैवान्तरङ्गत्वात् । वाग्रहणेति विभाषाग्रहणेत्यर्थः । वाधकेति परत्वादिति भावः । यद्यपि नेतिवाच्येप्रकृत्येत्युक्त्यापूर्वेषां सर्वेषामिवपरस्यापि ह्रस्वस्याभावः । नान्तःपादेतिपाठेपि बाध्यसामान्यचिन्तयासिद्धोऽन्यथाऽनन्तरसन्धिकार्यस्यैव निवृत्तिःस्यान्नतुसर्वेषां तथापि ऋत्यकइत्यत्रापि बाध्यसामान्यचिन्तावश्यकत्वेनहरोऋच्छत इत्यत्रापवादविप्रतिषेधाद्ह्रस्वःस्यात् तदर्थंनित्यग्रहणमिकोऽसवर्णेइत्यत्रतुनबाध्यसामान्यचिन्तावश्यक-

त्वंतद्विषयेयणएवप्राप्तेरिति बोध्यम्। प्रथमयेति तदन्तेनेत्यर्थः। सर्वत्रेत्यादौ सप्तम्यन्ततयाविपरिणतत्वेनदिवउदित्यत्रापि तथैवोपेक्ष्यमाणत्वेन चेहैवविपरिणामः किमर्थइति चिन्त्यम्। अथवेकःपदान्तस्यप्रकृत्यावस्थानमित्यर्थेसर्वत्रषष्ठ्यैव विपरिणामोऽस्तु प्रकृतसूत्रेतिलुटिचेतिसूत्रस्थचकारप्रत्याख्यानपरम् भाष्यन्तुविधेयांतरासम्बन्धचकारविषयकमिति बोध्यम्। एतेनेति। भाष्यविरुद्धकल्पनापेक्षयासामर्थ्यसिद्धार्थानुवादकत्वस्य चकारउचितत्वेनेत्यर्थः। वार्तिकमित्येकवचनेनभाष्यएकवचनमिति सूचितं। अपास्तमिति पदान्तादित्यनुवृत्तिर्बहुच्छकेत्यत्रबहुच्यतिप्रसङ्गभङ्गायावश्यकीति भावः। व्याख्यानादिति। तद्वदस्याभावेमानाभावादित्यर्थः। प्रकरणेति प्रतिज्ञयातात्पर्यबोधनात्। ह्रयमिति। तावतएवसत्वादिति भावः। वाक्यस्यटेरितीति पाठः। अनन्त्यस्यापीति। एकवचनन्तु प्रत्यभ्युद्यमानस्य ह्रूयमानस्यैवप्लुतः प्राप्नोतीत्यभिप्रेत्यसूत्रद्वयेन यत्तुभाष्येवाक्येयावन्तिपदानितेषांप्लुतः प्राप्नोतीत्युक्तंतत्त्वेतद्ह्रयातिरिक्तविषयकमिति भावः। अचोविशेषणेति तदऽनुपस्थितिस्तुनटेर्विशिष्टस्यप्लुतापत्तेः। नित्यादाविति पाठः। प्रगृह्यस्येतिसूत्रेणेति पाठः। सप्तम्यन्तपाठेवृत्तिकृतेतिशेषः। प्रत्यभिवादेतस्यैचइति प्रत्यभिवादविषयवाक्यावयवस्यैचइत्यर्थः। ननु तत्प्रयोगेकथंनामान्तंवाक्यमत आह। अवयवत्वेति। एवञ्चशर्मान्तशब्देन्तशब्दश्चरमावयववाचीतद्गुणश्च बहुव्रीहिरिति भावः। नन्वेवमन्यतरप्रयोगस्यलाभेपि तस्यतदन्तत्वलाभःकथमत आह। तत्राधीति स्पष्टञ्चेद-

मत्रैवभाष्ये स्वरूपास्वरूपग्रहणकृतविशेषायव्याचष्टे भोशब्देतिप्लुतोवेति पाठः। दूराद्बोधनस्योपेति। तन्मात्रस्येत्यर्थः। नियतस्योपलक्षणं नत्वनियतस्येत्याशयेनाह। आगच्छतुइति कडारसूत्रेतिरेफान्तमनुकृत्यागन्तु नाकारेणनिर्देशोबोध्यःअसत्यपीति। अतएवातोरोरिति सूत्रेसुस्रोता अलत्वमसीत्युदाहृतं भाष्येतत्रदूरत्वस्याविवक्षायावक्ष्यमाणत्वेन ननु किमर्थंयोगविभागेन विधानंनगुरोरनृतइत्येव सिद्धमिति चेन्न। भोशिवभवइत्यादौ गुरोरभावेननपुंसकेकर्तृ हर्तृ इत्यादौ ऋकारसत्वेनभोअराओइत्यादौ अनन्त्याभावेनाद्यांशस्याप्राप्त्यादेरित्यंशस्यापि संनियोगशिष्टन्यायेनाप्रवृतेस्तत्रदूरत्वस्याविवक्षायावक्ष्यमाणत्वेनेहतुतद्विवक्षणेन विभागावश्यकत्वाच्च। हैहेसंबोधनदर्शनेनेति नामग्रहणनिषेधस्थलइति भावः। गुरोरनृतइत्येवेति। उक्तरीत्यातस्यानन्त्याभावेनाप्राप्तेरिदंचिन्त्यम्। अतएव पूर्वेणहूयमानार्थस्य विधानेनाप्राप्त्यावचनमिति कैयटउद्योतकारोपिदूराद्भूतेचेति सूत्रान्तरेणसिद्धेकिमर्थमित्यतआहेत्यवतारितवान् हैहेन्तइति बहुव्रीहिस्तत्पुरुषत्वेतुतयोरन्तत्वेसतीत्यर्थः। अत्रेदं बोध्यम् हैहयोर्हूयमानार्थकत्वेहैहयोरिति न्यासेवाक्यावयवयोस्तयोष्टेरच ऽप्लुतइत्यर्थेहेरामेत्यादौ विध्यर्थंस्यात्। तदन्तवाक्येतु पूर्वेणसिद्धएवसः तदादौवाक्येहैहेटिवाक्यटिप्लुतयोः समावेशःपरंदोषः हैहेन्तवाक्यावयवहूयमानार्थपदटेः प्लुतइत्यर्थेरामहइत्यादावनिष्टोनन्त्यपदटिप्लुतः सूत्रस्यफलं स्यात्। आदिभूतयोस्तयोरिष्टःप्लुतोनसिध्येदनन्त्यपदटि अन्त्यहैहेटिप्लुतयोरनिष्टःसमावेशश्च स्यात्। अन्त-

योर्हैहयोःपरमिष्टःप्लुतःपूर्वेणसिध्यतिप्रयोगेहैहयोरिति न्या-
सेत्वारम्भादेवानन्त्यग्रहेसिद्धेऽन्त्यानन्त्ययोः प्लुतार्थङ्क्रियमा-
णात्प्रयोगग्रहणान्नियमार्थत्वंसंपद्यतइति सर्वेष्टसिद्धिः प्रथमे-
पक्षेप्रत्यासत्त्याद्वितीयार्थत्वमभिमत आद्यार्थवारणायहैहेन्तइ-
त्येववदेत् । हैहेप्रयोगे इत्युक्तेत्वन्त्यानन्त्यसाधारणेप्रयोगेहू-
यमानार्थवाक्यपदस्यटेःप्लुतइत्यर्थादिष्टेसिद्धेपिसमावेशःस्या-
दिति यथान्यासमेवरमणीयम् । प्रयोगेहैहयोरिति तुसुवचम्
कालाध्वनोरत्यन्तसंयोगइति वत्प्रत्यासत्त्यासर्वेष्टसिद्धिरन्त्य-
योरेवेतोदश्चिन्त्यम् । हैहेन्तइत्येवसिद्धेप्रयोगग्रहणेनोभया-
र्थत्वसिद्धेः । अनर्थकयोरपीति । अयंभावः । एकंहैहेग्रह-
णंनामग्रहणनिषेधविषये एहिहइत्यादौ हूयमानार्थकत्वा-
भावादऽप्राप्ते विध्यर्थम् । अपरंचहैरामेत्यादौ वाक्यादित्वाद-
ऽप्राप्ते विध्यर्थम् । अर्थवत्परिभाषाबाधेचनमानमतःप्रयोगेति
तस्यानर्थकत्वंचशस्त्रोशब्देस्त्रीशब्दस्येवततोऽर्थबुबोधयिषाविर-
हात् । एतेनद्योतितत्वेनद्योत्याभावादित्यसङ्गतंद्योत्यभेदाभा-
वेपि द्योतकसमुच्चयस्य बहुशोदृष्टत्वादित्यपास्तम् । बुबोधयि-
षाविरहप्रतिपादनेस्योपयोगादनर्थकस्यापि पदत्वंतु निपात-
स्यानर्थकस्येत्यनेनास्त्येवेति बोध्यम् । वाक्यपदन्तुटेरेवविशे-
षणंनानर्थस्तदवयवत्वोपयोगः क्वचित्तुतन्मध्यपतितेति तत्व-
मस्त्येव पदत्वाभावादिति।आभिमुख्यरूपसम्बोधनद्योतकत्वे-
पि तत्वाभावः । नामगोत्रयोरेव तद्वृत्तित्वादतएवतच्च-
रुढमिति प्रागुक्तविरोधेन आहुरिति । उक्तान्यस्वरसवोजानि ।
समावेशंसमर्थयन्ने वकारसमर्थनं खण्डयति । यत्विति यत्तु-

गुरोरनृतइत्यस्यभिन्नपदत्वेपि प्रवृतिरिति तन्न । अनुदात्तमित्यनेनसिद्धएकैकग्रहणङ्किमर्थमिति भाष्यविरोधात् । गुरोरनृ । अविवक्षितमिति । इदञ्चनभाष्यसम्मतमंतएवप्रकृतसूत्रेभाष्येलघोरन्त्यस्यप्लुतप्रसङ्गोदूराद्धूतेचेति विशिष्योक्तम् । सूत्रशेषस्थएकैकग्रहणमनुदात्तं प्रश्नान्ताभिपूजितयोरिति विहितप्लुतसमावेशाभावार्थमिति भाष्यस्यत्वेतद्विहितप्लुतमनुद्यानुदात्तत्वरुपगुणमात्रन्तेनविधीयत इत्याशयस्तदेतद्दक्ष्यतिवृत्तौ स्पष्टमिति भोराजन्येति । अयोगविभागाभिप्रायेणविकल्पसाम्याद्विशिष्योक्तिरित्याहुः । एतत्त्रयेति प्रत्यभिदे दूराद्धूतेहैहेप्रएतत्त्रयेत्यर्थः । इदंकेचित्तुमते पूर्वमतेतुभोराजन्येतित्रित्वं बोध्यम् । वृत्तावितितत्राद्योक्ते प्रत्यभिवादेप्लुतोविहितस्तस्यैवायं स्थानिविशेषउच्यत इत्यन्त्येचानुदात्तमित्यादिनालाघवादनुदात्तत्वादि गुणविधानेनप्लुतः सचदूरादधूतइत्यादिभिरेवेत्युक्तम् । अन्त्यलघुमतीति । असुब्वतइति वत्साधुवाक्यइति शेषः । चेत्यादीनामिति । आदिःप्रकारेवहुवचनं स्पष्टार्थं नप्रवर्ततइति । स्वरितत्वादित्यादितत्रैवशेखरेक्षोदिष्यते । प्रवृत्तावप्युदात्तानुदात्तप्लुतसमावेशाभावायतदित्यपि बोध्यम् । परस्यचेतोति पाठः । वक्तव्यमिति । अग्नीदित्यस्यस्थानइति भावः । सङ्गच्छतइति । अन्यथाप्रत्याख्यानपक्षेतस्यदुर्वारत्वेन फलभेदापत्त्यासङ्गतिःस्यादिति भावः । ननु गुरोश्चानृतएकैकस्यप्राचामित्येवास्त्वनृतोगुरोश्चादेःप्लुत इत्यर्थादिति चेन्नागुरुसमुच्चायकतापि स्यादिति वकारस्यापत्तेर्नचैवं गुरुग्रहणंव्यर्थमिति वाच्यम् । गुर्वभा-

ववत्पदव्यवहारितार्थत्वात् सिद्धान्तइवव्याख्यावलम्बने-
तुनकश्चिदोषः। अप्लुतव। अप्लुतस्याविधानेनेति पर्युदासा-
द्ध्रस्वस्यदीर्घस्यचेत्यर्थः। नचान्तरतम्यादीर्घएवस्यादितिवाच्य-
म्। दीर्घइत्येववाच्यएवमुक्त्यांतरतमपरिभाषावाधादिदंचाप्लु-
तएवविधोयेतेति पाठानुपलंभमालंव्य नोपस्थितइतीति।
तद्विधावनुपस्थितइत्युक्तेतुपर्युदासादवसानेनस्यात् प्लुतइति
भावः। नन्विहप्रकरणेपाठेसर्वस्यापि निषेधःत्रिपाद्यान्तथा-
न्यासेत्वन्यतमस्यस्यात्। यदितुवाक्यस्यटेरित्यनेन सहा-
स्याप्यधिकारत्वं क्रियेततदासोमसुइदिति देइवदत्तेत्यनु-
व्रूहीतीत्यादावपि प्लुतोनस्यात्तत्तद्विधायकैरपि सम्बन्धादिह-
पाठेतुननिषिध्यत उपस्थितस्यव्यवहितत्वादिति चेन्न। इह-
न्यासेपि बाध्यविशेषचिन्तायावक्तुंशक्यत्वात्। यद्वा त्रिपा-
द्यामेव वाक्यस्यटेरित्यतः प्राक्नोपस्थितेप्लुतइति निषेधवि-
धिरस्ततोवाक्यस्यटेःप्लुतइत्यनुवर्तते। एवञ्चानारभ्यविधि-
मधीतस्यास्यसर्वप्रतिषेधकत्वमिदप्रतिषेधस्येवेत्याशयात्। वदे-
दिति मन्मतेतु अतिइति अग्निइति इतिप्रयोगद्वयमादेशपक्षे-
निषेधेतु दोर्घघटितएवेति फलभेदात्तथानोक्तम्। नचादेशे-
ऽल्विधित्वेन प्रगृह्यत्वानतिदेशेनसन्धिकार्यप्रवृत्तौ अग्नीतीती-
त्येकमेव स्यादिति वाच्यम्। एवमपि पञ्चमीसमासेनस्था-
निवत्वात्। आदेशस्यवहिरङ्गासिद्धतयाप्रकृतिभावप्रवृत्तेर्नि-
ष्प्रत्यूहत्वादिति भावः। नन्वेवंसिद्धान्तेपीन्द्रे चेकोसव-
र्ऋत्यक आङोनुप्रगृह्या अचिप्लुताश्चाक्रवर्मणस्यनोपस्थितेदि-
वउदिति न्यासःकुतोनकृत एवं हिशाकलविषयेपरत्वादेवप्र-

कृति भावःसिद्धइति नित्यंग्रहणंन कर्त्तव्यमित्यपरलाघवमिति चेन्न। तथासतिनिषेधानांबलीयस्त्वेन प्रगृह्यत्वप्रयुक्तप्रकृतिभावस्याप्युपस्थितेर्निषेधापत्तेः स्पष्टंचेदं तसिलादीत्यत्रशेखरेनचादेशविधानेप्रगृह्यप्रयुक्तप्रकृतिभावेनादेशनिवृत्तौ भाष्योक्तदूषणानवतारो निषेधस्यतु प्रकृतिभावाप्रतिबध्यत्वेन प्लुतश्रवणं नस्यादिति तदऽवतारइति वाच्यंवक्ष्यमाणरीत्यादेशस्यबहिरङ्गत्वेनासिद्धतयाप्रकृतिभावानिर्ल्यत्वात्। प्रकृतिभावेनस्वरूपसद्दिकारनिवृतिरिति तुवक्तुमप्यशक्यंनिपातएकाजितिसूत्रेहलन्तस्य प्रगृह्यत्वेनैवदोषइति भाष्योक्तिविरोधात् त्वद्रीत्यापुरोस्तीत्यादौ रुत्वाप्रवृत्त्यापत्तौदोषसत्वात् रुत्वस्याज्निमित्तत्वाभावेन प्रकृतिभावाप्रतिवध्यत्वेतु पूर्वत्रासिद्धमित्यस्यबाधेमानाभावादिति बोध्यम्। नचैवमप्यत्वस्याज्निमित्तत्वेनप्रतिबन्धापत्ती रुत्वस्यासिद्धत्वेनसानेति प्रदीपोद्योतयोरुक्तंतुनसम्यक्। असिद्धत्वेपिसान्तबुद्ध्याप्रवर्तमानौ संज्ञाप्रकृतिभावौरान्तएवप्राप्तौ तत्रचरान्तबुद्ध्याप्रवृत्तंमुत्वंपश्यतौ तत्प्रतिबध्नीयातामेव तन्निमितरोरदर्शनेपि तत्प्रवृतिदर्शनेप्रतिबन्धकाभादवाग्नी इत्यत्रानुनासिकविधेर्हिमात्रत्वाग्रहेपि प्रगृह्यत्वप्रवृतिग्रहवदिति वाच्यम्। यद्बुद्ध्याप्रकृतिभावप्रवृतिः तस्ययो विकारस्तत्प्रतिबन्धएवप्रकृतिभावप्रवृतिरित्याशयात्ऽत्रतुसवुद्ध्याप्रवृतीरस्यविकार इति नन्वेवमेहिस्वइरिन्गच्छति एहिदेवदत्तएधतेऽयंपाहिशिव ओंनमस्कारोमित्वामित्यादौ वहिरङ्गसन्धिकार्यस्य प्रकृतिभावेनवारणं नस्यादिति चेत्सत्यम्। इष्टापत्तेरनिष्टत्वग्राहकप्रमाणोपलम्भे-

तु बहिरङ्गासिद्धत्वानित्यत्वमेव शरणङ्गौरवस्य फलमुखत्वं-
प्रतिपादयन्सिद्धान्तेशङ्कते नचपरीति । अन्तरङ्गत्वादिति ।
वस्तुतस्तु शास्त्रकार्यातिदेशयोरुभयोरप्यतिदिश्यमानकार्य-
स्योपदेशदेशानतिक्रमात्प्रकृतिभावस्यैव परत्वेनप्रवृत्त्यानक-
श्चिद्दोषः। एतेनातिदेशप्राप्तकार्यस्यासिद्धत्वात्कथंप्रकृतिभाव-
निवर्त्यत्वमित्यपास्तम् । तदेतदध्वनयन्वक्ष्यति सादृश्यविधा-
नस्यैवेति प्लुतेकृतेपीति तस्यासिद्धत्वात्पूर्वंप्रगृह्यत्वेपीत्यादिः
दीर्घत्वबुद्धिवदिति। अनुनासिकप्रतिबन्धायपुनःसंज्ञाप्रवृतयेत-
द्बुद्धेरावश्यकत्वादिति भावः । प्रगृह्यत्वमिति प्रकृतिभाव-
दृष्टेरिति भावः । तत्वमिति । प्रगृह्यत्वमित्यर्थः । चेतव्यमिति
प्रश्नइदमित्येकवाक्यस्थमेव युक्तमतःसामान्यतःपृच्छति क-
र्त्तव्यमिति। चिनुइतिलोडन्तम् । हीत्यव्ययम् । विभाषेति। अ-
नन्त्यस्यापि प्रश्नेत्यस्यासिद्धत्वादनेनैव न्याप्यइति भावः ।
टाबिति नत्वव्ययमिति भावः । नवेतीति द्वयोर्विभाषयोर्मध्ये-
प्राप्ताप्राप्तविभाषयेत्यपि बोध्यम् । योगपरत्वेसूत्रपरत्वेवा ।
इयमित्यसङ्गतमत आह । उद्देश्येति उक्तंप्राक् । ईचाक्र ।
वृहतितुनार्थ इत्यस्यचाक्रवर्मणस्येत्येतत्सम्बन्धेन । नार्थः-
नसकलप्रयोजनसिद्धिरित्यर्थः । अयंभावः । ईइतिपृथक्प-
दंकार्यम् । उपस्थितइति वर्त्ततेपूर्वेणसिद्धेविकल्पार्थमिदम् ।
ततश्चाक्रवर्मणस्येति अयमेवचसूत्राशय एवञ्चसूत्रभाष्ययो-
र्नविरोधोभाष्याविरोधेनसूत्रस्येव सूत्राविरोधेनभाष्यव्याख्या-
याउचित्तत्वाच्च । एतेनभाष्ये ईग्रहणसत्वेवशेयमित्यसिद्धि-
वत् । चिनुहीतीत्यादौ नित्याप्लुतवद्भावासिद्धिर्नोक्तानापि

पूर्वविप्रतिषेधान्भगौरवमित्यपास्तम् । कैयटस्यप्रमादइत्येव प्रमादिकमित्युक्तम् । निपातए । पर्युदासादर्थवद्गृह्ये तात आह । प्रत्ययेति नन्वेवंङापि वहुव्रोहिर्नस्यादत आह । व्याहरतीति । आआत् । अमिति समाससंज्ञासमकालं दीर्घेततोनपुंसकह्रस्वः । उपदेतुलुकःप्राक् दीर्घप्राप्तिरेवनेत्यन्तरङ्गत्वाद्भ्रस्वेततोदीर्घइति नादसोसेरिति सूत्रोयशेखरविरोधः । यदिसेशब्देवक्ष्यमाणरीत्यापद*त्वाभावान्नप्रकृतिभावप्रसक्तिस्सत्यपि †तत्वेइत्युच्यते तदाअंइतःएतआओःउअस्तिवस्तीत्यादौ तत्प्रसक्तिर्वोध्या आगतःउओरानन्दोवानन्दइत्यादौ तत्प्रसक्तेश्च । एतेन नपुंसकह्रस्वेस्वमतेऽल्विधित्वान्निपातत्वारोहः कथमिति समाहितम् । स्वाश्रयेति ननुस्वाश्रयधर्मप्रयुक्तकार्याभावेपिपरादिवद्भावेनाङ्भिन्नत्वातिदेशेतत्वन्दुर्वारम् । अशास्त्रीयत्वात्तत्वानतिदेशइत्योत्सूत्रीयोद्योतोक्तन्नयुक्तम् । अर्थवत्सूत्रेशेषेभाष्येकाण्डइत्यादौ पूर्वान्तत्वेनप्रत्ययान्तभिन्नस्वातिदेशस्योक्तत्वात् । प्रगृह्यत्वंनेति तत्वेत्वमित्यत्रामिपूर्वइति पूर्वरूपंनस्यादिति भावः । स्पष्टार्थमिति । अन्यथादीर्घत्वादिनापि सादृश्यंगृह्ये तेति भावः । सिद्धिरिति । इकःपरोयोहल्इत्येव सिद्धेऽन्तग्रहणाद्व्यवहिताव्यवहितसाधरणंसामीप्यमिति तुवक्तुमशक्यंययक्षतीत्यादौ किंत्वेसंप्रसारणापत्तेरनल्विधावित्यादौ तुसामर्थ्यान्नजातिग्रहणमित्यर्थइति अन्यथाजातिग्रहणेपि जातेरेकैकव्यक्तिव्यंग्यतयाऽसङ्गतिरेव प्रवृत्तिनिमित्ततयाजातिग्रहणस्यसर्वत्रसत्वेन तस्यावक्त

*प्लुतप्रगृह्याइत्यत्रापि पदान्तादित्यनुवृत्तं प्रथमयाविपरिणतंचेतिभावः। †प्रगृह्यत्वे

व्यत्वात्। स्मृतार्थेति। ओकारप्रतिपाद्यार्थेत्यर्थः। अव्ययसंज्ञादाविति। आदिनानिपाताएकाजिति प्रगृह्यत्वन्तेन ईअभवदित्यादौ गृह्यत्वमतएवौदित्यत्रैवच्युन्तप्रतिषेधउक्तः प्रत्याख्यातश्च न्यायेन। अनित्यत्वादिति नन्वव्ययसंज्ञायाःकथंपदकार्यत्वंयेनानित्यत्वमवलम्ब्यतइति चेच्छृणुपदकार्यविषयकोऽयंन्यायइत्यस्य यस्यशब्दस्यवस्तुतः पदत्वविशिष्टस्यैवयत्कार्यप्रयोजकत्वं प्राप्नोतितत्रकार्येतस्यगौणार्थकस्यनग्रहणमिति न्यायार्थइत्यर्थः। अस्तिचच्युन्तस्यपदत्ववतएवाव्ययत्वप्रयोजकत्वम्। प्रत्ययोतरपदयोरित्यादौ तुत्वदीयादौपदत्वाविशिष्टस्यापियुष्मदादेःप्रयोजकत्वदर्शनात्त्वद्भवतीत्यादिसिद्धिरिति। परिभाषेन्दुशेखरविवृतिसंग्रहेविस्तरः। अत्रैतत्परिभाषेत्यस्य एतन्मूलभूतार्थवत्परिभाषेत्यर्थः तदाह। अतएवानर्थकेति। सासंज्ञा। निपातेति। प्रगृह्यसंज्ञा। सम्बुद्धौ शा। अपोइतोति ननुसंबुद्धित्वस्य हल्त्वेनस्थानितावद्वृतिकत्वात्सर्वत्रैवतत्परत्वंदुर्लभमिति चेन्न। नियमस्यविधिमुखेन प्रवृतिरिति पक्षेप्रत्ययलक्षणेनसौलभ्यात्। सौशाकल्येतिसिद्धेसंबुद्धिग्रहणंप्रगृह्यत्वेनलुमतेत्यस्याप्रवृतिज्ञापनार्थं तेनमिथोइतीत्यत्रातिव्याप्तिवारणेन संबुद्धिग्रहणंचरितार्थं फलञ्चत्रपोइति। सूत्रकृन्मतं न तु निमित्तसप्तमीत्याहुः। ननूपस्थितइत्येवकुतोनोक्तमिति चेन्न। उत्तरत्रइताबित्येवयथासम्बध्येतवेदे ऊँ यथास्यादिति। रत्नाकरस्त्ववैदिकइति शेषः। अनार्षत्वेनबुद्धेर्वृतावुक्तत्वादिति व्याख्यत्। तत्तुचिन्त्यमेव। उकारश्चेतिकरणेनयुक्तोरक्तो पृक्तोद्राध्रीति प्रातिशाख्यविरो-

धादवस्तुतोवेदे आपाद्यमानरूपाभावेनानार्षइति व्यर्थमेवेति तु न छान्दसेति परकलौकिकौदन्तेदोषात् । अतएवेति सामानाधिकरण्यायतद्धितः सार्थकः। अत्रओःशाकल्यस्येति सुवचन्तुन अउओइत्यत्रापि उवर्णस्थानिकत्वेनदोषात्। अवादीति आदिपदंचिन्त्यार्थकम् । इदमिति । सूत्रमित्यर्थः । उञः निपातएवेति नतुप्रत्याहारःतथासतिउञित्येवब्रूयात् । नापिकृतसंप्रसारणस्यवेञोलाक्षणिकत्वादिति भावः । स्थानिवद्भावेनेति । अग्रहोदित्यादाविट्त्वस्येवेति भावः । मानाभावादिति यद्यपिसामानाधिकरण्येनान्वयस्यपूर्वंकल्पत्वेनोञइति श्रुतत्वादादेशेनैवसम्बध्यतइति न्याय्यंकैयटोक्तेश्च उञइत्येतदावृत्यभावप्रयुक्तलाघवानुरोधेन प्रगृह्यसंज्ञकश्चेति भाष्योक्तिस्वारस्येनचसम्भवतिसामानाधिकरण्येवैयधिकरण्यस्यान्याय्यत्वेनास्यादेशविशेषणत्वमेवन्याय्यम् । तथापि वक्ष्यमाणभाष्यानुरोधेनोद्देश्यत्वस्यविधेयत्वमेवयुक्तम् । लक्ष्यविसम्वादाच्चेति स्फुटीभविष्यति। नतुउइतोति। न च निरनुबन्धकोकारमादायतत्सिद्धिरु इतीत्यस्मात्सानुबन्धकप्रतीतेरपीष्टत्वादिति स्पष्टमुद्योते न च ऊँ भावाभावपक्षेशाकल्यह्रस्वेनउइति वितीतिसिद्ध्यतीति वाच्यं योगविभागाभावेऊं विधौशाकल्यपदस्ययथाश्रुतत्वेनशाकल्यान्यमतेच शाकल्यह्रस्वस्यनाप्राप्त्याऊँ भावस्यतक्रकौण्डिन्येतिन्यायेनभोभगोइति सूत्रभाष्योक्तरीत्यातत्रतत्कृत उञ्त्वाभावेनसार्थक्याभावेनन्वायाप्रवृत्तौ तुसर्वथानिरवकाशत्वेनवाशाकल्यह्रस्वबाधकत्वात्। तदभावपक्षेतदप्राप्तेश्च ननुयोगविभागेकृतऊँ भावपक्षेशाकल्यह्रस्वेनऊँ इतीति

चतुर्थरूपं सम्भवतिनवेति चेच्छृणु परत्वान्तरङ्गत्वाभ्यांऊँ भावात्प्राक् शाकल्येक्षतिरेवन ऊँ भावेप्रतिपदोक्तत्वात्प्रवृत्ते-तुनतत्प्राप्तिहरीएतावित्यत्रेवप्रकृतिभावेनवाधादिति । वैय-र्थ्यापत्तिरिति संहिताऽविवक्षयातुनसार्थक्यमितावितिसप्तमी-निर्देशसत्वेनतद्विरहउपश्लेषएवनेतिपूर्वमुक्तत्वात् । विधिवै-यर्थ्यन्तुनोक्तम् प्रतिपदोक्तत्वादवकृतेशाकल्येनानुनासिकेह्रस्वे साफल्यात् । विकल्पमात्रेति शाकल्यपदइत्यर्थः । विधानेति प्राचीनमतेनेदम् । तत्रहिशाकल्यह्रस्वेप्यस्यसार्थक्येन तत्रत-क्रन्यायेनायमूंह्रस्वबाधकइति नावकृतेनानुनासिकह्रस्व इति पूर्ववन्नसार्थक्यं स्वमतेतुपूर्ववद्दीर्घविधानेत्यर्थः । इति शेखरविवृ-तिसंग्रहेऽचसन्धिः स्तोश्चुनेति लुप्त इति । आद्ये सुपोधात्विति अन्त्येहल्ङ्याबितीत्यन्ये रुत्वेविसर्गेसत्वेचानुपपत्यऽभावेपि ज-श्त्वाभावायच्छान्दसत्वातिदेशस्यावश्यकत्वेन ततएवलुक्कल्प-नेलाघवम् । एकपदत्वेतुचार्थेतत्प्रवृतिरपि यथासंख्यमन्वया-दगमकसाध्यैव कृत्तद्धितसुपोधातुच्छन्दोवत्सूत्रेति वहूनामऽनु सन्धानेगौरवमित्यभिप्रेत्याऽऽहभिन्नइति युवोरनाकावितिसू-त्रेभाष्यइतरेतरयोगेसौत्रोलोपइति ग्रन्थस्तुकयोर्युवोरिति सू-त्रस्थभाष्याऽनुरोधादिति नतद्विरोधोऽत्रपक्षेप्रत्येकं स्वरितत्वं प्रतिज्ञेयंधुनेत्यत्रानुवृतये ॥ तदऽपिस्वरितत्वस्याञ्झलसाधा-रणदोषरूपत्वेऽञ्निष्ठस्वररूपत्वेत्वेकपदत्वमेव न्याय्यमित्या-हुः । योगइति वदतोमूलकृतोमतेसंहिताधिकारसत्वेन नि-मित्तकार्यिणोःसंहिताविरहादेवचित्तादौ नदोषः तत्प्रत्याख्या-नेतुस्यादेवात आह । संयोगइति नन्वेवमपितस्मिन्नितिसू-

त्रेभाष्येनिर्दिष्टइत्यस्यसमिधा[illegible]ण्नेतिप्रयोजनमुक्तम् । तत्रमनोरमायां चाचियणित्युक्तेऽव्यवहितेपि प्राप्नोतीत्युक्तम् । तदुभयमऽप्यऽसङ्गतं संहिताविरहादेवयणोऽप्राप्ते रिति चेन्न । तत्सन्निकृष्टवर्णसन्निकर्षस्यापि संहितासंज्ञाप्रयोजकत्वात् । साक्षात्सन्निकर्षग्रहणेमानाभावात् । यथानचवाहेतिसूत्रेयुक्तग्रहणम् । अतएवैकपदेसंहितानित्येति यथाश्रुतंसङ्गच्छतेऽन्यथाययोरस्तितयोरस्त्येवययोर्नास्तितयोर्नास्त्येवेति व्याख्येयं स्यात् । पदस्येति । पदान्तस्येतिणत्वनिषेधकसूत्राद्यरोऽनुनासिकइत्यर्थमऽधिकृतमपीति भावः । अतएवैकादिश्चैकस्येति सूत्रेऽडट्कर्त्तव्यइत्याशंक्यपदान्तस्येति विधीयमानमऽनुनासिकत्वंनस्यादित्युक्तम् । पदान्तस्येत्युक्तिस्वरसभङ्गप्रसङ्गान्नास्यनपदान्ताट्टोरित्यतोऽनुवृतिरित्यभिप्रायकत्वं विभक्तिविपरिणामापत्तेश्च । अन्तपदानुक्तिस्तुतस्यतत्रानावश्यकत्वसूचनायष्टुनेत्यत्रतुनपदान्तादितिज्ञापकादऽसम्बन्धः । एतेनपदाधिकारस्यापदान्तस्यमूर्द्धन्य इत्येतदऽवधिकत्वाच्चिन्त्यमेतदित्यपास्तम् । यथासंख्यमिति शेषइति । स्थानेऽन्तरतमपरिभाषयासिद्धिरित्यपि बृहच्छब्दरत्नोक्तमनुसंधेयम् । लघुशब्दरत्नआन्तरतम्येन लघुनोपायेनसिद्धेस्त्वादिपदैरनादिसिद्धतयेत्यादिक्रमेणैवोपस्थितिरित्येवकृतआदृतमिति चेत्स्पष्टार्थम् । प्रश्नेचेति । ब्राह्मणाभ्यांकृतंदेहीतिवत्तन्त्रमन्त्रप्रश्नशब्देप्रश्नेचेतीत्यर्थः । स्पष्टार्थमिति । पदान्ताद्वेत्यत्रवक्ष्यमाणरीत्यातुनसार्थक्यंत्रैपादिकत्वेन समर्थपरिभाषायाअप्रवृतेः । पदत्वेनहेतुत्वेप्युद्देश्यताविरहाच्च । टोःकिमिति । परान् अस्य-

तोतिपराष्टोक्तइत्यादौ तुनदोषः । ष्टुनेत्यनुवर्त्त्यंटवर्गान्तात्पदांदित्यर्थः । एवं षोप्यऽनुवृतिः स्यादिति चेत्तत्राह । षकारस्यापिपदान्तेइति । षत्वस्येति । इदमुपलक्षणंविसर्गसत्वयोरषि । एवञ्चत्रयाणामसिद्धत्वेरुत्वस्यत्वपवादत्वात्सिद्धत्वेनाझल्त्वाज्जश्त्वाभावइत्युक्ते श्चाभावइति भावः । एतेनषस्यासिद्धत्वेपि सकारवृद्ध्यातत्प्रवृतिर्दुर्वारेत्यतोऽपवादत्वेनबाधात्तदभावइति वक्तव्यएवमुक्तिश्चिन्त्येत्यपास्तम् । वेद्मीति । इदंवार्तिकप्रत्युदाहरणं सूत्रस्यतुशङ्कुध्मःब्रध्नइत्यादि बोध्यम् । वलयेऽछत्तेरिति । दध्यौंस्तिष्ठतोत्यादौ यस्यानुनासिकोयकारस्तुन सन्निपातपरिभाषाविरोधात् । अतोनन्यूनता यद्वाय्चवश्चवंवंचलश्चवलौतयोरित्यर्थः । मूलरोत्याचेयं मूलन्यूनतापरिहृतिः । स्वमतेहलामणामनभिधानात् । रेफेऽनुनेति । यद्यपि भाष्येहित्वमप्युक्तं तथापि प्रकृतेऽनुपयोगात्त्यागःपरसवर्णस्तुसन्धैरैक्यादुक्तः । मतेनेदमिति । प्रकृतिपाठेपिचर्त्वाकरणान्निपातनमिति तुनयुक्तम् । त्यदादिष्वपि तथात्वापत्तौ तत्कुलमित्यादौचर्त्वानापतेः । तस्मात्नाग्रहोभावानुष्ठानेगणेपाठेचेति थस्यासिद्धत्वेति । एवञ्चपूर्वमेव चर्त्वस्यसकारेप्रवृत्तत्वात् । लक्ष्येलक्षणस्येति पुनर्नचर्त्वमिति भावः । थस्यापवादत्वादित्यपि बोध्यम् । एतेन सकारवृद्ध्यास्यादिति नशंक्यम् । व्यर्थमिति । अयंभावः । अस्यासिद्धत्वात्सलोपेदकारस्यतकारेणोत्थानं साध्यन्तच्चान्तरेणयत्नं सिद्ध्यतीति । सजातीयानेकव्यञ्जनोच्चारणेविशेषोनेत्यवलंबनेतु यथाश्रुतमेवयुक्तम् । उदस्थादित्यत्रतुनसार्थक्यमित्याह । उदःस्थेति ।

तङ्स्यइति । इदञ्चविकरण[illegible]वलीयानितिनयेविहितवि-
शेषणंलावस्थायांचस्यतासीतिनयेत्वादौस्यः।यथासंख्यमनु। सं-
ख्याशब्दस्यज्ञानार्थतेति । संख्या[illegible]ब्देस्वार्थेतद्धितइति भावः।
तामनतीति पाठः । तदनतीति वा । तमितिपाठेतत्प्रकारःक्र-
मोग्राह्यः। ननु प्रसि[illegible]संख्याग्रहणेपि नदोषः तत्संख्यापूरकस्य
तत्संख्यापू[illegible]केणान्वये तदनतिक्रमइत्येव वक्तुंशक्यत्वादिति
चेन्न । प्रथमत्वस्यप्रसिद्धसंख्यारूपत्वाभावात् । सम्बन्धोये-
नेति।सम्बन्ध[illegible]त्यस्यानन्तरंयथाक्रममित्यर्थइति शेषः। शब्दतः
सूत्रान्तरेति।शब्दतःसूत्रान्तरस्थमर्थतोत्रोपस्थितमित्यर्थः।न-
नूक्तलौकिकप्रमाणस्यार्थसाम्येपि प्रवृतिरस्तु । अतःफला-
न्तरमाह । आद्यन्ताविति । ङमोह्रस्वात् । पञ्चम्यातदन्तेन ।
तत्र । उक्तवाक्ये । एतेनविभक्त्यर्थान्वयायतदन्तेङम्पदश-
क्यापदार्थैकदेशत्वात् । ङमिह्रस्वान्वयोनस्यादित्यपास्तम् ।
लाघवार्थइति । [illegible]रसूत्रयोरावश्यकविभक्तिद्वयस्ययुग-
पदुच्चारयितुमशक्यत्वेनान्यतरत्रतद्व्यत्ययस्यावश्यकत्वइहैवत-
त्कल्पनं [illegible]शेनेति भावः । ननु सप्तमीनिर्देशइहाऽची-
त्यस्याच इत्यर्थकल्पनमेकमुतरत्रचाच इत्यर्थकत्वकल्पनमपर-
मिति ज्ञानगौरवेणार्द्धमात्रागौरवस्यनिमातव्यत्वात् प्रकृता-
नुगुणप्रत्ययोच्चारणेकार्येसप्तम्युच्चारणसामर्थ्यात् । यथाश्रु-
तेवङमइत्यस्यानिश्चितविभक्त्यन्तस्य षष्ठ्यन्ततांनिर्णाययेदत-
आह । ङमउत्तरेति । अतोमात्रालाघवमेवाश्रितम् । टाङसी-
ति सूत्रस्थभाष्येण मात्रालाघवस्यैवाभ्यर्हितत्वबोधनादिति
भावः । अन्येतु पदविषयकप्रश्नेहेतुमाहेत्यवतारयन्तोग्रिमग्र-

त्थान्वयमिच्छन्ति ॥ मण्डूकेति ॥ दशसूत्र्यामसम्बन्धादिति भावः । आवृत्त्येति । एतत्फलन्त्वश्वस्यपुच्छमश्वपुच्छंनअश्वपुच्छमनश्वपुच्छमित्यत्रडमुडभावः । अजादेरश्वस्यपदत्वेपिडमन्तस्यपदत्वाभावाच्चिन्त्यम् । अनुवृत्तपदस्येत्यस्याचोनेन विशेषणत्वेपीति प्रकृतसूत्रोक्तोयोतोयस्यैव सम्यक्त्वात् । एतदर्थमेवेति । पूर्वोक्तरात्यालघवाभावेत्रात्रेत्यत्ययकल्पनमेतदर्थमेवेत्यर्थः । तत्सत्यान्तत्प्रवृत्तौनिमित्तत्वादिति भावः । नन्वेवं त्र्यत्ययप्रयुक्तं गौरवंतवाप्यविशिष्टं मण्डूकानुवृत्तिश्चाधिकेति मूलोक्तमेवास्त्वितिचेत्तत्राह । डमन्तेति । एतदसाधारणफलन्तुपरमाट्तिरिति । अटतेःक्विप् अट्परमेणसमासेपरमाट् ततोऽशब्देनषष्ठीसमासेपरमाडः तत आचारक्विप् ततःक्विच् तितुत्रेतिनेट्अतोलोपोऽन्तर्वर्तिसुपापदत्वात् । नपदान्तादितिष्टुत्वनिषेधः । पदान्तत्वनिमित्तकत्वेनपदान्तादिति निषेधउत्तरपदस्यकार्यित्वाभावेनेष्टसिद्धिः । नेत्यादाविति । आदिनाअतिबन्धनेक्विप् अन्अन्तःअःषष्ठीसमासेसंयोगान्तलोपेअनः तत आचारक्विप्लिट् आम्अनाश्वकारेति अत्रहिडमन्तस्यपदत्वेप्यजादेःपदत्वाभावात्डमुण्नयुक्तः तत्रैवेति । इदमुपलक्षम् । अपदादिविधावितिपर्युदासेनपदान्तत्वनिमितकेविधावेवतत्प्रवृतेरित्यस्य तदसाधारणफलन्तुगणयतेर्विच्गण्हिनस्तेःक्विप्हिन्गण्णश्चःहिन्नश्चइति समासेडमुट्प्रवृतिः । अतएव तलनञ्घटितंवचनंनियमार्थमुक्त्वानपदान्तविधावितिभाष्यउक्तम् । अतएवसावपि पदमित्यनेननफलभेदः । अन्यथाक्वचनारम्भेगण्श्चेनप्राप्नोति डमुट्प्रत्या-

ल्गानेतुसस्यादेव । अतएवतस्मान्नुडचीति सूत्रेभाष्येनुकिङ्-मुडापादितः । अन्यथातदसङ्गतिः स्पष्टैव । यत्तुनलुमतेतिसू-त्रउदोतेउक्तंपदान्तस्थानिकेविधावित्यर्थइति तच्चिन्त्यम् । प-रमबुधावित्याद्यसिद्ध्यापत्तेरितिकेचित् । बुध्इति समुदायस्या-पि पदान्तत्वेनतस्यस्थानेभुध्विधानमिति नदोषइत्याशयक-मित्यन्ये । एकदेशिनइति । उक्तभाष्यविरोधात् । नलुमतेति सूत्रस्थ*लोपादिविधौप्लुत्यन्तइति वार्तिकस्थभाष्यविरोधाच्चेति भावः । स्पष्टञ्चेदं प्रकृतसूत्रेनलुमतेति सूत्रेचोद्योते । अत्रेद-श्चिन्त्यतइति वार्तिकोक्ते ≍प्लुतेऽत्यन्तादपरत्ववार्तिकाप्रवृत्तौ सुकरिणौसुसर्पिषावित्यादौणत्वषत्वयोः प्रत्याख्यानेन्यायप्रा-प्तयोःकथंसिद्धि रारम्भइति प्लुत्यन्तइति वार्तिकदूषकभा†ष्यं दूषणान्तरोपलक्षणमिति तुयुक्तमुत्पश्यामः । सौत्र‡इति । सं-हिताया अविवक्षयान्तु इकोयणित्यत्रहशिचेत्यत्वमापनस्यात् । पदभेदेनविवक्षाविवक्ष इति तुनयुक्तम् । संहितयासूत्रकृद-पाठीदिति । सर्वसम्मतत्वात् । यदिसूत्रकृताऽसुट्कृतःस्यात् तदापदकारेणानुपूर्वसूत्रेणनमग्रास्यादित्याहुः । अतएवेको गुणेति सूत्रेउद्योतेउक्तम् । एकयोगत्वञ्च संहितापाठादेवे-ति । यद्वायदापदेऽव्यवाय इति सप्तमीसमासअतद्धित इ-त्यस्यख्यानायाश्रीयते तदावापेनेत्यादेर्मध्यमपदत्वानाक्रान्त-स्यपदत्वमेष्टव्यन्तच्चान्यथानसिद्ध्यतीत्यर्थः । कार्यित्वेतिवक्त-

---

* उत्तरपदादीति कर्णोवर्णलक्षणादित्यत्रदोषवारणायैतदुक्तम्भाष्ये । † य-द्येवं राजकुमार्यावित्यादौ शाकलंप्रसज्येतेतिभाष्यम् । ‡ सौत्रइत्यारभ्यपाठा-देवेत्यन्तपाठोऽत्रानुनेत्थं ≍मालोक्यः ।

व्यम्। कृद्ग्रहणपरिभाषाया अनित्यत्वात्तल्लाभः। पदपदंपदत्वयोग्यपरमितितुनयुक्तम्। बहुषुलक्षणापत्तेः। इदञ्चन्यायसिद्धम्। पदादिविधेरुत्तरपदसम्बन्धित्वेन तद्भिन्नस्याप्युत्तरपदसम्बन्धिनोग्रहणात्। वार्तिकार्थस्तु अपदादिविधाविति विषयसप्तमी। विषयताचकारकइति वज्जनकतारूपा पदादिविधिभिन्नजनकोत्तरपदत्वेप्रतिषेधइति। यदितुस्वातं व्यमऽवक्ष्यदऽजन्तपदस्येत्यस्य प्रयोजनंसंमृग्यते। तदापदाधिकारस्यव्यधिकरणान्वयज्ञापनमेवान्तग्रहणस्यैवेति गृहाण। स्पष्टञ्चेदमुञ्चपद इति सूत्रोद्योतेऽत्रानुना अत्रेति। सर्वनाम्नाप्रकरणपरामर्शेमानमाह। अतएवेति। उक्तमिति। रुत्वपक्षेचानुनासिकाद्यापतिर्नोक्तेत्यपि बोध्यम्। रुविधावित्यर्थेतुतदऽसङ्गतिः स्यादिति भावः। अत्रपक्षेरुप्रकरणेवक्ष्यमाणार्थकमिदमधिकियतइतीत्यर्थोबोध्यः। रोःपूर्वस्येत्यत्ररोरितीत्यर्थः। पूर्वत्वञ्चाव्यवधानगर्भव्याख्यानात्। तेनचकिंस्तायस्वेत्यत्रचकाराकारस्यन एवं परत्रपरमपि। इत्यपीति। इत्यत्रापीत्यर्थः। स्पष्टञ्चेदंसर्वसमःसुटीत्यत्रप्रदीपोद्योतयोः ननु तत्सूत्रोदाहरणस्यभाष्येदत्तत्वेन तत्रतत्प्रवृत्ताविष्टापत्तिरत आह। तत्सूत्रस्थेति। ननुअधिकारपक्षेतत्तत्सूत्रैकवाक्यतयासमोन्त्यस्यालोरुस्स्यात्पूर्वस्य तुवानुनासिकइत्यर्थात् रोः पूर्वस्येत्यसङ्गतंतस्यविधेयत्वात्तत्रैवाबधित्वेनोपादानासम्भवाद ऽत आह। पूर्वस्येत्यस्यचेति। लोपपक्षेऽनुनासिकसिद्ध्यर्थमाहेत्यत्रतरणन्तुनयुक्तम्। अभावस्यापि बुद्धिकृतंयोर्वापर्यवर्णवदिति शेखरविरोधात्। अयमागमेति। प्रत्ययव्यावृत्तय आ-

गमत्वस्यावयवत्वघटितत्वेपि ध्वनितञ्चेदं वृद्धिसंज्ञासूत्रउद्यो तइतरानुपमर्देनजायमानत्वादस्य तत्वेनव्यवहारोवयवत्वेत्व- ऽभिमतेपूर्वस्येत्यनुवर्त्यपूर्वस्यावयवः परइत्येवव्याख्यत् नप- श्चस्यातत्फलन्तु अनुस्वारस्यद्वित्वम्। अन्यथायदागमेतिन्यायेन विशिष्टेऽचत्वादचः परत्वाभावेन तन्नस्यात् । यत्तत्वागमस्यापि द्वित्वंदृश्यतेऽनित्यत्वन्तन्न्यायस्य प्रकृतेतु न्यायसिद्धत्वादऽस्यार्थस्यैवमेवोक्तम् । एवमैजागमेपि बोध्यमित्याहुः । किञ्चैचोरवयवत्वेऽभिमतेनय्वाभ्यांपदान्ताभ्यान्तयोश्चैच्डितिन्यासेनङमुटमिवचैच्टंविदध्यात् । प्रकृतेचानुस्वारकम् । क्षिप्तस्यापोति । अवसानस्यनसम्बन्धइतीति । विसर्गेणानुमितस्यप्रत्यय इत्यादिरूपादव्याख्यानादकारेण सम्बन्धोनेत्यर्थः । सचस्वप्रयोज्यविसर्गस्थानिकत्वरूपः । खरस्तुनाक्षेपःफलाभावात् । अतएवखरऽसम्बन्धइति नोक्तम् । अवसानेन सत्वमित्येवतुनोक्तं सर्वत्राक्षेपं वदताइहक्लेशः किमर्थंसोढव्यइत्युपहसितुं किञ्चैङ्ह्रस्वादुरदित्यादौशाब्देभानमऽपेक्ष्यमिहतुनेति आक्षेपेनदोषः । अतएवप्रकृतसूत्रेभाष्येसत्वएवकर्त्तव्येविसर्गविधानान्नावसानखरोरुभयोरविसर्गोऽवसानएवकुतोनेति चेत्शर्परइति ज्ञापकादिति गृहाणेत्युक्तं ततो हलोत्यनुवर्त्ततइति पक्षान्तरमुक्तम् । ततःखरीत्यनुवर्ततइति चपक्षान्तरमुक्तम् । एषांपक्षाणांफलभेदभङ्गायावसानेविसर्गंसंपाद्यपश्चादजादिपदसम्बन्धेऽकृतव्यूहपरिभाषामनङ्गीकुर्वताऽनभिधानमेवाश्रयणीयम् । तदेतन्मननसिकृत्वोक्तं शब्दरत्नेसत्यभिधानेहरिः अयमिति सवि-

सर्वमपि साध्येवेति । अपूर्वकरणेगौरवादाह । समःसुटीति । अत्रसपदस्यैवाग्रे सम्बन्धोनमध्येसम्बन्धागावात् । अत आह । इत्यादीति । विसृज्यांसइतिवक्तव्यमिति भावः । ततोऽपि लाघवादा[illegible] । अत्रपक्षेमध्येऽसम्बन्धोव्याख्यानात् । प्रकृतिभावेवेति । वा शब्दश्चार्थे । प्रकृतिभावोऽत्रस्वाभाविक्यवस्थितिर्न तु शास्त्रीयस्तदा[illegible] । प्रकृतीति । प्रान्तेशब्दस्य[illegible]दिति । तत्समाख्यात्वेनेति भावः । वस्तुतस्तत्रापि लोपइति पूर्वान्वयिवाशब्दस्वार्थइति नकश्चिद्दोष इत्याहुः । असिद्धत्वादिति । झलादेःप्रत्ययत्वाभावाद्व्यर्थमेव स्यादिति । भावइति । तद्ग्राह्यन्तुदुर्लक्ष्योविशेषोनास्तीत्यर्थकम् । नतु-सर्वथा तदसत्वप्रतिपादकमिति नतद्विरोधः । नन्वेवं प्रार्षभीयेतिप्रतीकेऽचीरह्रेत्यस्यानावश्यकतासूचितेति ग्रन्थेनविरोधः तत्रानावश्यकतेत्यस्य मूलपदकर्तुः सूक्ष्मोच्चारणेविशेषाविशेषज्ञानासम्भवेन प्रकृतमूलग्रन्थेऽनावश्यकतेत्यर्थकरणेनादोषात् । नतुसर्वथाऽनावश्यकतानन्वऽनयोर्युगपत्प्रवृत्तावेकस्यैव द्विरुच्चारणस्योभाभ्यांसाधुत्वं बोध्येतात आह । पूर्वत्रासिद्धत्वेनेति । पूर्वत्रासिद्धीयमद्वित्वइत्येतदऽभिप्रायकंपरत्वान्तरङ्गत्वाभ्यांयणोमयइत्यस्यैव पूर्वंप्रवृत्तिरिति समाधानान्तरंवृहच्छेखरोक्तंतुनोक्तम् । फलेविशेषाभावेन तदप्रवृत्त्याऽस्यैवन्याय्यत्वात् । विसर्गसंग्रहायाह । कुप्वोरिति । द्विवचनोपपत्तिस्तुककारेपकारेचद्वयोर्द्वयोरेव प्राप्त्याबोध्या । एवमेवभाष्येपि बोध्यम् । इदमिति । एवञ्चषत्वस्यापि प्रासाविवितदर्थोबोध्यः । नोदुपधेति । अन्त्यादलोऽव्यवहितपूर्वस्यैवसा-

सासंज्ञे ति भावः । उपधत्वेत्वेचेतिह्रस्वः । यद्वा उपधेतिच्छे-दोबह्वृचोहिश्च । सौत्रत्वान्ने ति । विभक्त्युत्पत्तयेजातप्राति-पदिकत्वमादायप्राप्तनलोपस्य प्रकारान्तरेणाशक्यवारणात् । एतेनप्रकृतिवदिति प्रत्ययान्तत्वेनाप्रातिपदिकत्वान्नलोपइत्य-पास्तम् । क्षियइत्यतोवैलक्षण्यं स्पष्टमत्रसूक्ष्मदृशांलुगर्थंसौत्र-त्वस्यावश्यकत्वाच्च । वृह*च्छैखरेत्तु ननु वचनयोर्युगपत्प्रवृत्तौ क्रमेणवाप्रवृत्तावेकस्यैवविधानापत्तिः द्वे इत्यस्यसंख्येयपरत्वेन शब्दद्वयस्योच्चारणसाध्यत्वेन तस्योच्चारणबुद्ध्यारोहावश्यकत्वा-त् । यरइति षष्ठ्याकारकविभक्तित्वस्यन्याय्यत्वाच्च उच्चा-रणइत्यध्याहारेणोच्चारणद्वयस्यैवविधेयत्वादिति चेन्न । पूर्व-[illegible]त्वात्परत्वाद्वाशास्त्रयोः क्रमेणप्रवृत्तेः तत्प्रयोगसम-वाय्य न्यवर्णोच्चारणवदेकतकारोच्चारणस्यसिद्धत्वेनैकस्यैवव-धितात्पर्यविषयतात्रैकस्य द्वितीयोच्चारणस्यैकेनसाधुत्वबोध-ने पि द्वितीयेनतयोर्मध्येऽपरस्य द्वितीयोच्चारणस्य साधुत्वबोधने पि द्वितीयेनतयोर्मध्येऽपरस्य द्वितीयोच्चाणारस्यसाधुत्वबोधनेवृ-त्त्यभावादिति दिक् इत्युक्तम् । कुप्वोः । अत्रकपइति विधेयंककारस्येत्वेलोपेननिवृत्तिः ॥ अयमादेशएवसाहचर्यात् उच्चारणसामर्थ्यान्नगःककारोच्चारणंहिजिह्वामूलीयोच्चारणायन हिगकारे तत्संभवति द्वितीयेऽकारस्यानुनासिकत्वेननिवृत्तिः । परस्यपूर्ववत् । उच्चारणार्थवर्णरहितेलक्षणेति शब्दरत्नोक्त-न्तुनयुक्तम् । स्वमतेविधेयबोधकेलक्षणानङ्गीकारात् । प्रस-

* वृहच्छैखरेत्वित्यारभ्येत्युक्तमित्यन्तपाठोन्याय्यत्वादित्युत्तरम्बोध्यः ।

ङ्गान्यायार्थमाह । येननेत्यादेरिति । अस्यन्यायस्यसर्वत्रा[illegible]
रवकाशत्वरूपसिद्धबाधकत्वमा[illegible]क्ष्यमाणभाष्या-
सङ्गतिरतस्तत्रकौडिन्येति न्य[illegible]प्यनुवादइति वक्त-
व्यम् । एवञ्चतदुभयसाधारणंबीजमाह । तदप्रातीति ।
उक्तन्यायेतदऽपवादौमाभूतां अनयोरसिद्धत्वा[illegible] । तस्मिन्
कृतेतुस्यातामेवेति शङ्कतेनचेति नन्वऽर्थाधिकारात्स्वर-
सानयोरितिविवक्षितस्यैवस्यातामित्यत आह । किञ्चेति ॥ अ-
यंभावः । अर्थाधिकारेसत्यस्यासिद्धत्वस्यचबाधःकर्तव्य इति
हेतोःशब्दाधिकार आश्रीयते। अनुवर्त्येति। नेत्येवसिद्धेविसर्ज-
नीयवचनाद्बाध्यसामान्यचिन्तेतितुनयुक्तं बाध्यसामान्यचि-
न्ताङ्गीकारेऽनचिचेति द्वित्वस्याप्यनापत्तेः । नचेष्टापत्तिःमाना-
भावात्। नचानुवृत्त्यावाक्यभेदेनव्याचक्षाणस्यतवापि इदुदुप-
धस्येति षत्वबाधायतश्चिन्ता इयकत्वेन द्वित्वबाधोदुर्वारइति
वाच्यम् । अनुवर्त्यवाक्यभेदेनकुप्वोरित्यस्य सम्बन्धेनकवर्ग-
पवर्गयोर्बाधप्राप्तावपीतरत्रब धकल्पनेमानाभावात्।वस्तुतस्त्व-
ऽर्थाधिकारपक्षैकवाक्यतयाशब्दाधिकारपक्षेपि नबाध्यसामा-
न्यचिन्ताश्रयणंद्वित्वबाधाबाधाभ्यांफलभेदात्।किन्तुकुप्वोरि-
त्यत्रेवोतरत्राप्यऽनुवर्त्यव्याख्येयम्।कुप्वोरित्यतःपरश्चार्थाधिका-
रएवेति स्पष्टमुद्योतएत्येधतीति सूत्रस्थपरेतुमतरीत्याऽनभिधा-
नमुक्तन्तन्नयुक्तंपश्य[illegible]: कुप्वोरित्यत्रचाद्विसर्गलाभानापत्तेः
तथावक्तुमशक्यत्वात् । ननुचेनपक्षेषत्वंनिषिध्यतामित्युक्त-
मेवेति चेन्न । तथासतिसोपदादौ इणःषःकस्कादिषु इदुदुप-
धस्यइत्यादीनां षत्वनिषेधपक्षेचरितार्थानां[illegible]क[illegible]पवाधक-

त्वानापत्तेः । नचाधिकारविधानेत्वर्थाधिकारात् खरवेतिविहितविसर्गस्यैवादेश इति चरितार्थ्याभावाद् बाधकमेवनिषेधेतुसएवेति सार्थक्यंस्यादेवोतरत्राधिकारेमानन्तुसर्पिष्कुण्डिकाशब्दपाठस्यज्ञापकत्वप्रतिपादकपरंभाष्यम् । अन्यथापक्षप्राप्तक्रपबाधनेनचरितार्थ्यात्तदसङ्गतिः स्यात् । अदोषादिति । एवञ्चशब्दाधिकारेपि बाधमन्तरासार्थक्याभावादर्थाधिकारएवेति भावः । शर्परेविहितस्यषत्वमपि नेत्युद्योतेस्पष्टम् । यद्यपिशर्परइति सूत्रेस्थानिबोधकस्यविसर्जनीयपदस्य खरवसानयोरित्येतन्मात्रविहितबोधकत्वेनार्थाधिकारेणात्रापि तादृशविसर्गस्यैव ग्रहणेनशर्परइति विहितेप्रसक्तिरेवनतथापिपूर्वत्रासिद्ध इत्येतद्बाधकल्पनापेक्षयाऽर्थाधिकारत्यागएवयुक्तइति भावः । एतेन कस्कादिषु चेतिसूत्रेऽनुवृतविसर्जनीयपदस्यान्यानुज्जीवितविसर्गपरत्वमऽवश्यंवक्तव्यन्यथातस्य क्रपादेशबाधकत्वानुपपतिः क्रपादेशाप्राप्तियोग्येतत्सूत्रविहितचाद्विसर्गइत्युज्जीवितविसर्गेऽस्य चरितार्थस्यसत्वस्य जिह्वामूलीयबाधकत्वानापत्तेरित्यपास्तम् । तस्यनिरूक्तरीत्याऽस्यापि दोषस्य शङ्काप्रवेशात् । शर्परेनेति सूत्रणीयेविसर्गग्रहणेन बाधकद्वितीयसूत्रसंपादनद्वाराजिह्वामूलीयबाधस्यवक्तुंशक्यत्वेपि स्वदेशस्थेनद्वितीयवाक्यार्थेनजिह्वामूलीयस्य बाधकल्पनेपूर्वत्रासिद्धमित्येतद्बाधकल्पनापत्त्यात्रैवानुवर्त्यवाक्यार्थकरणम् । एतेनानुवृत्त्यभावेपि बाधकताबीजसत्वेनकिमर्थमुतरत्राऽनुवृत्तिरित्यपास्तम् । षत्वापतेरिति पुंस्कान्यतीत्यादाविति भावः । इदन्तु बोध्यम् । कांस्का-

नृसंस्कृतइति गणेपाठ्यमिति । अत्रकिंलाघवमिति तुचिन्त्यम् । नन्वतःकृकमीत्यत इण इत्यस्यविच्छेदात् कथमिदमित्याह । गणइति । नन्वेवं पुम्ग्रहणंत्वावश्यकमेवेति कथमुक्तं तत्र यथापठितसाधुत्वस्यवक्तव्यत्वेन प्रकृतेकृतषत्वपाठेपि दोषानवकाशादिति चेन्न । कांस्कान्इत्यादेरनुस्वारानुनासिकोपेत्तयोः पाठेनसंस्कृतइति पाठेनचनिखिलरूपसंग्रहेपि पुंशब्दविषयेऽनन्तप्रयोगाणां पाठकल्पनेगौरवापत्तेः । षत्वापत्तेरिति । पूर्वग्रन्थस्तु दोषोपलक्षणमित्याहुः । केचित्तुपुंस्इति पठित्वाकुप्वोरितिसम्बन्धादतिप्रसङ्गंनिराकृत्ययद्दापुमःसः अपदादौइणःषइति संन्यस्यतस्याप्यनावश्यकतां ब्रुवतेवस्तुतः सम्पुम्कानितिपठित्वा एतेषां विसर्गस्येतिव्याख्यानेननकोप्यति प्रसङ्गएवेति बोध्यम् । वस्तुतस्तु यद्दे तिवदतोमूलकारस्यकस्कादेराकृति गणत्वात्सत्वमित्येवतात्पर्यम् । नतुत्वयाणांपाठेसूत्रत्रयेसपदकर्तव्यतापेक्षयाप्रत्युतगौरवेणपक्षान्तरानुत्थितिप्रसङ्गात् । तथाच पुम्शब्देषत्वापत्तिरितिसर्वमनाविलम् । विसर्गपक्षेसार्थक्यात् । कथमिदमित्याह । तद्धितेति । अर्थाधिकारादित्युक्तं प्राक्यद्दाशब्दाधिकार उत्तरविधीनांसर्वथानिरवकाशत्वेन ×क×पबाधकत्वम् । तक्रकौण्डिन्यन्यायेनतु तद्धितविसर्गंबाधकत्वं बोध्यम् । संहितायां इकोयणचोत्यतः प्रागेवेदं युक्तमुपन्यस्तुं यद्यपि तथापि पाठक्रमादत्रोक्तमित्याहुः । छातेःकइति । सतिनिष्पन्नइति शेषः । ननु नतज्ज्ञापकं तस्यापदान्तविषयत्वात्तद्विषयस्योत्तरसूत्रस्यवैकल्पिकत्वाच्चेत्यत आह । व्या-

ख्यानेति । अभ्याससंज्ञाप्रवृ*त्तिकालइति । यद्यपिस्थानिवत्सूत्रोक्तरीत्यापुनस्तत्कालोऽस्त्येव तथापि तत्संज्ञाप्रयोजकंद्वित्वमिहविवक्षितमिति बोध्यम् । इति शेखरविवृतिसंग्रहेहल्सन्धिः ॥ सोपदादौ । ननु सःप्रत्ययइत्येवसूत्र्यतां उरःकेणेत्यादौतु यथाश्रुतेपिनेष्टमिति चेन्न । तथासतिउरःकाम्यजऽस्तोत्यादौ प्रत्ययाऽनुकरणेऽतिदेशेनप्रत्ययत्ववत्यौपदेशिकपदवतिसत्वापत्तेः न च तदादेरित्यस्योपस्थित्याविसर्गान्तस्यतदादेःसत्वंप्रत्ययइत्यर्थान्नोक्तदोषइति वाच्यम् । तथाप्युत्तरसूत्र इणःपरस्यविसर्गान्तस्यतदादेःषइत्यर्थापत्त्यादधिसर्पिष्पाशमित्यत्रैव स्यात् । नसर्पिष्पाशमित्यत्रेति पदस्येतितु सिद्धान्तेऽयधिकरणमेवेति नदोषः । श्रुतानुमितपरिभाषयाश्रुत्तत्वादिणइति विसर्गविशेषणमिति । इणःपरविसर्गान्ततदादेरित्यर्थाङ्गीकारेणोक्तदोषवारणेतु काम्यजऽलौकिकप्रक्रियावाक्यीयप्रकृत्तिप्रत्ययोः प्रत्येकानुकरणेतत्वसत्त्वेनतत्रदोषाच्च ॥ इणःषःइचइत्येवसूत्रयित्तुमुचितम् । सस्येति । अनुवृत्तस्यसइत्यस्यषष्ठ्याविपरिणामइति भावः । अत्रपक्षेषसपदयोरग्रे मण्डूकानुवृत्तिर्नेति बोध्यम् । पूर्वोक्तातिप्रसङ्गोनेतिव्युत्क्रमेणाह । गीःकाम्येति ॥ करोतीति ॥ इत्यादाविति-शेषः प्रकृतसूत्रउद्द्योतेतु एवंपाठएव । असिद्धेरिति यथाश्रुतेनैवासिद्धेर्विभक्तिविपरिणामेन व्याख्यानसामर्थ्यात्परेषांनासिद्धत्वमिति षत्वंसिद्ध्यतीति । अयमपि पक्षःप्रकृतसूत्रेउद्द्योतेसिद्धान्तित इडायावाइत्युत्तरं इणःषइति पठित्वाइष्टसा-

* वस्तुतोऽत्राभ्यासानवयवत्वाद्वेचनहलादिःशेषइति बोध्यम् ।

धनपरोवृहच्छैखरस्तु प्रकाराशयासमर्थकत्वादऽनादेयएव ॥ इतउत्तरमिति ॥ इतआरभ्येत्यर्थः ॥ गतित्वाभावइति । इदञ्चिन्त्यन्तस्य कुतोनगतिसंज्ञे ति एवं स्वरादिपाठवैयर्थ्यन्तुन कृञोयोगेऽव्ययसंज्ञार्थकत्वादस्य एवंचनमःकरोतीति विसर्गघटितप्रयोगसिद्ध्यर्थं विकल्पेनसंज्ञास्यादिति साक्षादादिषु पाठएवयुक्त उपलभ्यतेचतथैवसमतन्तस्माद्देवान्नमस्करोतीति भाष्यप्रयोगात् च्व्यर्थवचनस्यप्रायिकत्वमेवयुक्तम् । नमःशब्देऽसन्भवाद्वा एवञ्चऊर्य्यादिगणेस्वरादौच पाठेविकल्पफलसिद्धिरिति साक्षात्प्रभृतीति सूत्रस्थशेखरोपि चिन्त्यएवेत्याहुः । अन्येंतु स्वरादिपठितस्यगतित्वाभावइत्यस्यायं भावः । देवेभ्योनमःदेवान्नमस्करोतीतिदर्शनात् । वाचकोद्योतकश्चेत्तिद्विधेनमःशब्दःऊर्य्यादिषु द्योतकस्यैवग्रहणंक्रियायोगेइत्यर्थाधिकारानुगुण्यात् । यदानमःशब्दःस्वार्थमभिधत्तेकरोतिरुत्पत्तिं तदानमःकरोतीति सविसर्गमितीत्याहुः । मूलेपुरःप्रष्ठव्याइति नचास्यलाक्षणिकत्वं पूर्वावराधराणामसिपुरश्चवश्चेषामितिव्युत्पादितस्यापि लाक्षणिकत्वात् । यदातुनमःसाहचर्यात्पुरोऽव्ययं पुरःसाहचर्यान्नमस्गतिरेवेत्युच्यते तदास्पष्टार्थङ्गतिग्रहणमितिवदन्ति।इदुदु।तत्सम्बन्धिपरमिति।एतद्दीजं प्रत्ययलोपइति सूत्रेवक्ष्यते नन्वऽग्निःकरोतीत्यत्रविसर्गेकथं प्रत्ययत्वंसस्यसत्वेनरत्वेनवास्थानित्वादिति चेन्न। तत्स्थानापन्नेतिलौकिकन्यायेन तदऽतिदेशात्। प्रत्ययसंज्ञायाःयथोद्देशेपि अग्नीइत्यलप्रथमत्ववत् । पुनःप्रवृत्त्यङ्गोकारेणविसर्गेसुवुद्ध्योपदेशत्वेनैव प्रत्ययत्वाद्वातत्सम्बन्धित्वंवाविलक्षणंस्वीकार्यम् ।

इत्यादाविताआदिना*स्युःपाडित्यमरप्रयोगःमनोरमायांविसर्गपाठस्तु पूर्वापरविरुद्धः।तुनार्थइति। विसर्गेवयधिकरण्येनान्वयादिति भावः। षत्वापत्तेरिति ननु प्रत्ययभिन्नस्यप्रत्ययसदृशस्यग्रहणेशादृश्यञ्चार्थवत्वेसति अर्थवदऽवयवकभिन्नत्वेनकविभिः कृतमित्यादौ तथाभूतेभिसवयवत्वाद्दोषवारणायसत्यन्तम् एवञ्चनदोषइति चेन्न। तदपेक्षयासामानाधिकरण्यानुरोधेनलक्षणाया एवोचितत्वात्। द्विस्त्रिश्चेति। असम्भवादिति। पदविशेषणत्वात्तस्येत्यपि बोध्यम्। ननु प्रत्ययग्रहणेतदादिविधिनियमात्परमद्विष्करोतीत्यत्रनस्यादताह। वक्ष्यमाणरीत्येति। वनोरच्चेत्यत्रेवपदविशेषणत्वात्। तदन्तविधिह्ययमिति भावः। उचितमिति। उभयत्रविभाषेयम् पूर्वञ्चतुःकरोतीत्यत्रइदुदुपधेति प्राप्तन्निषिध्यतेततऐकरूप्यं प्रापितेषु द्विरादिषुवाविधीयते हक्रोरन्यतरस्यामितिवत्। अत्रमानन्तिरसःसुचोन्यतरस्यामिति न्यासेपियथायथं षत्वसत्वयोरन्यत्रेवात्रापि सम्बन्धेनोपपत्तौ योगविभागएव नचयोगविभागान्निषेधमुखेनैव प्रवृत्त्याचतुः शब्दमात्रविषयकत्वमेव किं नस्यादिति वाच्यम्। योगविभागेननभवतीत्यर्थकल्पनेपितिरसित्यत्रक्लप्तस्यवाभवतीत्यर्थस्यत्यागेमानाभावात्। योगविभागेनानिष्टापादनस्यानुचितत्वाच्च। ननूक्तरीत्याकृत्वोर्थइति न्यासेपि दोषःसुवारइति चेन्न। तत्रन्यासेकृत्वोर्थांशे इदुदुपधेतिविशेषणान्वयेन द्वन्द्वाप्राप्त्यातिरसोऽन्यतरस्यांकृत्वोर्थइति व्यस्तपाठेवाक्यार्थह्ययावश्यम्भावेनैकयोगेविभागेवासाम्ये-

* स्युः पाडित्यत्रसामानाधिकरण्यान्वयेनविसर्गप्राप्तिरिति भावः।

न सामर्थ्याभावात् । सामर्थ्याबलवनस्यावश्यकत्वेसुचइत्यत्रैवलाघवाच्च अप्राप्तविभाषात्वेतुचतुः करोतोत्यत्रास्यासिद्धत्वान्नित्यंवत्वम् इदुदुपधस्येति स्यात् । अन्येतुकस्कादिषु भ्रातुष्पुत्रशब्दपाठेनलोपनिमित्तरेफस्थानिकविसर्गस्येदुदुपधेति षत्वंनेतिज्ञापनादित्याहुः । अपरेतु प्रत्ययावयवभिन्नस्येत्यर्थेविध्यर्थत्वात्पाठोनज्ञापकइत्याहुः । अत्रन्यासेविसर्गान्तेसुजन्तत्वन्तु भूतपूर्वगत्यासुच्त्वस्यस्थान्यलवृत्तित्वात्सुजन्तत्वस्याशास्त्रीयत्वादतिदेशाभावेन सांप्रतिकाभावात् । यत्तुइदुदुपधेति सूत्रंकस्कादिषु चैत्यतःप्राक् पाठ्यमित्याशयः अतः [illegible]सिद्धत्वंकृत्वोर्थइति त्वनुवृत्त्यनुरोधात् । तदुक्तमेवैत्यसिद्धिरेवेति तन्नविकल्पप्रवृत्त्यऽनन्तरंनित्यविधेरभावपक्षेदुर्वारत्वात् । नमस्पुरसमासेऽन्तरपदस्थस्य अतःकृ अधःशि इसुसोःसमाथ्र्येऽन्यतरस्यान्तिरसः । कृत्वोर्थे इदुदुपधस्य नित्यमप्रत्ययस्य कस्कादिषु एवं तत्रापि शक्यत्वाच्च।पदस्येत्यर्थादिति । विसर्गान्तस्येत्यपि पदविशेषणं बोध्यम् । जायमानं षत्वमऽलोन्त्यस्येत्यन्त्यस्यापदस्ययोविसर्गइति वैयधिकरण्येतु ओजोभिःकृतंद्विरित्यादौ मध्यमस्यषत्वंस्यात् । ओजःसहोम्भसितितृतीयाया अलुक् वस्तुतोद्विवचनबहुवचनयोरलुक्नाऽनभिधानादिति । अलुगुत्तरइति सूत्रभाष्योक्तेरीदृशःप्रयोगएवने ति बोध्यम् । सूत्रेइतिकरणं किं कृत्वोर्थेविद्यमानस्यविसर्गस्य द्विवारंत्रिवारंचतुर्वारंषोमाभूत् अपत्यंपशुरिति वदर्थेऽसम्भवात्स्वरूपमित्यस्याऽवृत्तिः स्यात् । द्विस्त्रिश्चतुरिति न्यासेतुनलाघवमिति वदन्ति नचेदुदुपधस्येति।

अयोगवाहानामविशेषेणपाठपक्षउपधासंज्ञारूपदत्तफलखण्ड-नायोपधाग्रहणमिति प्रागुक्तपक्षात्प्रथमपक्षत्वेन तत्रोक्तमिदम् । इदुदुपधस्यपदस्याबयवोयः सकारस्तस्येत्याद्यर्थः । एतदुपपत्ति इच्छायायां स्पष्टेत्याहुः । तत्र विसर्गग्रहणं विसर्गस्थान्युपलक्षकमित्याह । विसर्गेति । संपुंकानामित्यनेनेति । एषांशब्दानामित्यने नसमःसुटीत्यादिसूत्रत्रयेणेत्यर्थः । इत्येवेति । सूत्रमस्त्विति शेषः । नित्यषत्वापत्तेरिति। उकारानुवृत्तिसामर्थ्यात् तद्दाधइति प्रकृतसूत्रस्थप्रदीपोक्तन्तुनयुक्तम् । इकारानुवृत्त्यास्वरितत्वसार्थक्यादुकारेपृथक् स्वरितत्वेमानाभावात् । द्विस्त्रिरित्येववक्तव्येकृत्वोर्थग्रहणसामर्थ्यात्तद्दाधइत्यपिनेतिशब्दोपादानफलस्यप्रागुक्तत्वात् । तत्करणेतुविपरीतगौरवापत्तेः । कृतत्सामर्थ्यमिति । दूषितएवेति दूषितप्रायइत्यर्थः । सूत्रेचेति । चोऽन्तेयोज्यः । किञ्चपूर्वत्रेति । सिद्धान्तेतुवृद्धिरादैजित्यारभ्यस्वावधिकः स्वाव्यवहितश्चसमूहः पूर्वशब्दार्थः स्वव्यवहितपूर्वग्रहणेतुततः परत्वस्यसपादसप्ताध्याय्यामपि सत्वेनतत्राप्यसिद्धत्वापत्तेः स्वस्मात्परग्रहणेतुत्रिपाद्यामनन्तरं पूर्वप्रत्यन्तरं नासिद्धंस्यात् । समूहदृष्ट्याऽसिद्धत्वेफलाभावात् । प्रतियोगंपर्यवस्यतितदिति भावः । इतएवारुचेराह । किञ्चास्येति । सप्ताध्याय्यामिति सपादेत्यादिः । प्रतिसूत्रमिति । अतएवाऽधिकारःपुनःप्रतिसूत्रंनिर्देशार्थइति योगेयोगउपतिष्ठतइतिभाष्यम् । इसुसोरिति । सख्युरिति । लाक्षणिकत्वेनास्यव्यावृत्तिर्बोध्या। कविभिरिति । अव्युत्पत्तिपक्षेऽर्थवानिससम्भवोति भावः । साहचर्यादि-

ति । उत्तरसूत्रविषयेसमासरूपप्रातिपादिकावयवयोरेवेसुसोः संभवेनेहापि तथाभूतयोरेवग्रहणं तथाभूतयोःसुपतिङ्भिन्नयोरेव सम्भवत्येतत्साहचर्यादुत्तरसूत्रेपि सुपतिङ्भिन्नयोरेवग्रहणमिति। ओजोभिःकृतंसख्युःपाकइत्यादावलुकिचक्रुःपेचुरितिसततंयत्राभिधीयतेसाचक्रुःपेचुरित्यादौ चनोत्तरसूत्रप्रवृत्तिरिति बोध्यम् । तिङ्भिन्नेस्साहचर्यादुसतिङ्भिन्नस्सुबऽवयवभिन्नप्रतिपदोक्तोसासाहचर्यादिसपितथैवेति भावः। पदावयवेति । फलितार्थकथनमिदं वाच्यार्थस्त्विसुसन्तविसर्गान्तं यत्पदन्तदन्तस्याल आदेशइति तेनौजोभिः कृतंसर्पिष्करोतीत्यत्रपूर्वस्यनपूर्वोक्तरोत्यातस्यासत्वाच्च तयोर्व्यपेक्षाविरहाच्चाअत्रेसुसोःप्रत्ययोरर्थवतोश्चग्रहणमिति कैयटदीक्षितौ । अतएव पूर्वसूत्रस्योभयत्रविभाषात्वं सर्पिषायजुषेत्यादौ षत्वायेसुस्विषयेव्युत्पत्तिपक्षएवेति तदाकूतम् । अतएवेयमप्राप्तविभाषेति । तदानुरोधेनाह । नचेति । निष्कृष्यव्यपेक्षायांमानाभावादाह । उत्तरपदइति । तस्यकार्यित्वस्यवस्तुतः पदान्तविधित्वस्यचसत्वात् । उपात्तत्वञ्चतत्रोक्त्यानुवृत्त्यावेत्यभिप्रेत्याह । उपात्तेति । ज्ञापनेनेति । ननु पूर्वसर्पिःप्रियइत्यादौ मध्यमपदत्वाक्रान्त उतरपदेतिनिषेधाप्राप्त्येसन्तस्यपदत्वेन निषेधश्चरितार्थइति वाच्यम् । समासेनपूर्वपदाध्याहारेणेसन्तस्य पूर्वपदत्वाभावइति ज्ञापकपरभाष्याशयात् । अध्याहारफलन्तुपरमंसर्पिःप्रियंयस्येति त्रिपदेऽप्रवृत्तिः । अन्येत्वथचेत्कृदन्तमेतत्ततोऽधिकेनैवमेवभवेत्प्राप्तिरितिभाष्यस्यपरमसर्पिः कुण्डिकेत्युपक्रम्यप्रवृत्तस्य तथावाक्येपि तर्हिनप्रा-

ष्नोतिपरमसर्पिः करोतीति भाष्यस्यचेसन्तएकार्थीभावव्यपेक्षयोरभावइत्येवाशयो नतूत्तरपदइति निषेधेनेसन्तस्यपदत्वाभावइति मध्यमपदत्वाक्रान्तत्वेन प्लुतात्परत्रसत्वेनचतन्निषेधाप्रवृत्तेरित्याहुः ॥ तदन्तार्थकस्येति ॥ इसुसित्यस्येत्यर्थः ॥ धातुसहचरितेति । इदंसमर्थसूत्रकैयटानुरोधेन स्नुक्रमोरिति सूत्रस्थभाष्यरीत्यातिङाङ्कर्मादियोतकत्वेतु यथाश्रुतमेवसम्यक् इति तत्रैवोद्द्योते स्पष्टम् । नेति । इदंफलितार्थप्रदर्शनं । पर्युदासस्यन्याय्यत्वेनधात्वभिहितभिन्नमऽसमर्थवदित्यर्थः । ननु समानाधिकरणं धात्वभिहितंसमर्थवदित्येवास्तुसमानाधिकरणं चेद्धात्वाभिहितमेवेति नियमादिष्टसिद्धेरिति चेन्न । धात्वभिहितञ्चेत्समानाधिकरणमेवेति विपरीतनियमापत्त्यासर्पिः पाठकःपिवतीत्यादौ षत्वापत्तेः। वक्तव्यइति। नवक्तव्यःऋतेरीयङितिज्ञापकात् । नधातुप्रत्ययानामादेशाइति शेषः । अतएवाग्रे चःपठ्यतेभाष्ये ॥ नित्यग्रहणंत्विति समासग्रहणन्तूतरार्थमिति भावः । ननु व्युत्पत्तिपक्षेऽनुत्तरपदस्थस्येति पर्युदासात् । समासेलब्धेकिमर्थं समासग्रहणमिति चेच्छृणु पर्युदासेनपदात्परपदस्थस्यैवेत्यादेरपि वक्तुंशक्यत्वेनानयसर्पिः पठत्ययं परमसर्पिः कुण्डिकेत्यादावेवस्यादिति भाष्यइति। एवञ्चतिष्ठतुसर्पिष्पिवत्वमित्यादौ सर्पिष्काल्कमित्यादौ चनित्यंसमासत्वंन्याय्यम् । भाष्येसविसर्गपाठस्तुव्युत्पत्तिपक्षाभिप्रायेणेति बोध्यम् । व्याख्यानादिति । तच्चनित्यंसमासइति सूत्रेभाष्येस्पष्टम् । सिद्धेरिति । भावइति । अयंभावः । असमासेऽप्यपेक्षाविरहेपि षत्वार्थइति वक्तुःप्रत्ययसम्बन्धिभिन्न-

विसर्गस्य षत्वमित्येवार्थः सम्मतोऽयुत्पत्तिपक्षश्चान्यथाऽप्यपेक्षाविरहेपि प्रत्ययभिन्नविसर्गस्येत्यर्थे इदुदुपधेति षत्वसिद्ध्यापत्वार्थइत्यस्यासङ्गतेः । व्याख्यादर्शरीत्याह । व्यपेक्षायामिति । एवञ्चषत्वार्थइत्ययं ग्रन्थःसिद्धान्तभूतोऽयंत्वन्यदीय एवं नायंसर्वग्रन्थएकमतानुसारीति भावः । तथाचास्थितपरमतेपि गणेपाठोनित्यार्थआवश्यकइति तत्सामर्थ्यादुत्तरपदस्थस्यापि षत्वमिति वक्तुरतिमन्दत्वसूचनायाप्यर्थकश्चः पठितइदुदुपधेति सूत्रस्थमनोरमाग्रन्थस्तु व्याख्यादर्शानुसारेणेतिनतद्विरोधः । एकमतानुसारेणसर्वोग्रन्थोयोज्यइत्याग्रहेत्वितएवारुचेराह । व्यपेक्षायामितीति योज्यमित्याह । विकल्पेति । तदऽभावेनित्यविधिस्तुनविकल्पविधीनां सतिसम्भवेनवेतीत्यारम्भेणोभयत्रविभाषात्वात् । नचसिद्धत्वमाश्रयात् । असिद्धत्वाद्विकल्पइत्यापाद्यमानग्रन्थस्तु चिन्त्यएव यद्वा साहचर्य्येणविकल्पविषयेऽप्राप्तत्वादितितदर्थः । आक्षिप्तेति लक्षानुरोधादऽध्याहृतेत्यर्थः । पुनरुक्तौवीजमाह । तपरेति ॥ इति शेखरविवृत्तिसंग्रहेविसर्गसन्धिः ॥ रूरेवेति । रामइत्यादौ सुपिचेतिदीर्घस्तुनानाप्यकइत्यत्रेवापि चेतिन्यासात् । नन्वेवंङ्यापःसोरितिनिष्कर्षेहेप्रियचत्वइत्यत्रारात्सस्येतिनियमात्संयोगान्तलोपाप्राप्त्यारोरीति लोपेढ्रलोपइति दीर्घापत्तिरिति चेन्न । तस्यनिष्कर्षस्यदूषयिष्यमाणत्वात् । चारितार्थ्यादिति। अप्लुतादित्यस्यतुनसामर्थ्यंवात्सीवन्धुरिति भाष्योपष्टम्भेनाऽसम्बुद्धावपि प्लुतप्रवृत्तेः रुक्तत्वेन आयातुभवान्देवदत्तोऽद्यगच्छामीत्यादौ चारितार्थ्यात् । हलोऽनन्तरासंयोगान्त-

लोपोरोरुत्वइति ज्ञापकान्नासिद्धत्वमिति चेदापीति न्यासे-नकिञ्चिल्लाघवमिति बोध्यम् । सजुषोरुरित्यत्रोकाराऽनुब-न्धस्तु यत्वविधावुभयग्रहणाभावार्थइति तत्सामर्थ्यादऽसिद्ध-त्वंनेति नवक्तुंयुक्तम् । भाष्येस्पष्टमिति । अवत्यन्तत्वंपरि-भाषेन्दुशेखरविवृत्तिसंग्रहेस्पष्टम् । जश्त्वेति । बाध्यविशेषचि-न्तायां येननाप्राप्तिन्यायेनेति भावः । बाध्यसामान्यचिन्ता-यान्तु श्रेयानित्यादौ सुलोपंबाधित्वारुत्वेयणः प्रतिषेधारम्भात् झलोलोपाद्दासनस्यादिति भावः । दिगित्युक्त्याबाध्यसामा-न्यचिन्तायां भाष्योक्तपक्षान्तराणांसंग्रहइति बोध्यम् । उत्व-गुणयोरिति । ननु कृतेप्युत्वेतस्यस्थानिवत्वेनरुत्वाद्यत्वं स्या-दऽत आह । गुणेति । तत्रकृतेऽपूर्वत्वाभावात्तदऽप्राप्तिरिति भावः । व्याख्यानेति । तच्चप्रकृतसूत्रभाष्यादिषु स्पष्टम् । स्पष्टार्थमिति रूढिप्रयोजनयोरभावेन लक्षणयाप्रयोगस्यान्या-य्यत्वादिति भावः । प्रकृतसूत्रउद्द्योतेस्पष्टमिदम् । अदीर्घत्वा-दिति । यद्यपि बहुश्रेयसीनित्यादौ दीर्घोपिसम्भवति । तथापि दीर्घाजसिचेत्यत्रदीर्घग्रहणाददीर्घस्याऽपि ग्रहइष्टइति भावः । इष्टसिद्धेरिति । गमृनित्यादिसत्यभिधानेसाजात्यातिदेशा-दिष्टसिद्धिरिति भावः । ताविति निर्देशाद्देवदत्त इति न्याया-ऽनित्यत्वमिति कस्यचिदुक्तिङ्कटाक्षयति ताविति तुनात्रेति । तावित्यत्रेत्यर्थः । सतितत्प्रवृत्तौ तेनतदऽनित्यत्वज्ञापनं स-म्भवेदपीति भावः । दत्तजीवनमिति । इति न्यायशरीरमि-त्यर्थः । प्रकृतइति । तावित्यत्रेत्यर्थः । बाधकमितीति । इति हेतौ । एवं स्वस्वविषयज्ञानेशास्त्रद्वयसन्निधावेकापनोदेप्ये-

कस्यप्रवृत्तेर्निर्बाधत्वात्। भूष्टावसरन्यायस्याप्यऽयं नविषय-इति तदऽनाश्रयणज्ञापकतापि कथमस्यनिर्देशस्येति चिन्त्यमेतत्। यौगिकार्थबाधादाह। कस्यचिदिति। अत्वसन्तस्येति दीर्घेतपरव्यावर्त्यत्वादाह। सम्बुद्धाविति। तत्सामर्थ्यादितीति। प्रतिषेधोपादानसामर्थ्यात्सिद्धःप्लुतइति कैयटःविशेषणोपादानेन प्लुतविध्येकवाक्यतापन्नपूर्वत्रेति पूर्वशब्देनोत्वविध्यग्रहणमिति ज्ञाप्यतइति तत्तात्पर्य्यन्तच्चिन्त्यं तथासतितपरकरणेनैव व्यावृत्तिसिद्धौ प्रवर्तकतयानिवर्तकतयावाऽचारितार्थ्यस्य दुर्वारत्वात्। अप्लुतादऽप्लुतइत्यनयोरन्यतरस्य वैयर्थ्यापत्तेश्च। अतएव सऽउच्चारणंरुच्चारणमिति। षष्ठीसमासेसुस्रोतसः रुच्चारणमिति। पुनस्तत्रसस्यरुत्वेरोरीति लोपेदीर्घत्वेसुश्रोतारुच्चारणमिति भवति। अत्रह शिचेत्युत्वंनऽसन्तसकारस्थानिकरुत्वस्यासिद्धत्वेनहशपरत्वाभावात्। रुत्वविध्येकवाक्यतापन्नपूर्वत्रासिद्धमिति पूर्वग्रहणेनोत्वविध्यग्रहणमिति कल्पनेतुतदापत्तिर्दुर्वारास्यात्। किञ्चैवमर्थाधिकारात्सर्वत्रयाग्रहेमनोरथोपिनस्यात्। अत्रचज्ञापकन्तपरत्वेकृतेप्यप्लुतइति कृतन्तदाह। प्रतियोगित्वेनेति। एवञ्चाश्रयात्सिद्धत्वं वदतोज्ञापकत्वमनऽङ्गीकुर्वतोममनपूर्वोक्तानुपपत्तिरिति भावः। ज्ञापकस्थलएववक्तुंशक्यत्वात्। विशेषणद्वयंप्लुताऽसिद्धत्वाभावप्रतिपादनद्वारातपरकरणकृतप्लुतव्यावृत्त्यनुवादकमितिनदोषइति मान्याः। हेपयोडिति। केषाञ्चित्तुमतेहेहेप्रयोगइति सूत्रस्थविध्यर्थतोक्तेस्तद्रीत्यासेप्लुतप्रयोगोऽन्यथाहेहयोरेवेति नियमान्नस्यादिति। एकपदइति।

समस्तस्येत्यर्थः । वर्णद्वयंस्थानिभिन्नं ग्राह्यम् । अन्यथावर्णत्वयापेक्षत्वेनहृयेत्यऽसङ्गतं स्यात् । स्थानिनोनिमित्तत्वानाश्रयणाच्च । हेतुगर्भश्चेदं विशेषणम् । उत्वइति । आदावित्यादिः । परत्वादिति । इदञ्चकार्य्यकालतायां यथोद्देशेतुविपाद्यासिद्धत्वाद्विप्रतिषेधसूत्रस्यतत्राप्रवृत्तिः तत्रसूत्रेयथोद्देशएवेतिग्रन्थस्तुफलाभावात् कार्यकालतानेत्येवं परःसिद्धान्ते ॥ अयन्त्वन्यथाकोटिप्रविष्टइति पूर्वपक्षग्रन्थप्रायइति नविरोधइति बोध्यम् । यद्वा वक्ष्यमाणरीत्यास्वदृष्ट्यासिद्धस्यापि परस्यपूर्वंप्रतिसिद्धस्यवलीयस्त्वबोधनेन प्रतिबन्ध्यकमित्याहुः । ननुत्रैपादिकेऽन्तरङ्गपरिभाषानेति सिद्धान्ततत्वात्कथमिदमित्याह । परिभाषेति । नक्षतिरिति । अयंभावोऽन्तरङ्गशास्त्रमऽस्यालिङ्गमित्युक्तत्वादियं परिभाषावहिरङ्गंमापश्येदिति प्रतिपादयति । अन्तरङ्गंप्रतीति गृहीतोपदेशमुत्वम् प्लुतंकथंपश्येत् । यथाजाततत्वसाक्षात्कारेणमिथ्यात्वेनजगन्मिथ्येति गृह्णताशिष्यंप्रतिजगन्मिथ्येत्युपदिश्यतेतद्वदिति । परंप्रति । अन्यम्प्रतिनन्वेवंराज्ञइत्यादौ श्रुत्वानापत्तिरल्लोपस्यासिद्धत्वादत आह । अन्तरङ्गस्येति प्रतिपाद्ये ति यम्प्रतिपाद्यतउपदिश्यते तदऽभावइत्यर्थः ॥ इदञ्चयथोद्देशेत्रैपादिकेऽन्तरङ्गेऽसिद्धत्वेप्रतिबन्धकम् । कार्यकालतायान्तु पूर्वत्रासिद्धमित्यनेनविरोधादिकं ग्रन्थान्तरतोऽवसेयम् । स्पष्टंभाष्यइति । नन्वेवमेकादेशात्प्लुतोविप्रतिषेधेनेति प्लुतप्रगृह्याइति सूत्रभाष्योक्तविप्रतिषेधाऽनुपपत्तिरन्तरङ्गबहिरङ्गयोर्विप्रतिषेधायोगादिति चेन्न । देवदत्ता३ असिगच्छामि३ अहमित्यादौ

तयोःसमत्वेनतद्योगात् । यत्रतुनतथाएहि कृष्णा३अलगौश्वर-
तीत्यादौ तत्रास्तामन्तरङ्गत्वात्प्लुतइति तत्रैवोद्द्योतेस्पष्टम्
अनन्त्यस्यापि प्रेति । पूर्वोदाहरणयोःप्लुतोबोध्यः । नन्वऽनुव-
ध्यतइति व्युत्पत्त्योकारपररेफस्य ग्रहणेनप्रातरत्रेत्यादिव्या-
वृत्तावपिरुधातोरवारणमत आह । उकारेत्संज्ञकेति । अनु-
नासिकनिर्देशादोदृशार्थलाभः । तत्रैव किंमानमितिचेत् ।
व्याख्यानमेव गृहाणइकोगुणेति निर्देशाद्धेतोरऽर्थवतोरोम्र्ह-
णाद्यशोऽत्रेत्यत्रोत्वंनस्यादितिन वाच्यम् । अशब्दान्तद्वन्द्वे-
नेति पूर्वनिपातप्रकरणमनित्यमिति भावः । मूलेऽसन्धिः-
सौत्रइति । सूत्रेकृतःसौत्रःकृतलब्धेत्यण् नचानुकरणऊचा-
नितिपरमिति निपातत्वेओदिति प्रगृह्यत्वेऽन्याय्यत्वमेवसन्धे-
रिति वाच्यम् । तस्यकृञोयोगेऽवप्रवृत्तेः । न च प्राग्दीव्य-
तोऽणित्यत्रैवैकदेशविकृतन्यायेन निपातत्वातिदेश उभयाऽनु-
करणेऽप्यन्यतराऽनुकार्यनिष्ठधर्मातिदेशस्य भवतेरइति सूत्रे-
शेखरेध्वनितत्वादिति वाच्यम् । निपातत्वस्याक्तपरिमाणनि
ष्ठत्वात् । भगोअघोशब्दयोर्निपातत्वाऽनङ्गीकाराच्च । वस्तुत-
इति । अघोशब्दान्तद्वन्द्वे सूत्रतःषष्ठोलुक् नन्वेवंसौत्रत्वस्याव-
श्यकत्वेकुतोऽस्यावास्तवत्वमिति चेन्न । अत्रपक्षेऽर्थवत्परि-
भाषासञ्चारेणविभोरिदं सुप्रभगोरिदमऽघोरिदमित्यादेर्वार-
णात् । ओदन्ताऽनुकरणेत्वऽसम्भवात् तत्संचारोमस्यात् ।
यद्वासान्तरान्तोभयाऽनुकरणस्य मूलकृतोक्तत्वात् । सान्तप-
क्षस्यभाष्याऽसम्मतत्वसूचनायवस्तुतइत्युक्तम् । अतएवम-
तुवसोरिति सूत्रेभोशब्दस्य विभक्तिप्रतिरूपकनिपातत्वमु-

क्तम् । विभक्त्यन्तऊचवार्तिकनिष्पन्नंरान्तमेवेति तत्सदृश-त्वेनरान्तस्यैवनिपातत्वसिद्धिः । सान्तनिपातसत्वेतुमाना-भावः । इदमेवाभिप्रेत्यशब्दरत्नेभाष्यस्वरसोप्येवमेवेत्युक्त-म् । सान्ताऽनुकरणेरान्तानांनस्यादित्यपि शब्दरत्नोक्तम-ऽनुसन्धेयम् । लोपेचेति । एतेनासाधारणनिवेशस्यसम्मतिं सूचितवान्नियमशास्त्राणीति नन्वऽश्ग्रहणाभावेयत्वार्थंसूत्र-स्यावश्यकत्वेनकथं नियमार्थंकत्वमिति चेन्न । तावन्मात्रफ-लकत्वेप्रक्रियालाघवायभोभगोइत्यऽनन्तरमिदं पठित्वाऽनेन-यत्वमेवविदधीतेति । निषेधकानीति । इतिहेतोः । पयःखि-त्यादौ दोषइत्यन्वयः । हेरामेत्यादाविति । आदिनातेंजस्विन्-पाहीत्यादि । पदत्वासिद्धिरिति । तथाचपदात्परत्वाऽभावेपा-हीत्यस्यनिघातोनस्यात्तेंजस्विन्नित्यस्याविद्यमानत्वात् । रा-मेत्यत्रनामन्त्रितइति निषेधेनतत्वाभावात् । हेशब्दाश्रयोपि नसइ*यंशङ्काकार्यकालपक्षेपि स्फुटैव यथोद्देशेपिनित्यत्वाल्लो-पेतदऽसिद्धिरेव प्रकृतेलोपेनतदऽनुत्पत्तेरेवान्वाख्यानाद्वा । सुब-न्तत्वेति । न च विशेषणतयालाश्रयणम् । अलमात्रवृत्तिधर्मा-ऽघटितेत्युक्तत्वात् । इदऊचनिमित्तरूपकार्याऽतिदेशपक्षेवि-धेयरूपकार्याऽतिदेशेप्याह । तत्प्रयुक्तेति । प्रत्ययलक्षणेना-पीति पूर्वान्वयि । ननुतेनसुप्त्वमेव कुतोनातिदिश्यतेतत्राह । न प्रत्ययेति । तन्निमित्तकव्यवहारस्यवेति सचाशास्त्रीयोपि-दोषाऽभावात् सङ्कोचेमानाभावाच्च । एवमिति । यथाऽग्र-हीदित्यत्रेट्त्वेनस्थानितेति तद्वृत्तीट्त्वातिदेशात्सलोपस्त-

* नन्वित्यारभ्यमूलोक्ता ।

थेत्यर्थः । उक्तरीत्येति । अनल्निष्ठधर्मत्वेन सुत्वादिनेत्यर्थः । हलितितुसुतिसीनां विशेषणमिति भावः । उक्तरीत्यायस्स्थानीतत्रेत्यन्वयःस्थानिनिसकारेजायमानस्यसावपिपदमिति पक्षेप्राप्तरत्वाभावायप्रवर्तमानस्यादेशेलोपेपरतो नतूत्तरेणसमानाधिकरणम् । तत्परेऽतिदेशेनप्रवृत्त्यादोर्घाहन् शब्देनदीर्घइति योजना । दिगिति । दिगर्थस्तु हल्ङ्याबितिसूत्रेसुत्वादिनास्थानितेति श्रौतेपि तत्रनदोषः । अन्यथाप्रपठेत्यादावऽतिदेशत्वात्स्यादिति । साग्नीलोम्नोरामायेत्यादिरनुसन्धेयः । एतेन सुप्परत्वस्याशास्त्रीयत्वात्कथमतिदेशइत्यानुमानिकेपि कथमऽल्विधीनामतिदेशः । अन्यथाद्युकामइत्यादौ वलिलोपः स्यादितिचापास्तम् । मतेनेति । अन्यथावार्तिकसिद्धविभक्त्यन्तप्रतिरूपकत्वेननिपातत्वमिति भाष्योक्तमनायाससाध्यंमार्गमऽपहायाऽऽकृतिगणत्वेनचाद्यन्तभावंनकुर्यादिति भावः । त्रयाणामिति । ननु निपातभोःशब्देनैव सर्वेषांफलानामऽन्यथासिद्धिंप्रदर्श्यद्वयोरेवाऽऽवश्यकत्वमुक्तं शब्दरत्नेतत्कथमुच्यते त्रयाणामावश्यकत्वमिति चेच्छृणुवार्तिकविहितस्यौकारस्यसिद्धत्वेनरोस्त्वाश्रयात्सिद्धत्वेनातःपररोःसत्वेनोत्वओत्वस्यासिद्धत्वेनातः परत्वादादगुणेपूर्वरूपेभोऽच्युतेत्यादेःसिद्धिरिति फलसत्वादिति । इदन्तुचिन्त्यम् । भोभगोइति सूत्रओतोगार्ग्यस्येति वत्ओतआद्योशोत्येवसिद्धेपूर्वग्रहणंकिमर्थम् । एवंहि पञ्चमीनिर्देशादऽव्यवधानांशस्यानायासेनलाभो यथान्यासेतुभगोअघोग्रहणेन ज्ञापकेनसाध्यतइत्यपि गौरवमिति । व्योर्लघु । सौत्रत्वादिति । समाहारद्वन्द्वविषयएकशेषाप्रवृत्ते-

दृगुणइत्यादाविवैकेनैवादेशेनोभयोर्निवृत्त्यापत्तिरन्यथास्यादिति भावः। एवमेवजश्झांशससजुषोरुःत्यदादीनामः व्रीह्यादिशाल्योर्दगिइत्यादौ बोध्यस्तत्तत्कुतानसौत्रत्वमुक्तमिति चिन्त्यम्। यद्वाभोभगोइति सूत्रावयवग्रहणानुवृत्त्यायकारस्यैवादेशत्ववारणायव्योरित्यावर्त्योभयोरादेशत्वमिति तद्वित्वेनतद्विशेषणस्यावश्यकत्वेन सौत्रत्वंविनागत्यन्तराभावादित्याशयइति। वृत्तिरिति। अत्रास्वरसबीजन्तुरोरित्यनुवर्त्यरोःस्थानेयौव्यौतयोरित्यर्थेनालाप्राप्तिरेवेति। वग्रहणन्तुलोपः शाकल्यस्येत्युत्तरार्थमेवातएवहरयिहविष्णविह्नेत्यत्रैतत्सूत्रोल्लेखः स्पष्टऊचेंदं भोभगोरिति शेषउद्द्योते। ओतोगार्ग्यस्य। यकारसाहचर्यादिति। अत्रेदंचिन्त्यम्। त्वमत्रकायत्रेत्यादौ दस्यरुत्वेयत्वेतथाभूतस्यापि यस्यसम्भवात्कथमेतदिति। एरथोंयर्थस्तमिच्छतियर्थीयतोत्यादौ तत्सम्भवाच्च। विच्छेदादिति। लोपःशाकल्यस्येत्यत्रेति भावः। तत्रहि शाकल्यस्यैवेत्यर्थसत्वाद्भोसस्तुगार्ग्यादिमतेपि लोपसत्वेनवाच्यार्थविरोधान्नसम्बन्धइति भावः। भोसादिपूर्वकइति। उच्चारणार्थाकारेणनिर्देशोऽतोनरुत्वादि। भाष्यानुसेति। अत्रयद्वक्तव्यन्तल्लोपःशाकल्यस्येत्यत्रोक्तम्। हलिस। उभयोरपीति। अन्यमतेचरितार्थस्यास्यासिद्धत्वादादेशेतदुत्तरंलोपइत्याशयः सर्वेषांग्रहणवोधितशाकटायनमतविहितनिरवकाशलोपेन बाधादादेशाप्रवृत्तौ स्थानिनोलोपेनोभयोरदर्शनमिति वेति प्राप्नोतीति यवयोःशाकल्यस्यैवमतेलोपो यवयोर्हलिसर्वेषांमतेलोपइत्यनयोर्विरोधेन रत्नमुट्खित्यादौ जश्त्वचर्त्वयोरिवसिद्धशास्त्रे ण-

व्यवस्थापत्तौमतान्तरेतदऽभावापत्त्याविकल्पापत्तिरिति भावः। एतेन तदऽभावेनित्यविधेर्दुर्वारतयाशङ्कानिर्दलेत्यपास्तम् । अचीतिकरणेति । मोऽनुस्वारइत्यत्रहलीतिकर्तव्यंसर्वेषां ग्रहणं योगविभागश्चमास्त्वित्याशय यथान्यासोएवसर्वेषांग्रहणवैयर्थ्यस्यादिति कुतोनोक्तमिति चेच्छृणुगार्ग्यस्येत्यस्यासम्बन्धायतदावश्यकत्वादिति। एवं सतिसर्वेषामिति वाक्यार्थविरोधः स्यादितिचेन्न । तस्योपायान्तरत्वात् । वैयर्थ्यापत्तेरिति । पूर्वोक्तोचोतिन्यासएवास्तुसर्वेषामिति मास्त्विति चेत् इष्टापत्तेः । अन्येतूञ्चिचपदइत्यत्रानुवृत्तगार्ग्यपदंनपूजार्थंभानाभावात् । उत्तरसूत्रेपि नित्यत्वार्थकसर्वेषांग्रहणाच्च किन्तुविकल्पार्थन्तेनालघुप्रयत्नेपि विकल्पइति सूत्रकाराशयंवर्णयन्ति पूर्वोक्तरीत्याफलसत्वादाह । अव्यपरेति । ननु शब्दत्वेनसादृश्यग्रहेपि नदोषः । येनविधिरित्यत्रस्वस्यचेति पाठेनसुपभिन्नेशब्देसुबन्तइत्यर्थेनाहोभ्यांदीर्घाहोनिदाघेत्यादिसिद्धेरत आह । सुबन्तइति । वस्तुतःस्वस्यचेत्यस्यवाचनिकत्वेप्यऽसहायस्यैव स्वस्यरूपस्यसंज्ञामन्त्रेषुसर्वेषामित्यादिलिङ्गादिति अहोभ्यामित्यत्रदोषएवेति बोध्यम् । ढ्रलोपे । ननुरित्सुनदोषस्तत्ररेफंपरित्यज्यपकारादेरप्यनुबन्धुंशक्यत्वादुपोत्तमंरितीत्यत्रोपोत्तमंपितोति वाच्यमित्यत आह । चचारेति । दोषापत्तेरिति । न च लक्षणप्रतिपदोक्तपरिभाषयानिस्तारः प्रत्यक्षसिद्धपूर्वत्वासिद्धमित्यस्य वाधापेक्षयालक्षणप्रतिपदोक्तपरिभाषावाधस्यैवोचितत्वादिति भावः । भाष्येत्विति । अयंभावः । कर्मण्यण्यदर्शनंलोपइत्यनेन-

संकेतितस्यग्रहणमित्यस्यवक्तुम् शक्यत्वेनप्रसक्ताप्रसक्त-साधरणदर्शनाभावस्यलुब्धात्वर्थत्वेन ग्रहणापत्तौशिवइहेत्यादौ भावरूपातिदेशेपिस्थान्यदर्शनसत्वेनतज्जनकेति शब्देपूर्वनस्य-दीर्घापत्तिः। नच यलोपासिद्धत्वेन नतत्परत्वंपूर्वपदेनैतत्सू-त्राग्रहस्येष्टत्वात् ममतुप्रसक्तादर्शनस्यैवशास्त्रे लोपपदार्थत्वेन भावरूपेणचादेशेनस्थानिप्रसङ्गस्यैवबाधेनप्रसक्तदर्शनविरहे-णसंज्ञैवनेति न दोषइति स्पष्टंचेदं लोपसंज्ञासूत्रेभाष्ये। सिपिधातोरिति। इत्यनुवर्तमानेदश्चेत्यर्थः। विप्रतिषेधे। पर-स्परेति। अन्यथासर्वथाविरोधाभावेसंदेहाभावेनषष्ठीस्थानइत्य-स्येवास्यापि प्रवृत्त्यभावेसिद्धेविप्रतिषेधपदवैयर्थ्यापतिस्तेना-सिद्धत्वविषयेऽन्यतरविरोधेपिपरस्परविरोधभावेननास्यप्रवृत्तिः। प्रवृत्तिकालइति। तदवच्छिन्नेकालइत्यर्थः। तत्प्राक्कालउत्तर-कालेचतत्सत्वेपितत्काले तदसंभवरूपविरोधस्यैतत्प्रवृत्तौनिया-मकत्वम्भाष्यात्स्वीक्रियतइति भावः। पुनर्द्धिर्भवतीति। तदभा-वपक्षइति भावः। एतत्तदोरनन्तरइति। स्विति। प्रत्ययग्रहणा-त्तदन्तग्रहणसत्वेन तदादीत्यस्योपस्थित्यैतदन्ततदादेरनंतरस्य-लोपइत्यर्थेनरामः सददातीत्यादौ नदोषइति बोध्यम्। इति-शेषरविवृत्तिसंग्रहेस्वादिसन्धिः॥ स्वादिविधौप्रातिपादिका-धिकारादिति। ङ्याब्ग्रहणंत्वन्यार्थमितिभावः। एतेनङ्यापो-स्यधिकारात् तस्यचप्राथम्यात्सूचीकटाहन्यायात् स्त्रीप्रत्ययप्रक-रणमादौबक्तुमुचितमित्यपास्तम्। तद्विधावपि प्रातिपदिकाधि-काराच्च। तांसंज्ञामिति। तत्संज्ञाविधायकम् सूत्रमित्यर्थः। यथाश्रुतेऽर्थवदितीत्यनेनाभेदोवाधितः स्यात्। अत्रेति। केचि-

त्वेतत्संज्ञाफलभूतविभक्तिभेदकूटविशिष्टस्वव्यभिचारिकप्रत्ययप्रकृत्यन्यतरसमभिव्याहारानपेक्षयालोकेऽर्थविषयकबोधजनकत्वमर्थवत्त्वम्। देवदत्तोभवति देवदत्तोगार्ग्यइत्यादौ देवदत्तोगार्ग्यइति समुदायस्याप्रत्ययान्तस्याधातोश्च विभक्तिप्राग्भूतस्यसंज्ञावारणायैतत्संज्ञाफलभूतत्वेन विभक्तिर्विशेषिताऽर्थवत्त्वमादायचिकीर्षितायासञ्ज्ञातत्फलेत्यर्थः। देवदत्तोगार्ग्यइत्यत्रगार्ग्यप्रकृतिकस्यसुपोगर्ग्यइत्येतन्निष्ठसंज्ञाफलभूतेपिचिकीर्षितदेवदत्तोगार्ग्यइत्येतन्निष्ठसंज्ञाफलभूतत्वाभावान्। नातिव्याप्तिः। एतेनसुबितरेत्युक्त्यैवतिङ्विभक्तिव्यावृत्तौसिद्धायांविशे*षणंव्यर्थमित्यपास्तम्।खट्वे त्यादावव्याप्तेश्चसिद्धान्तेतु विभक्तिग्रहणंप्रत्ययोपलक्षणमितिखट्वादौ नदोषश्चालिनीन्यायेनासम्भववारणायभेदकूटेति। उभयभेदमादायासम्भववारणायविभक्तित्वेतरधर्मानवच्छिन्नप्रतियोगिताकत्वम्भेदकूटविशेषणमवश्यंदयमेवेति। अतएव तत्तद्भेदमादायनदोषः। तत्तद्भेदस्यविभक्तित्वेतरतत्तारूपधर्मावच्छिन्नत्वात् किमर्थंभेदकूटेतिचेदत्रैवतात्पर्यात् सांकूटिनम्पक्रिममित्यादौ संकूटिन्पक्रिइत्येतेष्वण्मबुपेक्षेष्वव्याप्तिवारणायस्वव्यभिचारिकत्वेनप्रत्ययोविशेषितः। नन्वलौकिकप्रक्रियावाक्येपाकेननिर्वृत्तमित्यत्रस्वव्यभिचारित्वमितितुन। स्वव्यभिचारिकेत्यत्रस्वंव्यभिचारियस्यस यस्यप्रातिपदिकसंज्ञाचिकीर्षितासस्वपदार्थः। तत्वंचयत्वयत् व्यभिचारित्वमानेयंतदसमवायिपरिनिष्ठितसमवायित्वन्तत्रतदस्तिचदेवदत्तोगार्ग्य-

* एतत्सञ्ज्ञाफलभूतेति विशेषणम्।

इत्यत्रतथासुप्रत्ययव्यभिचारित्वंदेवदत्तोगार्ग्यइत्यत्रानेयंतादृ-
शोयःसुस्तदसमवायित्वअमाद्यन्ते देवदत्तोगार्ग्यं राज्ञःपुरुषमि-
मित्यादौपरिनिष्ठितदेवद त्तोगार्ग्यत्यस्यसमवायित्वात् साँकूटि-
नादौतुसंकूटिनूपक्त्र्यादीनामण्मबाद्यसमवायिपरनिष्ठितस-
मवायित्वंनास्तीतिनाव्याप्तिः । पञ्चनावप्रियइत्यत्रसमुदायोत्तर-
स्वाद्यपेक्षत्वेनटजंतस्ययथानप्रातिपदिकत्वन्तथासाँकूटिनं प-
त्क्रिममित्यादौ तदपेक्षत्वेनार्थवत्वाभावेनतन्नस्यादतः प्रत्यया-
व्यवहितत्वेनप्रत्ययोविशेषणीयोयस्यार्थवत्वमानेयंतस्यापेक्ष्यमा-
णप्रत्ययस्यचमध्येप्रत्ययययोर्व्यवधायकोनचेदितितदर्थः। सर्वत्र-
विभक्त्यवयवमादायासम्भववारणायमूलकेनोपदं शमित्यादौ
सोपपदकउपपदापेक्षत्वेनाव्याप्ति वारणायैधाञ्चक्रइत्यादौचा-
ऽनुप्रयुज्यमानापेक्षत्वेनाव्याप्तिवारणायचनिभसंकाशादीनामु-
त्तरपदएवप्रयुज्यमानानां पूर्वपदार्थापेक्षत्वेनाव्याप्तिवारणाय-
चोपसर्गाणांधात्वपेक्षत्वेनाव्याप्तिवारणायचप्रत्ययेतिनिवेशःप्र
प्रत्ययमात्रेकृदादावतिव्याप्तिवारणायप्रकृतीतिधातुप्रत्ययान्त-
योर्विभक्त्यनपेक्षत्वेनतत्रदोषाभावात् तदकरणलाघवानुरोधेन
विभक्त्यपेक्षयेत्युक्तौतुमधुलिडित्यादिकेष्वश्रूयमाणविभक्ति-
त्वेनविभक्त्यनपेक्षयार्थवोधकेष्वव्याप्तिवारणायनञर्थद्वयनिवे-
शःकेवलकृदादीनामपि विमक्त्यनुसंधानापेक्षत्वेनकेवलकृदा-
दिष्वतिप्रसंगभङ्गयैतत्संज्ञाफलभूतविभक्त्यनुसंधानेनलोकेर्थ-
वोधकत्वमितिनोक्तमितिसर्वमवदात्तमिति परिष्कुर्वते नचत-
त्केवलप्रत्ययस्येति । अलुप्तप्रकृतिकस्येत्यादिः।अतइयान्इरि-
त्यादौ तत्सत्वेपि नक्षतिरन्यथा तत्रैवातिव्याप्तिवारणार्थंप्र-

त्ययपर्युदासः स्यात् । तस्यतुव्यपदेशिवद्भावेनप्रत्यायांतत्वात् प्रत्यायांतपर्युदासेनैवसंज्ञावारणाच्चपूर्वजातायाअतिदेशेनभत्वे पिनक्षतिः । अतएवपदेति । सूत्रहयेतत्सामर्थ्यात्तथार्थवत्वस्याभिमतत्वादेवेत्यर्थः । अतएवभाष्यकैयटोभयोपन्यासोभाष्यमात्रोपन्यासेतूत्तरत्रैवतथार्थवत्वंलभ्येतकैयटाच्चयथालाभःपूर्वत्रतथार्थवत्वस्यतथामूलएवस्फूटोभविष्यति। कृत्तद्धितान्तञ्चैवार्थवदिति । अर्थवत्पदगृहीतार्थवदित्यर्थः । एवमेवेति । औपाधिकभेदं वास्तवभेदमादायवाबोध्यासादृश्योपपत्तिः । अन्यथा।पूर्वत्रतथानाभिमतत्वे तत्सामर्थ्यादिति।पर्युदासेनेवनिरर्थकव्यावृत्तौ व्यावर्त्यन्तराभावेनवैयर्थ्यमिति भावः । पूर्वसूत्रे परिष्कृतार्थवत्ववादिनोममतु प्रत्ययदेवदत्तोगार्ग्यादिरूपठ्यावर्त्यमत्वेन तद्ग्रहस्यसामर्थ्याभावात् । अनुवृत्तिपर्यन्तानुधानंसङ्गच्छते ननु पूर्वत्रतथार्थवत्वग्रहः कैयटस्यनाभिमतः । अन्यथार्थाधिकारादित्येववदेत् किञ्चैतत्सामर्थ्यस्यानुवृत्तिप्रयोजकत्वेपि तदन्तविध्यप्रयोजकत्वेनचतथानावादीदित्यपि वक्तुंशक्यमित्यरुचेराह । किञ्चेति । अतएवतद्धितेति । सूत्रहयेप्युक्तार्थाङ्गीकारादेवेत्यर्थः । फलाभावेवेति । एतेनतद्धितग्रहणमपि निष्फलमिति सूचितंप्रातिपदिकसंज्ञायाइति शेषः । औत्सर्गिकैकवचनन्तु सत्येवगमकेलुगपिनधातुसाहर्येणस्वप्रकृतित्वाश्रयेतरव्यवहिताव्यवहितान्यतरस्वावयवकनुक्प्रयोजकधातुत्वप्रातिपदिकत्वान्यतरधर्मवदवयवसमभिव्याहृतस्यैवलुग्विधानात् । काण्डेतिष्ठतीत्यादौ तिष्ठतीत्यादिसमभिव्याहृतत्वादतिव्याप्तिवारणायधातुत्वप्रातिपदिकत्वान्य-

तरधर्मवत्सम्बन्धित्वेनावयवोविशेषितः। लुक्प्रयोजकत्वप्रत्यासत्तिध्वननायान्यतरविशेषणंनतुव्यावर्तकम् । एवमपितत्रैव तत्प्रयोजकधातुत्ववत्तिष्ठतिसमुदायावयवतिष्ठसमभिव्याहृतत्वादतिव्याप्तिवारणायस्वावयवकत्वेनधर्मवान् बिशेषितःस्वमवयवोयस्येति तदर्थःस्वशब्दोलुक्प्रतियोगिपरः। अस्तिचपुत्रीयेत्यत्रतथापुत्रमिति सुप्प्रत्ययावयवकतत्प्रयोजकधातुत्ववत् पुत्रीयेत्येतदवयववयच्समभिव्याहृतत्वात् । प्र*कृतेतु नदोषः। एवमपि तत्रैव तथाप्रकृतिमादायतदवयवंवादायातिव्याप्तिवारणायस्वप्रकृतित्वाश्रयेतरत्वेनावयवोविशेषितः तत्पर्याप्त्यधिकरणेत्युक्तौत्ववयवमादायस्यादेवसातिव्याप्तिरत आश्रयेत्येवमुक्तम् । एवमपि राजपुरुषादौ पुरुषाद्युत्तरसुप्यव्याप्तिवारणायव्यवहितत्वेनावयवोविशेषितः विशेषितेतु तथाभूतं पूर्वपदमादायतत्परिहारः तथा तत्रैवपूर्वपदान्तरसुप्व्याप्तिवारणायान्यतरत्वेनसएवविशेषितइत्यलम् । यद्वा तत्साहचर्यादादेशरहितस्यवृत्त्यवयवस्य प्रातिपदिकावयवस्यलुगित्यर्थः । परमकाण्डइत्यत्रवृत्त्यवयवसत्वादादेशरहितेति । ननु सिद्धान्तेपि सोमसुताअश्वःसोमसुताश्वःसोमसुतातितीत्यादावेकादेशेन्तवद्भावेनसुप्त्वात्। परादिवद्भावेन धातुत्वप्रातिपदिकत्वाभ्यान्तदवयवत्वेन लुक्स्यादिति चेन्न । उभयतआश्रयणेनान्तावयवत्वोभयाभावात् । अधिकरणेचेति निर्देशेनविभक्त्येकादेशोनान्तवदित्युक्तेश्च पञ्चमीसमासेनस्थानिवत्वाच्चापरनिमित्तकत्वेनान्तरङ्गे लुकिपरनिमित्तैकादेशस्यव-

* रामैष्वित्यादौ ।

द्विरङ्गासिद्धत्वाच्च । प्रत्याख्यानेति । प्रत्ययान्तपर्युदासेत्यर्थः । अनेननप्रातिपदिकत्वमिति । नित्यमशास्त्राणां निषेधमुखेनप्रवृत्तिरितिपक्षइदं विधिमुखेनप्रवृत्तिरितिपक्षेतु सामान्यतोर्थवत्त्वग्रहेपि प्रत्ययान्तभिन्नपरन्तत्समाससजातीयसमुदायभिन्नपरन्तदिति सङ्केत्रादेवनतत्प्राप्तिरित्यनेन प्राप्तिविरहादसङ्गतिः स्यात् । विधिमुखेनप्रवृत्तिरितिपक्षेप्याह । नाप्युत्तरेति । टाबापत्तिरिति । टजन्तस्योपसर्जनतयाटिड्ढेति ङ्गोरिति वाङोपोऽप्राप्तिरिति भावः । उपसर्जनह्रस्वेनतुननिर्वाहो यस्यप्रातिपदिकस्यसविधीयते तदर्थंप्रत्युपसर्जनत्वाभावेन सुगोकुलमित्यादाविवतदप्राप्तेर्वस्तुतोङीबापत्तिरितिपाठोपि सुयोज्योयस्मात् ङीब्विधीयतेतदर्थंप्रतिटिदादेरनुपसर्जनत्वएवप्रत्यासत्त्यातत्प्रवृत्त्याङीप्प्राप्तेःसत्वात् ननूत्तरपदत्वमुपजोव्यजायमानातत्पुरुषसंज्ञाटच्प्रवृत्त्यातद्धितान्तत्वेनप्रातिपदिकसंज्ञाद्वाराटाबादेरानन्तर्यविघातकस्यानिमित्तंस्यादिति चेत्सत्यम् । अलौकिकएवप्रक्रियावाक्येसमासान्ताः प्रवर्तन्तइति सिद्धान्तात् । पञ्चन्जस्नौजस्इत्यवस्थायामेवबहुव्रीहिसंज्ञासमकालमेव टच्प्रवृत्त्याततस्तद्धितान्तत्वेनप्रातिपदिकत्वोत्तरपदहेतुकद्विगुत्वयोः प्राप्तावपरनिमित्तकत्वेनान्तरङ्गत्वात् । द्विगुसंज्ञायाः प्राक्प्रातिपदिकत्वेतथैवान्तरङ्गत्वात् टाप्स्यात् । सन्निपातलक्षणायाद्विगुसंज्ञायाः पूर्वमप्रवृत्तत्वात् परिभाषाया अप्राप्तेः । ममत्वर्थवत्त्वाभावेननप्रातिपदिकत्वमिति नटाविति नवोनाशयःप्रतिभातीति केचित् । विफलइति । प्रत्ययइति सूत्रभाष्यविरुद्धश्चेत्यपि बोध्यम् । तत्रहि

प्रकृत्युपपदोपाधीनामपि प्रत्ययत्वेकिंदूषणमिति प्रश्नेपरत्व-माद्युदात्तत्वमङ्गसंज्ञे त्येतेविधयः प्रसज्येरन्नित्युक्तं नतुप्राति-पदिकत्वंनस्यादित्यपि तवतुतदपिवक्तव्यमिति ननु यथाश्रुते-पिकिमर्थवद्ग्रहणव्यावर्त्ययत्पर्युदासेनलभ्यतइत्युक्तमत आह। दशेति। निरर्थकोयःसमुदायइत्यर्थः। पदार्थानांसमन्वयस्यैव-वाक्यशक्यत्वेन तदभावात्तत्वम्। दिगर्थस्तुसमासेतिनियमे-ननास्यव्यावृत्तिः। तस्यार्थवत्समुदायविषयकत्वात्। साजात्या-दिति भट्टाः। यत्तच्छब्दार्थयोरिति तज्जन्यधीविशेष्ययोः। अन-नुगतत्वेनेति। आनन्त्यात्। शब्दानुगमस्येति। यत्तत्स्ये-त्येवंरूपस्य ननु बुद्धिस्थत्वेनतयोरनुगमएवात आह। व्यव-च्छेद्येति क्षत्यभावेनेति। नियमस्वरूपभङ्गस्य तावताप्यभा-वादिति भावः। स्वातन्त्र्येणापीत्यपिनापारातन्त्र्यसमुच्चयः अ-न्यथासर्ववाक्य*मिति न्यायेनस्वातन्त्र्येणैवेत्यर्थापत्त्याऽनुकर-णस्येति शब्दापेक्षस्यापि प्रयोगेणस्वातन्त्र्येणैव प्रयोगार्हत्वा-भावान्नियमेनव्यावृत्तिर्नस्यात्। भाष्येसुबन्तानामिति। पू-र्वोक्तभाष्यानन्तरंप्रकृतसूत्रभाष्यइत्यर्थः। भेदसंसर्गेति। वा-क्येपदार्थयोर्विभागेनापि प्रयोगेसतीतरसंसर्गाकाङ्क्षाभेदसं-सर्गः सद्वारभूतोयस्यविशिष्यार्थवत्वस्य तद्युक्ताइत्यर्थः। स-मासेपि वाक्येनैवतेनविशिष्यार्थवत्वंनहिप्रकृतिप्रत्ययययोर्विभा गःपरश्चेतिवचनात्। अतोबहुपटवइत्यादौ नदोषइति भट्ट-म्। केचित्तु न+दोषइति तदित्थंनियमनिष्कर्षः स्वनिष्ठप्रकृ-तित्वनिरूपकप्रत्ययप्रकृत्यन्यतरसमभिव्याहारानपेक्षप्रयोगा-

* सर्वं वाक्यं सावधारणमिति न्यायशरीरम्। + तदीयग्रन्थस्यप्रतीकमिदम्।

र्थवत् पूर्वोत्तरभागस्यार्थवतः समुदायस्यचेत् भवतितर्हिस-मासस्यैवेति नियमशरीरं शिवरामादावतिव्याप्तिवारणायार्थ-वत्त्वेन पूर्वोत्तरभागौविशेषितौ बहुपटवः पुत्रकाम्येत्यादावति-व्याप्तिवारणाय प्रत्ययप्रकृत्यन्यतरसम्बन्धित्वेन समभिव्या हारोविशेषितः । एवमपि कुम्भकारादावुत्तरभागस्य समुदाय-प्रकृतिकसुप्प्रत्ययापेक्षत्वात्पञ्चनावप्रियादौ पूर्वभागस्यतदपे-क्षत्वात् । सांकूटिनादौ कूटिन्नित्यस्योत्तरसमुदायप्रकृतिककृ-त्प्रत्ययापेक्षत्वात् । तस्यव्यभिचारित्ववारणाय स्वनिष्ठप्रकृ-तित्वनिरूपकत्वेन प्रत्ययोविशेषितइत्यलम् । असङ्गतिःस्पष्टै-वेति । ननु प्रत्ययग्रहणपरिभाषातः प्रागर्थवत्सूत्रेप्रत्ययांत-त्वस्यापि यथाकथञ्चित्तयागृहीतुंशक्यत्वेन समासस्यप्रातिप-दिकत्वेऽप्राप्त्याविध्यर्थमेवेदानीं समासग्रहणमिति नियम-कथाप्युच्छिन्नेतिनभाष्यासङ्गतिः । प्रत्युतपरिष्कृतार्थवत्वा-भावात्प्राप्तिरेवनेतिभवतामेवतर्हिरोधः । अर्थवत्त्वेहिपरिभा-षास्वीकारेणोत्तरसूत्रेणाप्राप्तावपि नियमाप्राप्त्यासादुर्वारास्या-दिति चेन्न । कृत्तद्धितेतिसूत्रेपरिभाषाप्रयोजनदानावसरे-यदर्थवत्सूत्रेपरिभाषानस्यात्तदर्थवत्सूत्रन्त्यक्त्वोत्तरसूत्रेभगव-तोगमनंनिर्दलंस्यात् । अर्थवत्सूत्रेप्रत्ययग्रहणपरिभाषाभावेतु गामानयेत्यादिवाक्यानांप्रत्ययान्तत्वादेवाप्राप्तावपि मूलकेनो-पदंशमित्यादौ कृदन्तत्वेनातिप्रसक्तेर्दृढतयातत्प्रथमंपरिभा-षाप्रदर्शनस्यावश्यकत्वात् । नचदेवदत्तःपाचकइत्यादावतिप्र-सङ्गसत्त्वेनप्राथमिककृद्ग्रहणत्यागेबीजाभावात् । त्वयापित-द्भाष्यमवश्यमुपलक्षणतयानेयमिति वाच्यम् । प्रत्ययग्रह-

णपरिभाषाविरहेकृद्ग्रहणपरिभाषयासपूर्वस्यचेत् गतिकारकपूर्वस्यैवेति नियमार्थत्वापत्त्यातिप्रसङ्गभङ्गस्यैकबीजत्वात् । तस्मादर्थवत्सूत्रेप्रयोजनमदर्शयतोभगवतः प्रत्ययग्रहणपरिभाषायात्कर्त्तव्यं तदन्यथासिद्धमित्यभिप्रायःकल्पनीयः । अर्थवत्सूत्रे प्रत्ययपर्युदासोनास्तीति भट्टसिद्धान्तः । प्रत्ययान्तपर्युदासस्त्वस्त्येवेति चेत्तत्राप्रत्ययइत्यत्रनविद्यतेप्रत्ययोयस्येतिबहुव्रीहिः । अन्यपदार्थएवप्रत्ययविधानाबाध्यावयवकप्रत्ययचरमावयवकः समुदायः यथाकथंचित्प्रत्ययान्तेपि पारिभाषिकप्रत्ययान्तत्वस्य सत्वेननाप्राप्तत्वेन तन्निषेधस्यौचित्यात् । अतएवसनाद्यन्ताइत्यत्राप्येवं निर्वाहसम्भवात्प्रयोजनान्तरंदेवदत्तोगार्ग्यइति दत्तन्तेनचगुरूभूतव्याख्यानगम्ययोगविभागापेक्षयान्यपदार्थविशेषणमेव लघ्वितिसूचितं भगवतेतिदिगित्यन्ये । वस्तुतस्तु पूर्वसूत्रेप्रयोजनमदर्शयतोभगवतः प्रत्ययविशेषग्रहणएवप्रयोजनप्रदर्शनतात्पर्यन्तत्सामान्यग्रहेप्येतत्प्रवृत्तिरिष्टैव । अतएव प्रयोजनंधातुप्रातिपदिकप्रत्ययसमासतद्धितविधिस्वराइत्यादिनातद्विशेषग्रहणान्येवोदाहृतानि । तस्मात्समासग्रहणस्यनियमार्थत्वमेवेति प्राचांभाष्यासङ्गतिरेवेति नव्याशयः । किंचोत्तरसूत्रेर्थवत्पदानुवृत्तौ केवले कृतिपारिभाषिकार्थवत्वासम्भवात्कृत्तद्धिताँशेतदन्तविधौ तद्विशेषणेतावदर्थवत्पदांशेपितदन्तविधौ बाधकाभावादर्थवदन्तं यत्कृत्तद्धितान्तमित्यर्थस्यवक्तुंशक्यतयासमुदायस्यार्थवत्वाभावेप्यर्थवान्योगार्ग्यशब्दस्तदन्तत्वेनपरिभाषातः प्राक्कृद्धितान्तत्वसत्वेनचप्रातिपदिकत्वस्यप्राप्तिसत्वात्तत्परिभाषो-

त्तरन्तुविशिष्टस्यार्थवदन्तत्वेपि तद्धितान्तत्वाभावान्नदोषः। केवलगार्ग्यस्यौपगवादीनां चार्थवदन्तत्वमातिदेशिकं व्यपदेशिवद्भावेनबोध्यं यत्त्वर्थवदन्तं यत्कृत्तद्धितान्तमित्यर्थात्तत्प्राप्तिरितितन्न॥ निरुक्तार्थवत्वमादायव्यावर्त्यकृत्तद्धितान्ताप्रसिध्याइतरव्यावर्तकत्वरूपव्यापारवत्करणत्वाभावेनकरणतृतीयान्तपदघटितयेनविधिरित्यस्याप्रवृत्तिरिति चेन्न। पञ्चनावेत्यस्य केवलकृत्तद्धितयोश्च तद्व्यावर्त्यताप्रसिद्धेः। सन्निपातपरिभाषयायथानपञ्चनावेत्यस्यसिद्धिः तथोक्तं प्राग् नञ्चकेवलयोः फलाभावादेवनसंज्ञापदसंज्ञासूत्रस्थं भाष्यन्त्वेकदेशयुक्तिरिति वाच्यम्। औपगवःपाचकइत्यादावपत्यकर्त्रर्थकयोस्तद्धितकृतोः। संज्ञापत्तावपत्यादिगतां संख्यामादायसुबुत्पत्तेः। फलत्वादवयवात्तदुत्पत्तौच विशिष्टस्यपदत्वानापत्त्यादूषणान्तरंस्फुटमेवेति प्रत्युतविरोधेन प्रत्ययग्रहणपरिभाषाभावेप्रत्ययान्तत्वस्य सनाद्यन्ताइति धातुत्वस्यचानर्थकेपि सत्वेनव्यभिचारादर्थवत्वेन सादृश्यग्रहणानापत्तावर्थवत्पदस्यवैयर्थ्याभावात्परिष्कृतार्थवत्वाभावेन यथाश्रुतार्थवत्वस्यचदेवदत्तोगार्ग्यइत्यत्रसत्वेन प्राप्तिरेवेतिनप्रत्युतविरोधइत्यन्यआहुः। परन्त्वेदंकुशकाशावलंवनंनव्यग्रन्थश्रद्धालुभिरादरणीयं क्षोदक्षमन्तुनेत्यलंबहुनेतिव्याचक्षते। आहुरिति। सूचितास्वरसस्तुसमासग्रहणस्य विध्यर्थत्वापत्त्याप्राचांभाष्यासङ्गतिविरहस्तुनेमामेवारुचिंमनसिनिधायसनाद्यन्ताइति द्वितीयफलोद्भावनात्। इदन्तु बोध्यम् प्राचीनमतेप्युत्तरसूत्रेणकार्थीभावविशिष्टत्वरूपार्थवत्त्वग्रहस्योक्तत्वेन देवदत्तोगार्ग्येत्यत्र-

तदभावेन प्रकृतभाष्यासङ्गतिरस्त्येव तत्परिहारश्चार्थवत्प-
देतदन्तविधिरित्येकः पूर्ववदेवापरश्च विभक्तीतरसमभिव्या-
हारानपेक्षयालोकेऽर्थबोधकत्वरूपार्थवत्वमुत्तरसूत्रेपरिभाषावि
रहएकार्थीभावस्यकृत्तद्धितान्ताव्यभिचरितत्वाभावान्तेनतद्रू
पस्यैव ग्रहणेमानाभावादिति । देवदत्तोगार्ग्यइति । नन्वेवं-
राज्ञःपुरुषइत्यत्रसुविनिर्मुक्तराज्ञःपुरुषइत्यस्यपूर्वसूत्रेणसंज्ञा-
दुर्वारैवोत्तरभागस्य स्वातन्त्र्येणप्रयोगानर्हत्वेन नियमेनव्या-
वर्तयितुमशक्यत्वात् । नचैवन्तस्यव्यावर्त्याप्रसिद्धिः । लौ-
किकवाक्यस्यैव तथाभूतत्वेनैवप्रसिद्धत्वादिति चेन्न । त्वदु-
क्तरीत्याविभक्तिरहितोत्तरभागवत्समुदायेप्रातिपदिकत्वापा-
दनतयातदवयवपूर्वभागविभक्तेर्लुकालुप्तत्वेन तादृशवाक्य-
स्यैव गगनारविन्दतुल्यत्वात् । अथोत्तरभागस्यस्वातन्त्र्येणप्र-
योगार्हताग्रहएवत्यज्यतामिति चेन्न । प्रकृतभाष्यविरोधात् ।
अथतादृशार्थाग्रहेति प्रसङ्गोऽनाग्रहेतु भाष्यविरोधइत्युभयतः
पाशारज्जुरिति चेत्तर्हीत्थंनियमः । प्रकल्प्यतांपूर्वसूत्रेणार्थव-
त्समुदायेचेत्संज्ञातर्हि स्वतन्त्रप्रयोगार्हार्थवत्पूर्वोत्तरभागघटि-
तएवेति तथाच प्रयोगानर्हेतरभागकसमुदायस्य पूर्वसूत्रावि-
षयत्वमिति नकश्चिद्दोषः । अतएवभाष्येप्रकृतेयञन्तत्वेनैव सं-
ज्ञामाशंक्यतत्समाधानञ्चकृतम् । अन्यथा तद्धितान्तत्वप्र-
युक्तसंज्ञाव्यावर्तकप्रत्ययग्रहणपरिभाषयैवसमूहस्य प्रत्ययान्त-
त्वाभावेन प्रत्ययान्तपर्युदासाप्रवृत्त्यापूर्वसूत्रेणैव तस्यादुर्वा-
रत्वात्तत्परिहाराकरणेनन्यूनतयाभाष्यासङ्गत्यापत्तेरित्यपरेस-
ङ्गिरन्तेतत्रापि फलमाह । प्रातिपदिकत्वेहि सुपःश्रवणाना-

पत्तिरिति । न च धातुसाहचर्येणवृत्त्यवयवस्यैव प्रातिपदिकावयवस्यापि ग्रहान्नलुगिति वाच्यं मूलकेनोपदंशमित्यादौ दोषात् । स्वराद्यर्थमित्यादिनाविशेषणयोगादिसंग्रहः । शशशृङ्गादिपदानांचेति । बुद्धिमात्रविषयीकृतस्यात्यन्तासतोबुद्धिसत्ताविशिष्टस्यार्थस्यशब्देन बोधनादिति भावः । ननु प्रसिद्धपदार्थद्वयस्य सम्बन्धमात्रारोपएवसुबुत्पोऽत आह । स्वप्नेति । तत्रानुभूतपदार्थानां नव्यावहारिकत्वं प्रबोधेप्युपलम्भापत्तेः । ननु स्वप्नरथन्तरादिष्ववयवानां सर्वथानिरर्थकत्वात् । कथं साजात्येननियमस्यार्थवत्समुदायविषयकत्वमत आह । अक्षेति । अन्वाख्यानेसमूहस्येति शेषः । विकारेति त्रपुजतुनोः षुक्हनस्तक्त्वेत्यादोनां बहुवचनमवयवबहुत्वाभिप्रायं नसंज्ञेति तत्सत्वेदूषणंसोयुडादेः सा*च आद्युदात्तत्वापत्तिरित्यागमानुदात्तत्वन्तुनापूर्वमिति नभादेश्चतत्वापत्तिरितिच प्रकृतसूत्रभाष्यतोवसेयम् । महासंज्ञयेति । प्रत्याययतिप्रत्याय्यतेवाइति ण्यर्थान्तर्भावेण कर्तृकर्मसाधनप्रत्ययशब्दयोः प्रकृतसूत्रभाष्योक्ततन्त्रेणचेति शेषः । तत्रकर्तृसाधनेन स्वार्थप्रत्यायकसंग्रहःकर्मसाधनेनतुप्रत्याय्यते प्रकृत्याबोध्यतइति स्वार्थिकप्रत्ययस्य यद्यपि स्वार्थिकेषु प्रकृत्यातदर्थःप्रत्याय्यतेनसएवतथापि शब्दार्थयोस्तादात्म्यात् प्रकृत्याप्रत्याय्यमानार्थकत्वात्सोप्येवमुच्यतइति तद्भाष्याशयंकैयटऊचेतदेतन्मनसिनिधायाह । प्रकृतीति । प्रकृतित्वञ्चात्रपरश्रेत्यत्रवक्ष्यमाणंनग्राह्यम् । इदानीं प्रत्ययत्वस्यानिर्णीतत्वेनवधाद्यादेशरूपप्रत्ययविध्युद्दे-

* अच्सहितस्य ।

इयतायाः स्यानिनिहन्त्यादौ सत्वेनतदर्थबोधकानांवधादीनामपि संज्ञापत्तेरन्योन्याश्रयापत्तेश्च किञ्चयस्यप्रत्ययत्वमानेयन्तदवधित्वम्। अयम्भावः। नभादिव्यावृत्तयेस्वशब्दार्थान्तर्भावेण प्रत्ययशब्दस्यवृत्तिरिति चेत्स्वार्थिकानांप्रकृत्यर्थप्रत्यायकानांनभादिवत्। स्वार्थप्रत्यायकत्वाभावात् संज्ञास्यात्। अतःकर्मव्युत्पत्तिरङ्गीकार्यातथाचस्वेन प्रत्याय्यमानार्थकत्वमव्यभिचारीति। अन्येनेतिलभ्यतेतदपि स्वसमभिव्याहारेसर्वत्रास्तीति स्वसमभिव्याहारइति लभ्यतेतदप्यनियमेनसर्वत्रनियमेमेति लभ्यतेतच्चप्रकृतिरूपमेवफलतीतिवतोरिड्वानान्तादसंख्यादेरित्यादौ प्रकृतित्वाभावादेवनातिव्याप्तिरिति बोध्यम्। तन्निष्ठविधेयतानिरूपितवृत्तित्वव्यधिकरणं तन्निरूपितावयवित्वव्यधिकरणंच यदुद्देश्यत्वन्तदवच्छेदकाक्रान्तत्वं स्यानिनिष्ठोद्देश्यतायानिवृत्तिसामानाधिकरण्यादागमिनिष्ठायास्तस्याअवयवित्वसामानाधिकरण्याच्च स्यान्यागमिनोर्नातिव्याप्तिरवधित्वनिवेशेन। एतेन वैल्वादावकारस्य क्लप्तशक्तिकत्वेनकुकोविकाररूपस्वार्थप्रत्यायकत्वाभावेपि प्रकृत्यर्थप्रत्यायकत्वात् प्रत्ययत्वन्दुर्वारमित्यपास्तम्। इनमस्तुशित्करणात् तृणहइति निर्देशाद्विकरणानांद्योतकतयास्वार्थप्रत्यायकत्वाद्वाप्रत्ययत्वंशबादीनान्तु प्रकृत्यर्थप्रत्यायकत्वात्। द्योतकतयास्वार्थप्रत्यायकत्वाद्वातत्वम्। ननु यदर्थेवाच्येद्योत्येवाविधानंतत्वंस्वार्थत्वमितिवत् स्वप्रकृत्यर्थत्वञ्चदुर्वचंतदर्थंतासामभिधानादत आह। स्वप्रकृत्यर्थश्चेति। कोशादित्यादिनानिरुक्तनिघण्टुसंग्रहः ननु प्रत्यायकत्वमित्येवास्तु-

मास्तु तन्तादिःस्वशब्दोपादानश्चेत्यत आह । अतएवनमेति। [illegible] ब्दार्थान्तर्भावेण प्रत्ययशब्देवृत्तिस्वीकारादेवेत्यर्थः । अतएवेति । स्वार्थाभावादेवनञ्यशब्दादपि नाभिशब्दप्रकारक बोधोनाभिहितइति नतुकदाचिदपिनाभिहितइति येपिशास्त्रानभिज्ञालेऽपि वृद्धव्यवहारात्तथैवप्रतिपादयन्ति। उक्तार्थेभाष्यं प्रमाणयति। एतदर्थमेवेति। स्वान्यर्थप्रत्यायकनभादेश≍प्रत्ययत्वव्यावृत्त्यर्थमेवेत्यर्थइति । विग्रहइति स्वमर्थं प्रत्यायतीतिविग्रहइत्यर्थः। एवंस्वीयपदेत्यत्रापिस्वीयार्थंस्वपदेत्यर्थोवोध्यः। यथाश्रुतंतुनयुक्तम्।भाष्येतादृ[illegible]स्यानुपलम्भात्। एवमुक्तेस्तुतत्रत्यस्वपदस्यात्मीयार्थकत्वंवनयितुम्। आत्मव[illegible]र्थेनाभेदोबाधितःस्यात्। एतेनैतदर्थसंग्रहार्थमेवप्रकृत्यर्थ[illegible]यपदोपादानमिति । अन्यथास्वशब्दमेवोपाददीतस्वीयपदउपात्तेत्वात्मीयवाचकस्वशब्दप्रकृतिकच्छप्रत्ययान्तादात्मीयप्रकृतिसम्बन्ध्यर्थसंग्रहआत्मवाचिप्रकृतिकादात्मसंबंधिस्वार्थसंग्रहोजायतइति व्याख्यातमित्यपास्तम् । कर्मसाधनोपिप्रत्ययशब्दोऽस्तीत्यग्रिमभाष्यानुत्थितिप्रसंगात्। तदर्थान्तर्भावेणेति। स्वशब्दार्थान्तर्भावेणेत्यर्थः । एवमर्थान्तर्भावेणेत्यर्थइत्यन्ये यत्तुविकारेति । विकारएकदेशस्थानिकोहनस्तत्वेत्यादिः । आदेशः सर्वस्थानिकोनभादिरितिभेदः । ननु तृणहइति निर्देशात् नथासयोरितिज्ञापकाच्चनमकचोर्नदोषः । बहुचित्तुप्रत्ययत्वाभावेपिनक्षतिरित्यरुचेराह । किंचलविषीति। पाठकोक्ता[illegible]चित्तुचस्थानभादेरप्रत्ययत्वापत्तेः विशेषवि[illegible]हतत्वस्यानवक[illegible]नसत्येववाधकत्वेप्रयोजकत्वात्सोयुक्तश्चस्वदेशइ[illegible]रतार्थ-

मतआह।परत्वादिति। उत्कृष्टत्वादित्यर्थः। ब्राह्मणाभोज्यन्तांमा-
ठरकौडिन्योपरिवेविषातामितिन्यायेनलादेशा[illegible]सियोग्यविषया-
भावरूपानवकाशत्वस्यसीयुटिसत्वेनापवादत्वादितियावद्या
सुड्विषयेसीयुट्प्रतिषेधेनलिङ्संबंधिनामुक्तन्यायेनबाध्य-
बाधकभावेनेत्याख्यातेव[illegible]माणत्वात्, तक्रकौडिन्यन्यायस्यतु-
नात्राश्रयणंतदाश्रयणेहितक्रदानोत्तरंदधिदानस्येवसीयुटिला-
देशाप्रवृत्तिरेवस्यात्। भोजनन्यायाश्रयणेतुपरि[illegible]णारंभोजन
स्येवतदुत्तरंतत्प्रवृत्तिर्निर्बाधैवयद्योक्तन्यायेनसीयुटोबलीयस्त्वा-
द्विप्रतिषेधाभावेनपरत्वाप्रयोजकत्वादाह। चेति चेनचोक्तार्थ-
समुच्चयः। सीयुटएवेति। यद्यपितृतीयसूत्रेलस्थानइडुदा-
त्तोभवतीत्युत्पत्तिकालएवस्वरविधानादनुवादविषये यदागमा-
इत्यस्याप्रवृत्तेरागमविशिष्टस्योदात्तत्वाप्राप्त्योच्चार्यमाणस्येटए-
वाद्युदात्तत्वेसीयुटः शेषनिघातसिद्धिः। यत्तुसीयुडागमसम-
वधानेनस्यानर्थक्यादादेशासंभवेनसोयलइत्यस्यस्थानेसीय्ऽइ-
त्यादेशः स्यात्सचप्रत्ययसंज्ञकआद्युदात्तश्चेत्यानुमानिकवचने-
नप्राप्नोतीत्याशय आगमानुदात्तत्वउक्तेस्त्वपवादविषयत्वात् पू-
र्वमेवनानुमानिकाद्युदात्तत्वप्रवृत्तिरिति श्रौताद्युदात्तत्वस्यै-
वावस्थानमित्याहुस्तन्नानुमानिककल्पनेपि विशेषणविशिष्टस्य
लक्षणाननुलक्षितेविशेषणान्वयइत्यंगीकारादन्यथापदस्य वा-
क्यस्यवाऽऽद्युदात्तत्वापत्तिरिति तथाप्यस्यैकदेशयुक्तित्वादिति
स्पष्टनुरोधात्तेन नक्रियमाणेप्यागमा[illegible]दात्तत्वेक्रियमाणेपि प्र-
त्ययस्वरनियोगेनाद्युदात्तत्वेसीयुडादेर्लिङआद्युदात्तत्वंप्रसज्ये-
तेति न व्यंलिङ्विधावुपस्थिताद्युदात्तश्चेत्यस्यविधानकालेलि

ङेऽनन्यकत्वेनाप्रवृत्तावपि सोयुटियदागमेतिन्यायेनलिङ्त्वा-
त्सीयुटः प्राप्नोतीत्यभिप्रायकमित्यादेशविधौन तदसंगतिरतः
कैयटासंगतिमाह। कैयटेति। तत्सूत्रस्थप्रदीपोद्द्योत्तौतुचिन्त्या-
वेवचिन्ताबीजंतुस्फुटंसूक्ष्मदृशामितिनोक्तम्। यत्तुप्रकृतसूत्रेकै-
यटउपपदस्यापिप्रत्ययत्वेराजपुरुषादिषुसावकाशमुपसर्जनस्पू-
र्वमित्येतद्बाधित्वापरत्वापत्तिरित्युक्तन्तस्यायंभावः।राजपुरुषयोः
सुप्निरूपितप्रकृतित्वेपि शब्दांतरापेक्षयापरस्परापेक्षयावाप-
र्यायेणप्रयोगेप्राप्ते समस्यमानपदापेक्षयोपपदस्योपसर्जनस्यपू-
र्वंनिपातार्थन्तत्सार्थक्यम्। आदिपदग्राह्यं दास्याःपुत्रइत्यादाव-
लुक्समासेजहिजोडमितितिङन्तपूर्वपदकेचसमासेतत्सार्थक्यं-
नहितत्रतिङंतषष्ठ्यन्तयोःप्रकृत्तित्वेनप्रत्ययत्वप्राप्तिरस्तियेनप-
रत्वंप्रसज्येतेति। एतेनोपसर्जनपूर्वत्वस्यानवकाशत्वाभिप्राय-
कोविवरणग्रन्थःपरास्तः। यदपि प्रकृतिसूत्रेविकारागमेषुचपर-
विज्ञानादितिभाष्यव्याख्यानावसरेकैयटेनोक्तंनहिपरत्वनिमि
त्ताप्रत्ययसंज्ञाऽपि तुप्रत्ययसंज्ञानिमित्तंपरत्वंतथाचपरत्वाभावे-
पिइनम् वहुजकन्यांप्रत्ययसंज्ञाभवतीति। तस्याप्ययम् भावः।
परत्वसन्नियोगशिष्टंनप्रत्ययइति सूत्रेचकाराभावादव्याप्ते श्चकिं-
तुप्रत्ययसंनियोगशिष्टंपरत्वमिति न च तृणह्वइति निर्देशेन-
सन्नियोगशिष्टन्यायस्यानित्यत्वेनाव्याप्तिः सुपरिहरेतिवाच्यम्।
अधिकारसूत्रवाक्यार्थस्यैकत्वेनतत्तन्यायाप्रवृत्तौविकारादिष्व-
तिव्याप्तिःप्रवृत्तौ श्रमादिष्वव्याप्तिरित्युभयस्यदुर्लभत्वादिति।
एतेनतत् व्याख्यावसरउद्द्योतेयदुक्तंनहिपरत्वनिमित्तेति तत्-
दश्लाघ्यत्वात्। तथाहिसूत्रितव्यापकत्वेनव्याप्त्यभावोऽपि

तुप्रत्ययसंज्ञादिमित्तंपरत्वमिति तच्चिंत्यंराजपुरुषइत्यादौ प्रत्ययत्वाभावेपि पुरुषशब्दस्यपरत्वदर्शनात् सन्नियोगेतिन्यायानित्यत्वेनइनमादीनांप्रवर्ततएवसंज्ञे तिचतदपास्तंचिंत्यंचतज्ज्ञाप्याशयस्तुविकारागमेषुफलाभावान्नप्रत्ययत्वमित्येव । आद्युदात्तत्वंचपरत्वसंनियोगशिष्टम्। अतएवपरश्चेत्यस्यांग्रआद्युदातश्चेति सूत्रितंवार्त्तिनिकञ्चाऽऽगमानुदात्तत्वमित्यादिकैयटेस्पष्टम्। यत्तचइनमादौ फलमस्तिभवत्येवतत्रप्रत्ययत्वमित्यादिनादिगर्थस्तुप्रदीपतोवगंतव्यइत्यलंबहुनेतिव्याचक्षतेतराम् । परश्चेति । अपादानत्वासंभवेति। गुपादिभ्यः सनादिर्भवतीत्यर्थीभावेनतज्जन्यविभागानाश्रयत्वादिति भावः। षष्ठ्यर्थआनंतर्यमितिवौद्धैकदेशाधारकस्थित्याश्रयत्वरूपषष्ठ्यर्थसंबंधनिरूपकाध्याहृतानंतरादिपदबोध्यानन्तर्यमित्यर्थः । अव्यवहिताएवेति । गापोष्टगित्यत्रानन्तर्यस्यषष्ठ्यर्थकत्वेसिद्धेक्ङेशेनार्थान्तरकरणंपाठकस्यमुधैवेतिभाति। षष्ठ्यशेति। अत्रचसुपिचेत्यादिनिर्देशास्तात्पर्यग्राहकाइति भाट्टव्याख्यानंतथाच प्रथमांस्वीकृत्यप्रत्ययैःसामानाधिकरण्यमितिभावःभवत्येवनियमेति।अयंभावः। विधिर्द्विविधःनित्योवैकल्पिकश्च तत्र नित्यविधेरजुपश्लिष्टस्येकोयण् तदघटितःसाधुःसप्रयोक्तव्यः तदघटितोनसाधुसनप्रयोक्तव्यइत्यादिरीत्यास्वविधेयाघटितासाधुत्वबोधनपर्यन्तमापेक्ष्यापारःस्वरतीत्यादिविकल्पविधेश्च साधुत्वबोधनपर्यन्तमेवेत्येवंस्थितेविध्यन्तरवद्वर्तमानत्वविवक्षायां तदघटितस्यसाधुत्वं न्यायसिद्धन्तदविवक्षायां तदघटितस्यासाधुत्वबोधनार्थंनियमः। अत्रचलडादिर्निरर्थकएवभूतोनिकालः पचतीत्यत्रयथा-

[illegible]त्यादिविकल्पविधावुपग्वपत्स्यमुपगोरपत्यमित्यादि प्रयोगभङ्गभियाऽणाद्यघटितस्यासाधुत्वं नन्यायसिद्धन्तन्नम-हाविभाषयावाक्यम्। अन्यतरस्यांग्रहणानुवृत्त्यासमास उप-ग्वपत्यमित्यर्थउपगुरिति नप्रयोक्तव्यमिति नियमेनसाध्यम्। स्पष्टञ्चेदंमहाभाष्ये विपरीतन्तुनव्याख्यानात् ऋे र्मप्नित्यमि-त्यत्रयोगविभागादिकन्तुमवन्तान्निर्वृत्तार्थप्रतीतिर्यथानियमेन-स्यादित्येवमर्थं परश्चेतिनियमेनतुनिरर्थकोमप्स्यात्। अत्यन्त-स्वार्थिकेतुनास्य सम्बन्धोमहाविभाषयासहविरोधात्। विभाष-यार्हि स्वविधेयघटितेसाधुत्वंनियमेनचासाधुत्वमिति विरोधः। स्पष्टएवेति। अतएवाषडक्षेत्यादावुत्तरसूत्रस्थान्यतरस्यांग्र-हणस्यज्ञापकत्वेन नित्यत्वमुक्तमाकरेऽनुकरणेत्विति। अस्य-चगवित्ययमाद्येत्यादाविति सप्तम्यन्तेऽन्वयः शास्त्रबोधितेति। शास्त्रबोधितत्वंचशास्त्रबोधितासाधुत्वकत्वम्। अतः पाचक-इत्यादेर्घञ्विधायकशास्त्रबोधितस्यप्रयोगः स्यादिति नापाद-नीयंपरएवेति नियमेनस्वाघटितस्यतस्यासाधुत्वबोधनादनुक-रणेऽतिव्याप्तिवारणायपदत्वं व्याचष्टअपरीति निहतादावव्यो प्तिवारणायतदपि परिष्कुरुतेपरोति। अप्रवृत्तत्वञ्चप्रतिबन्धका प्रतिहतप्रवृत्तिकत्वन्तेनलिडित्यादौ प्वुलाद्युद्देश्यतावच्छेदक-धातुत्वाक्रान्तत्वेपि नाव्याप्तिःहरीएतावित्यादौ च न सा प्रति-बन्धकत्वंचनिहतेतिङन्तेलक्ष्येलक्षणस्येति न्यायःलिडादावु-क्तार्थानामित्यपवादविषयतावाप्रकृतिभावश्चेतिरीत्यातत्तत्रा-नेकविधंयथासम्भवं बोध्यम्। दिगर्थस्तुवैकल्पिकविधीनांवा-ग्रहणरूपप्रतिबन्धकप्रति [illegible] गवैकल्पिक-

मिति केचित्[illegible]ते । ङाप् प्रातिपदिकार्थत्वाभावेन मा-
[illegible]पदेनाह[illegible]. प्रथमायाअप्राप्तावपि-
[illegible]धावतीत्यादौ द्वितीयास्यादत आह । नेति । आदिना-
ज्योतिष्टोमेनयजेतेत्यादौ तृतीयासंख्येति संख्यावच्छिन्ने ऽन्य-
संख्याभावादित्यर्थः । नन्वन्यसंख्याभावेपि तत्संख्यामादा-
यस्यादत आह । संख्येति । एतेन वाक्यात्सुबुत्पत्तिनिरा-
सायसइत्यपास्तमिति भट्टाः । अन्येतु संख्याभावादि[illegible]-
तीतेरित्यर्थः । ननु कर्तृकर्मप्रत्ययेऽप्रतीतावपि शय्यतइत्यादौ
तत्प्रतीतिरस्त्येवभावार्थकतिङन्तेऽत आह । उक्तत्वादिति ।
एतेन धावतिपदेत्यादौ कारकसंख्यायाउक्तत्वेपि क्रियाग-
तामनुक्तामादायस्यादि[illegible]ति व्याचक्षते । अपवादत्वा-
दिति । फलस्यव्यपदेशिवद्भावेनकर्मत्वात् । धातुमात्रस्यतदु-
पस्थापकत्वात् । स्वमतेसंख्यासत्वाच्चसर्वत्रद्वितीयाप्राप्तेरिति
भावः । क्वचित्तस्यकरणत्वेनान्वयविवक्षायां ज्योतिष्टोमेनय-
जेतेत्यादौ हरिन्नमेच्चेदित्यादौच हेतुत्वेतृतीयाप्राप्तिबोध्येद-
न्तुचिन्त्यम् । संख्यामात्रविवक्षायां कालसा[illegible]नादेरविवक्षा-
यांतिङादेरप्राप्तौ सुपोवारणायसआवश्यकइति । ननु वर्त्त-
मानकालिकैककर्तृकपाकसमूहइत्यर्थेपचतीत्यादावणादिव्या-
वृत्त्यर्थः सोऽतआह । तस्येति । [illegible]स्त्यादेः नषष्ठान्ता-
दित्यर्थः । किन्तुतत्र[illegible]न्धीत्यादिः । एवञ्चतिङन्तादणादिः
[illegible]भास्त्येवेत्यत आह । ज्ञापकेति । [illegible]तिङन्त त्तद्धितश्चेत्तरवा-
दिरवेतिनि[illegible]ते भावः । एतेन वावृतुधातुस्थशेखरवि-
रोधइत्यपास्तम् । [illegible]र्थिकानरासायतदिति चि-

न्त्यमिदमितिवदन्ति । सुबन्तस्योपस्थितत्वसिद्धये हेतुद्वयमाह । स्वार्थेति । तस्येतिच बोध्येति । अत्रचविद्वन्मानसेति वक्ष्यमाणवत्तन्त्रं बोध्यम् । प्रथमोच्चारितबोध्यादिति प्रथमोच्चारितबोध्यंवाच्यं यस्येतिचतदर्थः । बोध्यबोधकादितियावत् अन्यथाभुक्तेपोति न्यायेनबोध्यादुपग्वादेरर्थात् प्रत्ययस्यबाधादसङ्गतिः स्पष्टैव । तद्बोध्यबोधकञ्च सुबन्तमेवेति तस्योपस्थितत्वमिति भावः । घटकतयोपस्थितप्रातिपदिकत्वविशेषणत्वाभावायाह । प्राधान्येति नदोषइति । यद्यपि प्रकृतेसर्वस्यसुपीत्यस्य प्रवृत्त्याप्रातिपदिकमपि न तथाप्युपलक्षणन्तदिति भावः । उच्चादिपाठम् प्रमाणयन्नाह । स्पष्टञ्चेति । अतएवसर्वेति । तत्तदन्तसप्तमीत्वादेवेत्यर्थः । अन्यथाबहुव्रीहिकालेऽन्तोदात्तत्वात्तत्वस्यैव पूर्वपदप्रकृतिस्वरेणातिदेशः स्यात् । धर्मिग्राहकमानान्न्यायसङ्कोचादेवेति तुनातएवेत्यस्यार्थः । तदसङ्कोचेपि । पूर्वंलुक्यङ्गत्वात्सर्वस्वरेप्रकृतिस्वरेणतत्वसिद्धेः । कुमारेत्यादिधर्मिग्राहकस्यभाष्येसाक्षादनुपलंभादुदाहरणंप्रमाणयति । बहुतरेति । नन्वयस्कुम्भीत्युदाहृते प्रातिपदिकरूपेण कुम्भत्वादिनाग्रहणेप्रवृत्तिलाभेपि तद्भाष्यबहुव्रीहित्वादिनाग्रहणेप्रवृत्तिर्न्नस्यादत आह । स्त्रीप्रत्ययेति तद्रहितेदृष्टाइति शेषः । तद्रहितत्वञ्चतत्प्रकृतिभूतमेव । अतएवनद्युत्तरपदादित्यर्थेप्युत्तरपदत्वस्य विशिष्टेऽतिदेशात् कप्स्यादित्यपास्तम् । उत्तरपदत्वस्यप्रकृतौ दृष्टत्वाभावात् । एतत्ध्वननायैव समभिव्याहारइति । अन्यथात द्विफलमेवस्यात् । विशिष्टेति तन्मात्रविशिष्टएतेन दृष्टयामा

ल्येत्यत्रतत्प्रकृतौ मालायांदृष्टप्रातिपदिकत्वस्य दृष्टामालेति विशिष्टेऽतिदेशात्प्रातिपदिकावयवत्वेन लुक्स्यादित्यपास्तमिति केचित पाठकग्रन्थउत्तरमितितत्वम् । वस्तुतस्तु समासान्तानामलौकिकेप्रवृत्त्यातत्रच सुपःसत्वान्नदीचरमावयवकत्वं बाधितमतोनद्यन्तप्रकृतिकसुबन्तोत्तरपदकइत्यर्थोबोध्यः । इत्यादेःसिद्धिरिति । आदिनायुवतिकाया अन्यथान्तरङ्गत्वादेवङापो≍पूर्वमुत्पादेसिद्धेस्त्रीप्रत्ययान्ताच्चेत्ङाबन्तादेवेतिनियमार्थत्वापत्त्याप्यूङ≍पूर्वमनुत्पत्तावसिद्धिःस्यात् । मानन्तु प्रत्याख्यानपरंभाष्यमेव । एतच्चेति । ङाबग्रहणासम्बन्धइतीति प्रत्ययाद्यतोत्यादिनाऽत्यन्तस्वार्थिकपरिग्रहः । यूनोतिरिति । उक्तार्थेतिन्यायस्तु स्त्रीप्रत्ययप्रकरणेनेति प्रत्ययारम्भाद्बाध्यतइति भावः । एवञ्चेति । लक्ष्यानुरोधेनतस्यतदन्यपरत्वेचेत्यर्थः । आरभ्यैत्यनेनसमासान्तपरिग्रहः पठितेष्विति शेषः । व्याख्यानादिति । ङाबग्रहणस्य स्त्रीप्रत्ययमात्रोपलक्षणत्वस्य प्रत्याख्यानानुरोधेनावश्यकत्वेन तद्भिन्नतद्धितस्यैवतेनग्रहणमिति । सूत्रमतेपियूनस्तिरित्यत्रतदसम्बन्धः । अत्यन्तस्वार्थिकादिषु तुतेषामतिरिक्तार्थाभावेन परिपूर्णमिति न्यायाविषयतयासुबन्तात्तद्धितइति सिद्धान्तस्यङापोः प्राक् प्रवृत्तेश्चाभावात्तदसम्बन्धः । न्यायसिद्धेर्थेसम्मतिमप्याह । सर्वस्येति । तत्रभाष्यउक्तार्थासंस्पर्शादाह । कैयटइति । अत्रकेचित्प्रत्यवतिष्ठन्ते तत्रहि भाष्येपदग्रहणंकर्तव्यंसमासनिवृत्त्यर्थंसप्तपर्णइत्युक्तं यदासप्तसंख्याकपर्णविशिष्टोवृक्ष एकत्वादिसंख्यानालिङ्गितो वीप्साविषयव्याप्तिबोधसमयेवृक्षग-

तैकत्वस्याननुभवाद्विभक्त्युत्पत्तेः प्रागेवसमासस्यप्राप्तिरपदत्वान्नभवति । कृतेस्वादौ पदत्वेपितदर्थसंख्यालिङ्गितार्थेवीप्सितत्वाभावान्नभवतितदालिङ्गितेवीप्साविवक्षायान्तु भवत्येवघटंघटंपश्येतिचतद्भावः । सप्तसंख्यानिपर्णानिवीप्स्यन्ते नतु तद्वान्वृक्षइति कैयटस्तुचिन्त्यएववृक्षादेरवीप्सितत्वेविभक्त्यन्तेइवद्विर्वचनाप्रसक्त्यापदग्रहावश्यकत्वासङ्गतेः ततःतद्धितनिवृत्त्यर्थञ्च द्विपदिकेति स्त्रीत्वद्वित्वलक्षणलिङ्गसंख्यान्वितःपादार्थोवीप्स्यते नत्वेकत्वाद्यालिङ्गितइति वीप्साविषयव्याप्तिबोधसमयएकत्वादेरननुभवात् । सुबुत्पत्तेः प्राक्पूर्वान्तत्वेन तद्धितान्तस्यटाबन्तस्यद्विर्वचनं प्राप्नोतिपदाधिकारात्तुनभवतिकृतेसौहल्ङ्यादिलोपेचपदत्वेपि तदर्थकस्यैकत्वालिङ्गितस्यावीप्सितत्वान्नभवतितत्वेतुभवत्येवेति भावः । यत्तु कैयटः स्त्रीत्वस्यापि वीप्सायामनन्तर्भावमाहतन्नसम्यग् द्विपदिकाभ्यामित्यत्रप्राप्नोतीति वक्ष्यमाणभाष्यासङ्गतेः । नहिलिङ्गस्याऽवीप्सितत्वेटाबन्तेस्वादिष्वितिपदत्वेपि द्विर्वचनप्रसक्तिरस्तीति तच्चतद्धितोत्पत्तेः प्राक् समासस्यनद्विर्वचनमपदत्वादित्यभिप्रायकमाह । तदपि न प्रकृतार्थस्यभाष्यानभिप्रेतत्वात् तथाहि तद्धितनिवृत्त्यर्थमित्यस्य तद्धितान्तनिवृत्त्यर्थमित्यर्थः । नहि तदुत्पत्तेः प्राक् तदस्तिसमासनिवृत्त्यर्थमित्यनेनगतार्थत्वाच्च । किञ्चतथाभिप्रेतत्वेहि तद्धितेनोक्तत्वान्न भवतीति । तदुत्तरन्तत्प्रत्याख्यानभाष्यासङ्गतिः नहि ततः प्राक्तेनोक्तम्सम्भवतीति पुनःसर्वथानिरवकाशत्वेन तद्बाधकत्वात्ततः प्राक् तदप्रवृत्तेश्च वुनिकृतेपि तत्रकौण्डिन्ययायेन-

बाधेऽपवादेकृतउत्सर्गप्रवृत्त्याद्विर्वचनंप्राप्नोत्येवेति तवापिभाष्यमसङ्गतमेवेतितुन वाच्यम् । उत्सर्गेद्विर्वचेकृतउक्तत्वाद्वीप्सायां वुनोऽप्राप्त्यातन्न्यायविषयाभावात् । हलङ्यादिलोपेकृतेपदत्वात् । द्विपदिकाइति बहुवचनान्तंपाठ्यमितिच्च तदुक्तंचिन्त्यम् । तत्पाठस्यापि योजितत्वात् । यत्तुविवरणेद्विपदिकेत्युत्तरंमाशसइत्यपपाठः पदग्रहणेनापि तत्रतन्निवृत्तेरशक्यत्वात् । शसन्तस्यापिपदत्वात् । तत्पूर्वभागस्यापिसुबन्ताच्छसउत्पत्त्यापदत्वादित्युक्तं तत्रतत्पूर्वभागस्यापि स्वादिष्वितिपदत्वादिति युक्तःपाठोऽत्यन्तस्वार्थिकानांसुबुत्पत्तेः पूर्वमुत्पत्तिरिति । पूर्वमुक्तत्वादिति । प्रकृतग्रन्थार्थस्त्वत्थं द्वित्वसंख्यायुक्तेति स्त्रीत्वयुक्तेत्यपि बोध्यम् । एकत्वेति । कैयटेलिङ्गानन्तर्भावस्योक्तत्वेप्युक्तहेतोरेवतत्त्यागोनन्तर्भावात् । सुबुत्पत्तेः प्राक् टाबन्तस्येति शेषः । तस्यपदत्वाभावाद्द्विर्वचनाभावःप्रयोजनमित्यन्वयो ननु कृतेतद्धितेऽपदत्वात्तेनोक्तत्वाद्वाद्विर्वचनाभावेपि तदुत्पत्तेः प्राक् समासस्यकुतोनेत्यत आह । सेति । अभावेनेति । तस्याःसंख्यापेक्षत्वेन वहिरङ्गत्वात्तद्धितस्यच्च स्वार्थिकत्वेनान्तरङ्गत्वात् । तेन बाधादिति भावः । यद्यपि वुनोबाधकत्वात्तद्विषयेद्विर्वचनाप्रवृत्तिरिति वक्तव्यंतथाप्यपदत्वात्प्राप्तिरेवनेत्युक्तेरेवन्याय्यत्वादेवमुक्तमिति । प्रत्याख्यानेत्वतथैव पूर्वमप्रवृत्तिरिति भावः । ननूपजनिष्येति न्यायेनभत्वेनपदत्ववाधात् । प्राक् तद्धितोत्पत्तेः समासेकृतेपदत्वाभावात्तदभावइति कैयटःसुयोज्योऽत आह । पुंयोगेति । अपिनापूर्वोक्तकैयटग्रंथ-

हुः । एतेनोक्तार्थस्य भाष्यासंस्पर्शसूचितत्वान्न्यथासूत्रे-पीति वदेत् । इनुणन्तत्वरूपेति । समासविधौहिगतित्वज्ञा-नंसमर्थत्वज्ञानंचेतिद्वयमेव । अण्विधौतु प्रातिपदिकत्वंसमर्थ-त्वमिनुणन्तत्वंचेतित्रयोऽतस्तस्याधिक्यम् । न च पदद्व-याश्रितत्वेन समासस्यापि बहिरङ्गत्वेनोभयोः तयोःपरत्वा-दणेवस्यादिति वाच्यम् । सांकूटिनादिलक्ष्यानुरोधेनोक्तान्त-रङ्गत्वस्यैव पुरस्कारादिति कैयटाशयः । एतेन समासस्यान्त रङ्गत्वेपि प्रतिपदोक्तत्वादण्स्यादित्यपास्तम् । इनुण-न्तनिष्ठधर्मतयोपस्थितावण्विध्युपस्थित्याऽण्विधेर्विलम्बोप-स्थितिकत्वात्प्रत्युततन्निष्ठावश्यकसमर्थत्वरूपधर्ममात्रोपस्थितौ समासविध्युपस्थित्यास्तयैवतत्त्वात् । असङ्गतिरिति । ननु तदन्तात्तदुत्पत्तावपि परिभाषाङ्गीकारेण सुबुत्पत्यनन्तरंप्राप्त्या तदुत्पत्तेः प्रागेवान्तरङ्गत्वात्समासेततस्तदुत्पत्तौ समुदायाद-णिसांकूटिनसिद्धिः तदनङ्गीकारेतुद्वयोरपि तदुत्पत्यनन्तरंयु-गपत्प्राप्त्यैकपदाश्रितत्वेनान्तरङ्गत्वात्केवलादणिसङ्कौठिनमि-तिस्यादितिरीत्याभाष्यस्य सुयोज्यत्वेनकाप्यसङ्गतिरिति चेन्न । सत्यामप्येतस्यामवयवादुत्पत्तिः प्राप्नोतीति तदुत्तरभाष्यानुरो-धेनास्यापि भाष्यस्योक्ताभिप्रायकत्वेनैव व्याख्येयत्वेनासङ्गते स्तादवस्थ्यात् । नहि सुबन्तात्तदुत्पत्तिरिति नियमेऽवयवात्त-दुत्पत्तिः प्राप्नोतीत्यवयवस्य तदत्वाभावाद्यनतद्भाष्यंसङ्गतं स्यात् । इदं प्राचामनुरोधेन वस्तुतःसंचस्कारेत्यादौ सु-टइवान्तरङ्गतरार्थकगतिनिमित्तकत्वेन समासस्यान्तरङ्गत्वं बो ध्यम् । तदाह । अन्यत्रेति । एतेन तत्त्वेनततत्त्वाङ्गीकारेस्वग्रन्था-

न्तरविरोधइत्यपास्तमिति केचित् । स्वौजस् । द्वन्द्वइति । जसादौरुत्वं सौत्रत्वान्नेति भावः । वस्तुतस्तिप्तस्झोत्यत्रवक्ष्यमाणरोत्यालाघवेन निर्विभक्तिकानुकरणभूतानिपृथक्पदान्येवेत्यरुत्वं न्याय्यमेवेति बोध्यम् । विभक्तिश्च । नन्वेवंत्रोणित्रीणोत्यस्याननुवृत्तावष्टनआवोत्यादौ निर्वाहेपि प्रथमयोरित्यादौ दोषोऽत आह । प्रथमेति । वाच्ययोरित्यत्रत्रिकयोरिति शेषः । व्याख्यानादित्यस्यार्थमाह । अन्यथेति । औजसोरिति । स्वाद्योरिति तुनोक्तम्जस्व्यावृत्त्यर्थकान्नादिचीतीज्ग्रहात्सोरजादित्व ज्ञानंशिवोऽर्च्यइत्यत्रबोध्यम् । तस्माच्छसइति लिङ्गमप्यत्रबोध्यम् । सुप्संज्ञेति । तिङ्संज्ञाप्येवमेव तदन्तात्तरबाद्यापत्तेः । रामइहेत्यादौ निघातापत्तेश्च । दोर्घापत्तेरिति । सन्निपात्तपरिभाषयादोर्घवारणेतुसर्वदेत्यादौ सर्वस्यसुपोत्याद्युदात्तत्वापतिर्बोध्येत्यन्यत्रविस्तरः । बहुषु । नग्रहणमिति । तेन बहु≍पर्वतइत्यादौन नचात्रपरत्वादेकवचनंस्यादिति वाच्यम् । तस्यौत्सर्गिकत्वेनतस्यतदपवादत्वादिति वदन्ति । कोशादपि वृद्धंव्यवहारस्यप्राबल्यमितिध्वनयितुमाह । भर्तृदारेति । अयंस्मार्तप्रयोगः । अन्त्यःशावरभाष्योयः । रुत्वइति । सुबन्ततयेति । हेतौ तृतीयासुबन्ततात्रेतुकंयत्पदन्तदेकदेशविकृतन्यायेन कृतरुत्वइत्यर्थः । यथाश्रुतंतुनसाधुतेनन्यायेन विकृतावयवनिबन्धनकार्यस्यानतिदेशात् । ममहेतूपादानन्तूपदेशाप्रवृत्तिद्योतनाय । इदञ्च पक्षद्वयेपि बोध्यम् । अग्नीइत्यत्रेवरुत्वस्यासिद्धत्वात् । सुबुद्ध्या प्रवृत्त्यापुनःपदत्वमित्यादिप्रागुक्तञ्चनविस्मर्तव्यम् । सरूप ।

विभक्त्यन्तानांसरूपाणामेकशेषइत्यर्थइति पक्षसाधारणंफलं वक्तुमाह । भ्यामोति । यद्वैवकारापकर्षाभावउपलक्षणस्याति प्रसङ्गमात्रंभ्यामोति सिद्धान्तपक्षेत्वौजसादावपि तद्व्यावृत्तिः फलं वोध्यम् । ध्वनितञ्चेदंभ्यामादावपीत्युक्त्याबृहति । तद्धितादाविति।आदिनाक्यङ्हारितं हारिणंहरिणीयतेहरिताय त इत्यत्रननुसत्यप्येवकारापकर्षेमात्रामात्रोरेकशेषोदुर्वारोऽलौकिके औजसादावपि सारूप्यादत आह । लौकिकेति । यद्यपि विरूपाणिनेत्यर्थपर्यवसानात् । तत्र ससुवारएवतथापि अन्यतरोयंलौकिकम् । अपरोयमलौकिकमादायाव्याप्तिवारणंशेषफलं बोध्यमितिवदन्ति। अत्रावैरूप्यमपि प्रातिपदिकांशएवतेन संज्ञासर्वनाम्नोःप्रथमाद्योरेकशेषोन्यथाजसिप्रथमेप्रथमाइति वैरूप्यान्नस्यादिति बोध्यमित्यन्ये । नन्वेकशेषस्यसहविवक्षाविषयत्वेकथमन्यत्रतदुक्तिरत आह । द्विर्वचनेति स्पष्टार्थमिति सूत्रारम्भसामर्थ्यात् । वक्ष्यमाणेतरार्थस्यापि बोधयितुंशक्यत्वेनचक्रियमाणएकइति स्पष्टतयाबोधनार्थमित्यर्थः । एकस्यामपीति । समानायांत्वित्यर्थः । बोधयितुमिति । अन्यथाचालनोन्यायेनभिन्नविभक्तौ वैरूप्यमादायासम्भवः स्यात् । रामौरामाभ्यांस्वसास्वसारावित्यादौ भिन्नविभक्तौसर्वत्रवैरूप्यस्यसत्वादिति भावः । नैकशेषइति । तेनवृद्धोयूनेत्यादिविरूपैकशेषस्य लक्ष्येगार्ग्यौगर्गा इत्यादौ समाहारएकशेषेणनगार्ग्यइत्येकवचनंनविभक्त्यन्ततन्त्रन्तुनवैरूप्यात् । सरूपैकशेषस्थलेतु तन्त्रेणरामइत्यस्यदुर्वारत्वात् । अन्यतरस्यामित्यनेनेति । फलसेनेतिवार्तिकस्थविकल्पेनैकव-

द्विधायकत्वोक्तेः। आश्चिकादावप्राप्तैकवद्भावविधानार्थमिति वाच्यम्। ननु तस्यविधत्वेप्यबहुप्रकृतिकआश्चिकादिद्वन्द्वश्चेति नित्यैकत्वेप्राप्ते विकल्पार्थमिदमिति कथंज्ञापकत्वमिति चेन्न। तेनप्रकरणेनसमाहारगतैकत्वानवादात्। तत्रद्वन्द्ववाच्यसमाहारेवर्तिपदार्थगतसंख्यारोपाभावेप्येकशेषवाच्यसमाहारेतदभावेबीजाभावात्। ननुज्ञापकेनसमाहारएकशेषाभावेपि द्वन्द्वे घटघटमिति स्यादेवातःसामान्यतोज्ञाप्यशरीरमाह। समाहारेवृत्त्यभावेति। लुप्तेति। शेषशब्दस्यकर्मसाधनत्वेलुप्तस्वंतंभावसाधनत्वेतु लुप्तङन्तम्। अतएवावस्थानमिति व्याख्यानंसङ्गच्छते न च भावसाधनत्वआकडारेति सूत्रस्थभाष्यविरोधः तत्रह्येकेतिसम्बन्धादेकग्रहणमत्रत्यंप्रत्याख्यातमिति वाच्यंभावसाधनेशेषशब्देविभक्तिविपरिणामेनेति विवरणेनैवसमाधानात्। तत्रैकपदार्थेश्रूयमाणेत्यस्यफलंयुष्मदीति सूत्रेस्फुटीभविष्यति। द्विवह्वोरिति। संख्यापरत्वात्साधुत्वम्। अंशाविशिष्टोदात्तकत्वेसत्यं शाविशिष्टानुदातकत्वं गृहीत्वोदात्तानुदात्तयुक्तोपि स्यादेवेत्यत आह। कदाचिदिति। द्व्युदात्तत्वेति। द्वावुदात्तवन्तावश्चशब्दौ यस्यतत्वंकर्मधारयेतुमतुबनस्यात्। उदात्तशब्दोधर्मिपरःतस्यैवग्रहणेमानाभावादिमंगृहीत्वास्यादेवदोषः स्वरभिन्नेति। तृतीयासमासः। दशान्तेति। अष्टादशान्त्यइत्यर्थः। अग्रएकोनविंशत्यादाविति बोध्यम्। एकादशादित्यागेबीजाभावादित्यन्ये। एकशेषेति। एकश्चएकश्चदशचदशचेत्यादाविति भावः। अत्रद्वन्द्वानभिधानंस्पष्टमेवद्वादशादाव-

स्येत्रातएवत्रिरूपसंख्यावाचिद्वन्द्वानभिधानप्रतिपादकेत्पदा-
दितः शेषेपुंनपुंसकेत्यत्रशेखरेनत्रान्तानामित्येव पाठः । वि-
शत्यादौत्विति । संख्यापरिच्छिन्नसमुदायपराणां नतुसंख्येय-
मात्रपराणां ब्राह्मणानांविंशतोत्यादौ विंशतिसंख्यावच्छिन्नौ-
ह्यौसमुदायावित्यर्थप्रतीतेः विंशतिघटाइत्युक्ते चत्वारिंशताम-
प्रतीतेः । चुटू । चुटुषः प्रत्ययस्येति वाच्येयोगविभागादस्या-
नित्यत्वेनचुंचुवादौनत्वमिति प्रकारस्यभाष्यानुक्तत्वेनायुक्तं-
ध्वनयन्नाह । यादित्वेति । टीटचोप्येवमेवेत्वाभावइति वोध्य-
म् । असिद्धत्वाच्चनांत्यमितिपूर्ववत् वहिरंगासिद्धत्वादि-
तिभावः । ननुसूत्रेचकाररूपवलपरत्वात् तत्प्रवृत्तावपिप्रयो-
गेत्वित्संज्ञालोपाभ्यामेव तन्निवृत्तिर्वाच्येति कथंनांत्यमितिचे-
न्नाव्यवसितांतत्वाभावात् नन्वंतरानित्यस्यप्रतिपक्षिणिवाच्ये-
ति । तथोक्तिरयुक्ताऽत आह । अनन्तरापेक्षयेति । एङ्ह्र-
स्वात् । पंचम्यंतइति । नन्वेवमपिकतरदित्यादावति व्याप्ति-
र्दुर्वारैवयस्मात्कतरशब्दात्संबुद्धिर्विहितासआदिर्यस्यादडा-
देशाकारविशिष्टस्यतस्यचह्रस्वांतस्यतदादित्वेनततः परस्यदका-
रस्यसंबुध्यवयवहल्त्वेनेति चेन्न। परिभाषायांतदादिपदेवहुव्री-
हिसत्वेपि विहितप्रत्ययप्रागभावएवगृह्यतेप्रत्ययेङ्गमित्युत्तरसू-
त्रेतस्यैव संभवेनार्थाधिकारानुरोधात् तथाविधस्यचप्रकृतेह्र-
स्वांतत्वाभावात् हलश्चततः परत्वाभावादतएवतत्रतत्प्रत्य-
यग्रहणेशब्दस्वरूपंविशेष्यमादायतदंतविधिरित्युच्यतउक्तार्थं-
कतदादिपदस्यप्रत्ययांतेनसामानाधिकरण्यासंभवेतस्यविशेष्य-
त्वासंभवात् नन्वेवंप्रदेशेतेनतस्यकथंसामानाधिकरण्यमिति

चेदन्वयादिवाधेनशब्दाधिकारस्योकारादिति गृहाणपदोपस्था-
प्यतदादिपदेऽर्थवानेवाङ्गपदार्थः । अर्थाधिकारादिति नक्वापि
दोषशंकलेशःविकरणांतस्या प्यर्थवत्वमस्त्येवकतरदित्यत्रतुद-
काररहितस्यनेति प्रकृतसूत्रस्थभाष्यमपीहमानंतल्लहि विहि-
तविशेषणंह्रस्वग्रहणंयस्माद्ह्रस्वात्सवुद्धिर्विहितेति । विधीयते
ऽस्माद्विहितंवाह्रुलकादपादानेनिष्ठाह्रस्वपदंतद्विशेषणंततस्तदं-
तविधिः। यस्मात्संवुद्धिर्विहितातस्माद्ह्रस्वान्तात्परःसंवुद्धेर्ह्रस्वु-
प्यतइति सूत्रार्थःयथाश्रुतंतुनयुक्तम् । ह्रेरामह्रेसह्रेगौरीत्यादा-
वव्याप्तेः तदादीत्यस्योक्तार्थकत्वन्ध्वनयितुंविहितेति प्रकृ-
ताभिप्रायकमुक्तमितिदिक् । स्पष्टमिति । अयमेवात्राक्षेपप-
दार्थएङादेस्तद्विशेषणत्वात्तदन्तविधिरतएवात्राङ्गसंज्ञासूत्रानु-
पन्यासः । नन् प्रकृतिमंतराप्रत्ययानुत्पत्यातेनतदुत्पत्तिर्भवत्ये-
वात आह । किंचेति । ननुरात्रिभुक्तिरपिपोनत्वजनिकैवेति
तत्रापितज्ज्ञानेतदनपेक्षत्वमेवात आह । शास्त्रइति । दिवाभुं-
जानत्वेसतिपोनत्वमित्यर्थस्यतादृशानुमितिंबिनापि विरोधग्र-
स्तत्वात्तत्रलोकेसंभवत्येवसः प्रकृतेतुनतथागमकमिति भावः ।
ननु तदादेःपरमेकवचनंसंवुद्धिरित्यर्थाज्ञानेप्यपेक्षैवात आह ।
अतएवेति । नत्वङ्गाक्षेपेणेति । नन्वङ्गाधिकाराभावेङ्गसंज्ञा-
सूत्रस्याप्यभावेन कथं तदाक्षेपंवदेदिति चेन्नाङ्गस्येत्यस्याभावे-
पि ह्रस्वादंगादिणःषीध्वमित्वाद्यर्थमंगसंज्ञासूत्रस्यावश्यकत्वा
दङ्गपदेनप्रकृतेर्विवक्षणाच्च । दिगिति । अनुमितस्यशाब्दे-
न्वयित्वाभावाद्विशेष्यविशेषणभावनिबन्धनतदंतविधेरलाभो-
दिगर्थः । परत्वात्पूर्वेति । लोपेऽपरनिमित्तकत्वेनांतरंगत्वो-

द्भावनन्तु प्रतिपदोक्तत्वमस्यबोध्यम् । ननु तवापिहलिसंबु-
द्ध्यवययत्वस्यामिसंबुद्धित्वंहृस्वांतेऽङ्गत्वमित्युभयतआश्रयणमे-
वेति तत्तदभावेकथंसिद्धिरत आह । तत्स्वीकारेपीति । म-
मतुपौर्वापर्यनापेक्षितमिति भावः । ननुस्थानिद्वयरूपातिदे-
शेनतत्संभवोऽत आह । तद्रूप्येति । एतदर्थमेवेत्यस्यार्थ-
माह । यस्येति । असाधारणत्वनिवेशवादिमूलकृन्मतेनश-
ङ्कते । मात्रनिष्ठेति । प्रत्याहारपरामर्शवेलायां लोपश्चवलवत्त-
रइत्युक्तेरुकारनिवृत्त्यातस्यतन्निष्ठत्वमिति भावः । अन्त्यपदस्य-
सादृश्येलक्षणानङ्गीकर्तृ तद्रीत्यैवसमाधत्ते । विशिष्टेसत्वेनेति ।
त्वन्मतेह्युक्तरीत्यामध्यगानुच्चन्यनिवृत्तावपीकः सुपइत्यादिनि-
र्देशान्यथानुपपत्त्याऽऽद्यान्तपदपरामर्शयोग्ययोःप्रागनिवृत्तिरि-
त्यस्यावश्यंवक्तव्यतयास्वपदेनविशिष्टस्यैव परामर्शात्तस्यविशि-
ष्टेसत्वमिति भावः। विशिष्टस्यैवोद्देश्यत्वेनेति । एवंचप्रकृतेऽल्-
वृत्तित्वेपि तस्यनतन्मात्रवृत्तित्वमिति रुत्वस्येवातिदेशोभवत्ये-
वेति भावः । तस्य । संबुद्धिलोपस्य । अनल्विधित्वात् ।
स्थानिसंबंध्यल्मात्रनिष्ठधर्माश्रितविधित्वाभावादित्यर्थः स्वम-
तेपि सोरमित्युक्तत्वादनल्वृत्तिधर्मवत्त्वेननस्थानितावद्वृत्तिक-
त्वादिट्त्ववदतिदेशोभवत्येवेति बोध्यम् । ननु गुणस्यपरनि-
मित्तकत्वेनबहिरङ्गत्वात् प्रकृतिप्रत्ययसम्बंधिवर्णमात्रानिमित्त-
कत्वेनान्तरङ्गत्वमपीत्युभयोरन्तरङ्गयोः परत्वाद्गुणएवस्यादत
आह। अङ्गाधीति । एवंचतस्यतन्मात्रानिमित्तकत्वमिति भावः ।
एग्रहणेति । स्मृतवादिषुतुगुणेणित्वाद्वृद्धिप्राप्तिरिति भावः ।
सामर्थ्यादेवात्रेति । प्रत्याहारग्रहणस्येति भावः । ननुरामादौ

ह्रस्वग्रहणस्यसाफल्याद्दीर्घादौतयाकथंवार्येतात आह। गुणेति। अतएव ह्रस्वांशेतदप्राप्तेरेव। असमबलत्वेनपरत्वासम्भवादाह। अभ्युच्चेति। अनवकाशेति। येननेतिन्यायेनोत्सर्गप्रवृत्त्युत्तरमचारितार्थ्येपिवाधः। तदप्राप्तियोग्येप्यत्रयोग्यतावर्तमानेवेति नाग्रहइति चभावः। ह्रस्वस्यगुणइक्पदोपस्थित्यारामेत्यत्रतदप्राप्त्यालोपस्यनानवकाशत्वमिति बोध्यम्। द्विमात्रेति। कुमारीत्यादौ त्रिमात्रार्थश्चेत्यर्थः। वाच्छन्दसीत्यत्रानुवृत्यर्थञ्चदोर्घेकृतेपरत्वासंभावादाह। विहितेति। यद्यपिसकाररूपावयवविशेषणत्वेनासम्भवः सुपरिहरस्तथापिसुपुरुषास्त्रियइत्येतद्व्यावृत्तयेतदुक्तमिति बोध्यम्। एतानिति। अकःपरोयः शस्तस्यनइत्यर्थेनादेःपरस्येत्यकारस्यनेसुपित्चेतिदीर्घेसंयोगांतलोपरामानितिसिद्धावपिहरीनितिनसिध्येत् तदर्थमगंतात्पुंसोविहितस्येत्यर्थेतुयेननेति न्यायेनदीर्घवाधापत्तिः। एतेननुमिसंयोगान्तलोपेनुंकसंयोगादिलोपेवानदूषणमित्यपास्तम्। पञ्चमीसमासेन स्थानिवत्वादीर्घोत्तरमपिनुमादेः प्राप्त्यातक्रकौण्डिन्यन्यायप्रवृत्तेः सुवचत्वात् वस्तुतः पूर्वसवर्णदीर्घान्तात्पुंसस्तदादेः परस्येत्यर्थोन्याय्योविहितेति तुफलितार्थकथनपरं द्वितीयतदन्तविधिप्रासातिप्रसङ्गभगायवेति बोध्यम्। अट्कु। पर्याणङ्केति। व्यावर्तकस्यपदस्यणत्वाश्रयातिरिक्ततद्धितभिन्नपरत्वइति वक्ष्यमाणस्यणत्वाश्रयप्रत्ययातिरिक्तेत्यर्थः। प्रत्याख्यानेन फलाभेदायेतिनिषेधप्राप्तिरत्रेतिबोध्यम्। योगार्थस्येषत्स्पृष्टलकोतिप्रसंगाद्रूढ्यर्थमाहतत्रानस्वारेत्यादिना। उरःकेति। उरसिकंयस्यउरः का-

यतीतिवाविग्रहः । अन्येनव्यवेति । उक्तयुक्त्यनंगीकारेऽयमर्थो नस्यात् । न्यासेनसिद्धइति । न च चुटुत्वित्याद्युक्तौमृत्स्ने त्यादाविवादर्शेनेत्यादावर्पिणत्वम्बारितं स्यादेवञ्चादर्शेनेत्यत्रणत्वसिध्यर्थमेव तथानोक्तमिति कुतोनस्यादिति वाच्यम् । चुटुत्वेवमुक्तावपिरषाभ्यामिति पञ्चमीनिर्देशाद्व्यवधानमात्रेप्राप्तावेतैरेव व्यधानेभवति । आदर्शेनेत्यत्रा-डादिसहितव्यवधानेनभवत्येवेति नियममुखेनव क्तुंशक्यत्वादित्याहुः । यद्वाशर्व्यवायेनेति शेषभाष्यस्थतवर्गाद्यनुरुत्योपलक्षणतयैवोद्द्योते व्याख्यातत्वेनमात्रपदविशिष्टन्यासेपितात्पर्य्यंबोध्यम् । न्यासश्च निषेधप्रकरणेसत्त्वेत्थंनभ्वेति प्रकरणेपदेनव्यवायेचुटुतुलशर्मात्रेणेति विधिप्रकरणेचरषाभ्यामित्यस्यानन्तरम् आङइति पञ्चम्यंतस्याधिकारःकार्यःशरर्चायोगवाहभिन्नस्तुसाहचर्यात् तेनक्रिमिशब्दादोचक्षाणिजन्तात्किपि शब्दपराञ्शब्देन षष्ठीसमासेशसिऽल्लोपेक्रिम्णःपश्येत्यत्रशराव्यवायात् णत्वंनस्यादिति फलभेदोन । अत्रन्यासएकोनविंशतिमात्राविंशतिर्वायथान्यासेसप्तदशमात्राःनुम् ग्रहणत्यागेपञ्चदशवेति गौरवमभिप्रेत्यगुरुन्यासेत्युक्तमाद्ये कल्पेतुमात्रपदाभावेन पञ्चदशतास्तथापि गुर्वित्यस्यलघुभिन्नेत्यर्थइति नदोषः । प्रतिपत्तिगौरवादस्यैकदेश्युक्तित्वम् । प्राप्तिरेवनेति । ननु निषेधमुखेनप्रवृत्तिरितिपक्षेव्यवायेणत्वम्भवत्यडादिभिन्नैराक्षरसमाम्नायिकैर्व्यवायेनेत्यर्थात् प्राप्तिरेवेनेति सत्यंस्वसिद्धांतभूतविधिमुखेनप्रवृत्तिरिति पक्षेत्वाक्षरसमाम्नायिकातिरिक्तैः व्यवायेणत्वंभवत्यडादि-

भिव्यर्थवायेणत्वस्यभक्तीत्येवार्थात्तस्यचात्रसत्वात्प्राप्तिरस्त्येव । किञ्चव्यवायेपीत्यनेनकृशेनेत्यादौणत्वापत्तिरनाक्षरसमाम्नायकाऽज्झक्त्यव्यवायसत्वादिति चेन्नाट्कुप्वाङ्नुम्व्यवायेपि पूर्वत्रव्यवायेपीत्यपकृष्यतेरषाभ्यामव्यवहितपरस्याडादिव्यवायेणइत्यर्थात् । रषाभ्यामव्यवहितपरस्यानाक्षरसमाम्नायिकव्यवायइत्यर्थाच्चाव्यवायेपीति सूत्रेपूर्वसूत्रानुवृत्त्यामृगेणेत्यादौ नदोषः पूर्वोक्तवार्तिकमतेप्येवंसत्वेन तदात्वितिविशेषोपादानकथनमिति तुच्चिन्त्यंप्रत्याख्यानेति न्यायप्रवृत्तौतुफलभेदान् नस्यादितिभावः । तस्मात्प्रगुणःकृतात्मसंस्कारःप्रधानंप्रतिपद्यते प्रधानस्योपकारेहितथाभूयसिवर्ततइतिन्यायशरीरं यस्मात्परोयःप्रत्ययोविधीयतेतत्प्रत्ययोपश्लिष्टतदाद्यंगमित्यर्थेनसिद्धेपरिभाषोपस्थितिमुंधा परनिमित्तकत्वंतुपरसत्ताज्ञाप्यसत्ताकत्वेनसुलभमिति वक्ष्यते । असिद्धरनेति । स्थानिवत्वन्तुनोक्तम् पदसंस्कारआदिष्टादचः पूर्वत्वाभावाद् वाक्यसंस्कारेपि लोपेतत्प्रोक्तावपोयङिनपदान्तेति निषेधात् । नातिरिक्तेतिविकारकृतमतिरिक्तत्वंतुन तेनजहिविंशकादावसिद्धत्वंस्पष्टंचेदमुद्द्योते यत्तुशब्दरत्नमनूद्योपाततादव्यापकयर्माबच्छिन्नेत्यादिनाक्लिश्यन्तेतन्मुधैवव्यतिरिक्तस्यैवाभावेनदोषलेशाभावात् । ननुसमानाश्रयत्वमसिद्धत्वाश्रयशास्त्रसम्बन्धिनिमित्तान्यूनानतिरिक्तकार्यनिमित्तान्यतरकत्वमित्येवास्तुमास्तुचविधिग्रहणमत आह । भनक्तीति । न च सिद्धान्तेपि मिदचइति विधानमाश्रित्यांगत्वंदुर्वारमिति वाक्यम् । तेनाचः परत्वस्याज्ञातस्यज्ञापनेपि प्रत्ययस्यापूर्वबोध-

नाभावात् । अतएवभनक्तीति भाष्येप्रयुक्तंभृसुवोरित्यत स्तिङोत्यनुवृत्याऽऽनेमुगिति सुत्रेभाष्येस्पष्टतयादोर्घवारणेतु स्त्रोइ पश्यतीत्यत्रैव स्त्रीशब्दस्यचसंज्ञापत्तिर्वोध्या ननु विकरणान्तेदीर्घआरंभसामर्थ्यात्सिद्धः।नच्चयायामीत्यादौ यङ्लुगंते पुत्रीयामिवोभूयामह्वेच्चिक्रोर्षामीत्यत्रशबेकादेशस्यान्तवत्वेनाङ्गत्वेचचरितार्थइति वाच्यम् । आद्यस्यच्छन्दोविषयत्वात् अन्येषुतुछ्रदतिङ्सूत्रीयभाष्यरीत्याशबेकादेशस्यस्थानिवत्वात् प्राप्तिरेवनेत्यत आह ।करोमाति । उद्द्योतीयफलप्रदर्शनमप्युक्तरीत्याऽरूचिग्रस्तं बोध्यम् । ननु प्रत्ययेङ्गमितोयतैवसिद्धेपदत्रयकरणाद्हितपदाध्याहारेविधिग्रहणंमुधैवेतिचेन्न। प्रत्यासत्तिप्रतिबन्धेन प्रत्ययभेदएवप्रवर्तनेन चारितार्थ्यसंभवात् पदत्रयस्यफलन्तुहरिर्भवामीत्यत्रदीर्घःकेवलेनेति बोध्यम्। टाङसि। अङ्गाधिकारेपाठोव्यर्थः स्यादिति । उक्तलक्ष्यसिध्यर्थमावश्यकपरिभाषाद्वयसंचारेणैवानंगादंतस्यटेत्यादिव्यावृत्तौ सिद्धायांविभक्तिविपरिणामेनात्रव्याख्यानंतवनिष्फलंस्यादितिभावः । अंगनिमित्तेत्यर्थेतुनतयोरावश्यकसंचारकत्वम् संचारेतुपाठोनकार्यइतिस्पष्टंभाष्ये । एतनतआश्रित्यपाठवैयर्थ्यस्यभाष्येसिद्धांततत्वेनतदापादनमसंगतंस्यादित्यपास्तम् । ङेर्यः । संप्रसारणेइत्यादिनिर्देशस्योभयोरग्रहेज्ञापकत्वसंभवेपिसंप्रसारणइतिपररूपेणचतुर्थ्यन्तमेवा कष्टायेति। सप्तम्यंतमेवेत्यपिवक्तुंशक्यत्वेनसप्तम्याएवग्रहाभावेमतत्वासंभवादाह व्याख्यानेति तच्चसर्वनाम्नःस्मैस्मिनौङसेःस्मादित्येवसिद्धेङिग्रहणरूपंप्रतिपदोक्तरूपञ्चेत्यन्ये । उपजोव्येति

न्यायाश्रयणेलिंगंतुवृद्धावित्यादिनिदेशः। यत्तुवान्विह्रस्वश्चेत्ये-
वसिद्धेङितिह्रस्वश्चवामीतिसूत्रद्वयंलिङ्गन्तद्विभ्रूणामित्यादौ-
नुडर्थंनुट्यजादित्वस्यविनाशादिति तन्व वामोत्युक्तेप्यात्वं-
पुग्विधेरिति न्यायेनौपदेशिकसन्निपातविघातसत्वेन चारि-
तार्थ्याभावादचीत्युक्तेपि सामर्थ्येनपरिभाषायावाधाच्च। तंवि-
हन्तीति ननुयादेशनैव सन्निपातनाशाद्दीर्घस्यकथं तद्विघात-
कत्वमितिचेन्न । तेनपूर्वापराभावसन्निपातविघातेप्यदन्तां-
गेतिविशेषणसन्निपातस्यसत्वेनदीर्घस्यतद्विघातकत्वात् । स-
न्निपातलक्षणप्रवृत्तेः प्रागव्यवहितोत्तरंवायः सन्निपातएत-
दन्यतरविघातकस्यानिमित्तमित्यर्थस्यतिस्रइत्याद्यनुरोधेनाव-
श्यकत्वाच्च यञादित्वेति । एवञ्चपरनिमित्तकत्वेन तत्व-
मितिभावः । एवमुक्तिस्तत्वधिकापेक्षत्वेनबहिरंगत्वमितिमत-
साधारण्येनतत्वसूचनाय । नात्रेत्वि । एवंचविघातरूपविशेष-
णज्ञानाभावेनतत्कर्तव्यरूपविशेषणज्ञानाभावेन तत्कर्तृकत्व-
रूपविशिष्टज्ञानासंभवात्तदप्रवृत्तिरिति भावः । अत्रासिद्धत्वं-
यादेशदृष्ट्यानपरिभाषादृष्ट्यातस्या अन्तरंगत्वस्यदुरुपपाद-
त्वात् । परिभाषादृष्ट्याऽसिद्धत्वेपि यादेशदृष्ट्यासिद्धत्वनपरि-
भाषाप्रवृत्तेर्दुर्वारत्वाच्चषाष्टबहिरङ्गपरिभाषायां बहिरंगग्लु तस्य-
पूर्वत्वासिद्धत्वेप्यन्तरङ्गत्वेतस्याश्रयात्सिद्धत्वेन पयोडादौ व-
हिरङ्गासिद्धत्वस्येवयं सन्निपातविघाकं पश्यसितंनिमितम्मा-
भूयाइति तदर्थादिति बोध्यम् । वस्तुतइति । अन्त-
रंगत्वस्यससंबन्धिकत्वेन तज्ज्ञानायबहिरंगत्वज्ञानस्यावश्य-
कत्वेपि सन्निपातलक्षणत्वग्रहस्य तद्विधात्वकत्वग्रहप्रयोज्य-

त्वेन हतज्ञानं नहेतुरिति भावः । ननु पूर्वत्रेत्यस्येवास्या अप्यन्तरंगदृष्टावहिरङ्गं नेत्येवार्थइत्यत आह । किञ्चेति । स्थानिवत्वति । आनुमानिकेनसनिपातलाभ इति भावः । श्रौतेनसंबुद्धित्वन्तुनाल्विधित्वात् । ननु दीर्घाद्युत्तरमतिदेशप्रवृत्यातदभावेपि प्रवृत्तेः प्राक् परिभाषयाप्रतिबध्येतेति नासङ्गतिरिति चेन्न । प्रवृत्तेःप्राग् विघातकत्वासंभावेनयत्नतद्विघातकत्वंभावीत्यर्थावश्यकत्वेनातिदेशेनतद्बुद्धौतद्विघातकत्वाभावात् । अंशास्त्रीयेति । तास्यनिट्त्ववदिति भावः । तेनादेशप्रयुक्तवारणायतदप्रवृत्तिर्बोध्या । तत्रासिद्धेति । अशास्त्रीयेविघातकत्वंभावीत्यादि व्यवहारइत्यर्थः । स्पष्टंचेदमीदूत्सूत्रेप्रदीपे । बहुवचने । रामाभ्यामिति । सुपिचेति तुरामायेत्यत्रसावकाशंपर्युदासेनाकृदित्यस्याप्राप्तेः । आद्यपक्षेऽपवादत्वेपि रामेभ्यइत्यस्सिद्धेश्चरामइति तुनप्रत्युदाहृतंरूप्रत्ययेनैवेष्टसिद्धेः पूर्वोक्तासिद्धत्वबाधस्तुहलोनन्तराइत्यादि निर्देशाद्बोध्यः । नुमापत्तेरिति । पञ्चमीसमासेनस्थानिवत्वेनोभयोर्नित्ययोःपरत्वान्नुमापत्तेरिति भावः । अन्तरंगत्वाद्गुणइति तुनवाच्यम् । इनितस्याऽनित्यत्वेनाप्रवृत्तेरन्यथेकोऽसिद्धत्वात् गुणोनस्यादिति यद्वावार्णादांगस्यबलीयस्त्वात् साचागमविषयेपि । अतएवसतुक्कनिर्देशेनतदनित्यत्वज्ञापनंसंगच्छतउभयोरादेशत्वएवेति ह्रस्वइत्यत्रवक्ष्यमाणपक्षेतुरमइत्यादौ ह्रस्वस्यगुणइति गुणापत्तिर्बोध्योभयोरादेशत्वात् । इट्पक्षेरामेभ्यइत्यलहलिलोपानापतिर्बोध्या । तच्छिवइत्यत्रमनोरमाग्रन्थविरोधंपरिहरति । इतिशेषइति । यत्रतुजश्त्वचर्त्वइति द्वन्द्वे नैव-

शेषसम्भवस्तत्रतुजश्तुअचर्त्वइति छिन्दन्ति यत्रपूर्वंजश्त्वप्रवृत्तौपरिनिष्ठितेरूपेविशेषःतत्रजश्त्वम् प्राक् प्रवर्ततेनवाध्यवाधकभावः तेनरत्नमुडादौ नदोषोऽन्यथाऽन्तरतम्याच्चर्त्वेनषस्य षएवस्यात् । जक्षित्यादयः षड्वौषडित्यादिनिर्देशाश्चेहलिङ्गम् । एतेनणत्वंद्वित्वञ्चतुर्णामित्यत्रत्यस्वग्रन्थविरोधश्चर्त्वस्य जश्त्वापवादत्वादित्यपास्तम् । तथाहि पूर्वत्रासिद्धमद्वित्वइत्यस्यवर्णद्वित्वेप्रवृत्तौ चर्त्वस्यासिद्धत्वात् गस्यैवद्वित्वेऽन्त्यस्य चर्त्वेपूर्वत्रगश्रवणापत्तिरिति हितत्रोक्तन्तत्रचपूर्वंजश्त्वेगकयोः श्रुतिरपवादविषयतयातद्भावेकुत्वनिष्पन्नकस्य द्वित्वेकद्वयश्रुतिरितिपरिनिष्ठितेवर्त्ततेविशेषः वर्णद्वयतत्प्रवृत्तौ तुपरेषामसिद्धत्वात्। कुत्वेजश्त्वापवादत्वात्। द्वित्वापेक्षयापरत्वाच्चर्त्वेद्वित्वमिति प्रक्रिया। एवङ्कारेजशिपरइति तदुत्तरशङ्काग्रन्थोपि नविरुध्यतेद्वित्वेकृतेपीत्यर्थाभावएकगंश्रवणरूपविशेषस्यसत्वात्। सिद्धान्तेतु पूर्वमेवचर्त्वमिति प्रक्रियावोध्यात्रिपाद्यान्तक्रकौण्डिन्यन्यायस्तु प्रवर्तयिष्यतेऽहन्सूत्रइति तत्रैवसमर्थयिष्यते त्रिपाद्यान्तन्न्यायप्रवृत्तौयत्भाष्यंविरुध्यते तदनित्यत्वेनसमाधेयम् । परन्त्विदं *मनोरमाकाराशयवर्णनमात्रं वस्तुतः षडितिनिर्देशेनाबाधकत्वज्ञापनमेव लघ्विति दिक् । जश्त्वापवादत्वादिति ननु प्राचीनमतेऽभेदविवक्षाया अपि सत्वेनपदत्वाभावेचर्त्वंसार्थकमिति वाच्यमिति चेन्न । यरोनुनासिकेवापदान्तस्येति पूर्वोत्तरसाहचर्येणैतत्प्रकरणस्यपदानवयवेऽप्रवृत्तेः । न्यायादिति । फलौ-

* तच्छिवंपतत्ययोगस्येति ।

भावेपिप्रवृत्तौ बाधकाभावादिति भावः । पूर्वग्रन्थेऽस्यफल-विशेषाभावेप्रवृत्तौ नबाधकमित्येवतात्पर्यम् । न तु तत्रप्रवृत्तौबाधकमितीति नतद्विरोधः । मूलेप्रयत्नभेदादिति ननु प्रयत्नभेदेपितएवस्यान् नतुसः । सादृश्यस्यभेदघटितत्वेन सकारस्यसदृशतमत्वाभावादत आह । मूलेऽतएवेति । आन्तरतम्यपरीक्षायामभेदघटितस्यापि सादृश्यस्यग्रहणादेवेत्यर्थः । एतेनपाक्षिकसकारनिवृत्त्यर्थन्तद्विधानमित्यपास्तम् । नचैवमपिवत्स्यतिघत्स्यतीत्यत्रपक्षेद्वितीयादेशार्थन्तद्विधानमिति वाच्यम् । वहिरङ्गपरिभाषयासन्निपातपरिभाषयाचसिद्धान्तेपि तस्याप्रवृत्तेः यद्वासःसिअन्तरतमआदेशइत्येवतकारेलब्धेतैकारानुवृत्त्यादेशविधानं ज्ञापकमुक्तार्थस्येत्यर्थः । नतुसर्वथासूत्रंनकर्तव्यमिति । अव्ययमित्यादिसमासविधानाज्ज्ञापकादिति यथावक्ष्यते तथाऽत्रैवेति नचात्रकल्पनेनानुवृत्तिर्द्वितीयादेशाभावायेति शंक्यञ्चत्वेनैवसिद्धे सूत्रस्यैव वैयर्थ्यापत्तेः तदेतदभिसन्धायाह । चत्वेनसिद्धाविति । यद्वातादेशारम्भे-हेतुत्रयम् । सर्वथातकाराप्राप्तिः पाक्षिकसकारनिवृत्तिः द्वितीयादेशप्रवृत्तिश्चेति । तत्राद्यस्यन्याय्यत्वेनोक्तम् । अतएवेति यद्वाएवकारोप्यर्थइत्याहुः । ह्रस्वनद्यापः । बहुवचनमेवेति । तद्धितस्यसानुबन्धकत्वात् कासप्रत्ययादिति विहितस्यापि नफलाभावात् । तथाह्यदन्तेनित्यत्वादल्लोप इगन्तेपरत्वान्नित्यत्वाच्चगुणःणिजन्तेनित्यत्वादयादेशइति ह्रस्वांशेनफलंनद्यन्तेपिपरत्वात् गुणेवर्णसंज्ञापक्षेऽप्राप्तिः तदन्तसंज्ञापक्षेपि सकृद्गताविति न्यायेननेतिनतदाबन्तादाचारक्विपो-

ऽनभिधानमेव तस्यात्रग्रहणेपि नदोषइति प्रक्रान्तसूत्रभाष्या दिस्पष्टमुद्योतइति भावः। दीर्घेष्विति। दीर्घान्तेष्वित्यर्थः। ननुबहुश्रेयसीत्यत्रपुंस्यपि नदीत्वस्यसत्वात् खट्वायाअःखट्वा इत्यादौ पुंस्यप्याबन्तस्यसत्वात् कथं स्त्रीत्वलाभइति चेत्तवापि ठ्यभिचारेणदीर्घान्तत्वलाभोनस्यादित्यत आह। नदीत्वाप्त्व-योर्ह्रस्वेपीति। तदन्तसंज्ञापक्षउभयत्रापि तदन्तपरताबोध्या। नामि। चर्मणामिति। ब्राह्मणभिस्सेति पूर्वोक्तोदाहरणपरभा-ष्यरीत्येदंप्रयोजनम्। अर्थवत्परिभाषयातद्धारणेतुनामधातोः क्विपिदेवदत्तनामित्यत्रफलं बोध्यम्। टोरनामिति निर्देशेनप्र-त्ययस्यैवग्रहणेनतदादेरेवदीर्घइति नशंक्यंनआम् अनाम्इत्ये-वमपि निर्देशोपपत्तेः। षडित्यत्रेति। नृनद्यापइति तूचितंभा-ष्यस्योदासीनत्वात् मण्डूकानुवृत्तेर्निष्फलत्वात्। संख्येयवि-शेष्येति। मुख्यविशेष्येत्यर्थः। तत्वञ्चस्वार्थनिष्ठविशेष्यता-निरूपकविषयतानाश्रयत्वं यस्यसंख्यावाचकत्वंसस्वपदार्थःना-तःप्रियपञ्चानइत्यादौ दोषः। नन्वेवंत्रयोदण्डिनइवत्रयःपूषा-णइवत्रयः पञ्चइवत्रिदण्डिनःत्रिपूषाणःत्रिपञ्चानइत्यादावु-पमितसमासेऽतिव्याप्तिः ममतुषडर्थगतसंख्याभिधायित्वाभा-वाज्जश्शसोर्नसेति चेन्न। परमकतरवदिष्टत्वात्। अन्यथा-कतितक्षाणइवकतितक्षाणइत्यादौ तवापिसादुर्वारैवस्यात् षड्-भ्यइत्यस्याप्रवृत्त्याएकत्रषष्ठ्यर्थेपञ्चमीस्वीकारेणषड्भ्यः परयोः षडर्थगतसंख्याभिधायिनोरित्यर्थः। एवञ्चेद्द्वित्राः पञ्च-शकुनयइत्यत्रापि ममनसेति चेन्न। कतिपञ्चेवेति कतिप-ञ्चानइत्यादौ तद्दार्ढ्यादुभयत्रापि षट्संज्ञकःशब्दश्चप्र-

स्यासत्त्याद्यकएवेति चैवंरीत्यातत्परिहारस्यमयापि कर्तुं शक्यत्वात् । तथाहि लोकेसंख्यावाचकत्वेन प्रसिद्धशब्दप्रकारकसंख्येयमुख्यविशेष्यकप्रतीति जनकप्रत्यासत्याप्रकारभूतशब्दावयवनकारान्तेति सूत्रार्थएवऊन्चदशपऊन्चेवदशपऊन्चानइत्यादावपिनसेति दिक् । विहितविशेषणमिति । परमषडित्यादेरनभिधानमेवेतिनस्वरूपमिति सूत्रस्थभाष्यविरोधः तल्लहिषान्तस्यषट्संज्ञाविधानं शब्दशास्त्रीयसंज्ञायां शब्दस्वरूपाग्रहणज्ञापकमित्युक्तं बिहितविशेषणेतुतदभिधानेफलभेदापत्त्यातदसङ्गतिः स्यादिति स्पष्टम् । अप्राप्तेरिति । इदऊन्चान्यरीत्यास्व*मतेतुतत्रापि परिभाषाप्रवृत्तिः स्फुटैवेति बोध्यम् । नोक्तमिति दोषाभावात् । शास्त्रेऽयमेवनुट्कर्तव्यः अन्यत्रनिटोनटोवेति भावः । लिङ्गादिति । प्रकृतसूत्रेभाष्येस्पष्टमिदम् । एतेनाचक्षाणणिच्चिटिलोपेसार्थक्यमित्यपास्तम् । तदनभिधानात् । अनुवृत्तावेवेति । अन्यथामुष्येत्यादावपिन स्यादिति भावः । सर्वादीति । तद्गुणत्वेबीजमाह । अवयवेति । एवऊन्चान्यपदार्थस्यप्रायः संयोगसमवायान्यतरसम्बन्धित्वात्तत्वमिति भावः । न्यायसिद्धत्वात्सर्वेषामिति निर्देशानुधावनं नकृतन्तेनैतत्साध्यं सर्वशब्दघटितत्वम् । अन्यपदार्थस्योभयसाधारणत्वात् । निपातनान्नेति । लोकेपीतिशेषः । ऋष्यसम्मतज्ञाप्यार्थकस्यापि ओर्गुणइत्यादेरनादरात् । तत्सम्मतिमाह । प्रयोजनेति । एकदेश्युक्तिरिति यस्तुवि-

* एकदेशविकृतन्यायेन सन्निपातविघातोभावेपि वास्तविकन्तमादायपरिभाषाप्रवृत्तेर्दुर्वारत्वादिति भावः ।

हितविशेषणाश्रयणसामर्थ्यात्सर्वनामपदेयोगरूढ्यङ्गीकारेणस र्वार्थवाचकसर्वनामसंज्ञकसर्वादेर्विहितस्यङेःस्मै इत्यतिसर्वादौ नदोषइति तस्यापि सिद्धान्त्युक्तित्वसमर्थयांचक्रे सएवंवक्तव्यःमासपूर्वायेत्यादिव्यावृत्त्यासार्थकस्यतस्यकसामर्थ्यमिति महासञ्ज्ञयैवतत्सिद्धौ विहितपदाध्याहारोविफलइत्यरुच्यैवाग्रिमभाष्यस्यत्वयापि व्याख्येयत्वान् मूलतोधिकंकिंपराक्रान्तन्त्वयेतिच्च। संख्याकारकाभ्यांपूर्णेति । संख्याकारकाभ्यांपूर्णोयोर्थः तस्येत्यर्थः । गमकत्वात्समासः । अन्वयेनेति । अयंसुबन्तात्तदुत्पत्तौहेतुरिदंचाकज्विधौविभाषासुपइत्यतः सुपइत्यस्यसम्बन्धेपि वाक्यभेदेनयुष्मदस्मत्प्रकृतिकसुबंतस्यटेःप्रागकज्विधायकमित्याशयेन यदित्वकच्सूत्रोयशेखरोक्तरीत्यावाक्यद्वयेपि सम्बन्धःसुबन्तावयवसर्वनाम्नष्टेः प्रागकजितिवाक्यार्थस्तदास्पष्टैवसुबन्तात्तदुत्पत्तिः। अत्रत्यन्तत्वमुभयशब्देस्फुटोभविष्यति । सुबन्तादिति । ल्यप्लोपेपञ्चमी । सुबन्तन्सम्पाद्येत्यर्थः । उत्पत्तेरित्यस्याग्रे कर्तव्यत्वादिति शेषः । यथाश्रुतन्तुनयुक्तम् । उक्तभाष्यात् । सुबुत्पत्यनन्तरन्तदुत्पत्तिलाभेपि देशविशेषस्यालाभात् । घकालेदिनातल्लाभेपि अकच्निकृतेतद्वाधात् । एवमग्रे पि सर्वनामप्रकृतिकसुबन्तादिति व्याख्येयमिति नतदसंगतिरपि । प्रागकजित्यस्याग्रे कर्तव्यइति शेषः । इत्यर्थात्तदन्तेति । नन्वेवमपि सर्वकइत्यादौ सर्वार्थकुत्सावबोधयिषायांकिमादेरकजदुर्वारोऽतस्तद्वारणार्थंसर्वनाम्नष्टेः प्रागकच्प्रकृत्यर्थकुत्सायामिति प्रत्यासत्तिरावश्यकेति तयैवतदन्तसञ्ज्ञाभावेतदसिध्युपपत्तावयंप्रयासोविफलइति चेन्न । भ-

वच्छब्दात् सुप्यनुत्यन्ने ऽत्यन्तस्वार्थिकेकनिभवदथकुत्साविवक्षायामकज्नेत्यस्यफलस्यवक्तुंशक्यत्वेनसुवचत्वात् । असिद्धिरिति । समासार्थकुत्साविवक्षायामसिद्धिरिति भावः । नन्वेवंभवकच्छब्देनसमासेसमुदायकुत्सावोधकोऽपरोऽकच्स्यादिष्टापत्तेः । एतेनान्तर्वर्तिसुपांसुबन्तत्वमादायतत्सिद्धिरित्यपास्तम् । एवमेवेति । सर्वनामप्रकृतिकसप्तमीपञ्चम्यन्तात् त्रतसिलाविततदसिद्धिरिति भावः । एवमभवकद्भ्यामित्यादौ नञ्समासेपूर्वपदप्रकृतिस्वरेऽकच्यन्तोदात्तत्वंसिध्यति। अन्यथावयवादुत्पत्यास्वरद्वयं श्रूयेतेति वोध्यम् । चरितार्थमिति । द्वन्द्वे चेति निषेधस्तुविशिष्टस्यस्वांगशिटामिति प्रकृतिस्वराकज्निषेधकत्वेनकृतार्थः स्यादिति भावः । इदमुपलक्षणंपरमसर्वइति तदन्तसंज्ञोदाहारणपरभाष्यस्य । वस्तुतस्त्वङ्गसंज्ञकाददन्तसर्वनाम्नःपरस्येति सर्वत्रार्थइति नकापिविहितविशेषणम् । अतएवसर्वनाम्नः परस्यामइति तस्मिन्नितिसूत्रेभाष्यउक्तमित्याहुः । परेत्विति । अतएवकाणेति । यद्यपिनानुवन्ध्यकृतमनेकाल्त्वमित्यत्रानुवन्ध्यत्वयोग्यतानिवेशफलन्न तथापि वक्ष्यमाणभाष्येणेत्सञ्ज्ञायोग्यत्वमेवानु*वन्ध्यत्वमिहशास्त्रइति वोध्यते नतुलक्षणात्तत्फलमुक्तमिति नदोषः । अनुबन्ध्येति । तत्वज्ञानेत्यर्थः । एवमग्रे पि बोध्यम् । विकल्पइति । ननु दधतोत्यत्रान्तादेशइवात्रापि प्राग्विकल्पोनस्यादिति चेन्न । अजणादिविषयेसूत्रीयास्वरूप्यमादायप्राप्तविकल्पनिवृत्त्यासार्थक्येनापवादोपोतिन्यायविषयतयादधत्योरुयतो-

* अनेकत्रपरिभाषायां योग्यतानिवेशगौरवादिति भावः ।

त्रवैषम्यात् । अत्रत्यन्तत्वंपरिभाषेन्दुशेखरविवृत्तिसंग्रहेस्पष्टम् । ध्वनितमिति । तत्रहिडाकारस्यशित्वंकार्यमित्याशंक्यानित्यत्वात्प्रश्लिष्टत्वाद्वाइत्युक्तम् । अन्त्येशितउदाहारणेशिइयावुक्त्वाऽनपूर्व्यादनेकाल्त्वात् सिद्धमित्याशंक्यनानुबन्धेतिज्ञापनेनसार्थक्यमुक्तम् । वस्तुतस्तु न्यायसिद्धत्वेनानित्यत्वादित्येवसिद्धांत्युक्तिः । न्यायसिद्धैतदभाष्यविरोधेनप्रश्लेषप्रयुक्तगौरवेणचतत्तादृशतद्ग्रहणेफलाभावाच्चतद्भाष्यद्वयमेकदेश्युक्तिः । अतएव परस्मैपदानामिति सूत्रभाष्येऽनित्यत्वादेवणलः सर्वादेशत्वम्साधितं नतुप्रश्लेषादपि परिभाषाज्ञापनन्तु पुम्रैय्युभ्यइति निर्देशेनापिसिद्धञ्शित् ग्रहणञ्चनकार्यमिति तदाशायमाहुः । विभक्तित्वयोग्यइति । यद्यपिदधतोत्यादिवदिदमपिलक्षणांविनैवसिध्यति तथापि स्थानेन्तरतमइति सूत्रोक्तभुक्तवन्तमिति न्यायविरोधादनर्थकत्वमुक्तम् । तद्रोत्येदमिति नोक्तदोषः । नित्यशब्दोऽवधारणार्थइत्याह । एवेति । *अनेनसजातोयवचनस्यव्यवच्छेदादाचारिकं भवत्येवार्थपरत्वएवायंनियमइति शब्दपरत्वउभादित्यादि भवत्येव । नच्च सुबन्तेति । अयंभावः त्वयकामयकेत्यादिसिद्धये विभाषासुपइति सूत्रादकञ्विधौसुपइति सम्बध्यते तथाचायमर्थोयुष्यदस्मत्प्रकृत्तिकौकारसकारभकारादिभिन्नसुबन्तस्यटेःप्रागकजित्येकः । सुबन्तावयवसर्वनाम्नष्टेः प्रागकजित्यपरः एवंचसुबन्तस्यप्रत्ययविधावुद्देश्यतावच्छेदकाक्रान्तत्वा-

---

* ननुद्विर्वचनमन्तेयस्येति विग्रहेणद्विर्वचनातिरिक्तमात्रस्योभयशब्देसमीपवृत्तित्वनिषेधेनोभतीत्यादिनस्यादत आह । अनेनेति ।

त् प्रकृतित्वस्पष्टमेवेति । एतेनसुबन्तादकच्युभाभ्यकामिति रूपेणविशेषस्यसत्वेनस्वरपर्यान्तानुधावनंव्यर्थमोकारेत्यादितु युष्मदस्मद्विषयकमित्यपास्तम् । केतुप्रकृतेरिति । भ्यामादिप्रकृतेरित्यर्थः । सुबन्तात्परइत्यस्यसुबन्तंसंपाद्ययतः कुतश्चित्परइत्यर्थः । यथाश्रुतन्तुनयुक्तम् । न्यायासाध्यत्वादकच्चिवासंभवात् । प्रातिपदिकस्यैवेति । अकच्सूत्रीयशेषरस्तुस्वरूपकथनपरः । नतु द्वितीयवाक्येतत्संबन्धपरइति नतद्विरोधः । अतएवकाकचोःकोविशेषइति भाष्यंसंगच्छते । यत्त्वकज्विधावुद्द्योतउक्तुम् । उभयंप्रकृतमिति प्रतीकमुपादायप्रातिपदिकाधिकारात्सुंबन्तसामर्थ्यादिति तच्चिंत्यम् । इतिविशेषइति । यत्तुप्रकृतसूत्रउद्द्योतएवमज्ञातोभयोर्घटइत्यर्थेऽकच्यच्युभकयघटइति रूपंकेयच्युभयकघटइति कस्यद्विवचनत्वउभयकघटइति वास्यादिति रूपेबिशेषइत्युक्तंतत्तुवृत्तौकृतायामयजिति प्राचीनवासनयावृत्तिविषयेपूर्वमेवसइति सिद्धान्तेतु सर्वथोभयकघटइत्येनेकमेवभवितव्यमिति विशेषाभावः स्पष्टएव । अतएवतद्विशेषानुक्तिरत्रग्रन्थआदेशपक्षेतयप्स्थानिकत्वेनायत्नः तद्विकल्पेनैववाक्यसिद्धौफलाभावेन महाविभाषायाअसंबन्धःसिध्यति प्रत्ययान्तरत्वपक्षेतदसंबंधार्थंतत्स्यादत आह । भाष्यकृतेति । व्याख्यानंसंबन्धावश्यकत्वेहेतुः । अन्यथाफलभेदेपक्षभेदासङ्गतिःस्यादिति भावः । अयोग्यंसदिति । द्वितीयसूत्रस्थवेत्यस्यास्वरितत्वादसंबंधमभिप्रेति । ननुकारकमनोरमायांवस्तुतस्त्विवत्यादिनावृत्तौकृतायामयजित्यर्थलाभेनोभयत उभयत्रेत्यादाविवेति सङ्गतिः ।

दृष्टान्तस्यन। अन्योन्याश्रयापत्त्यातलादेरेवानुत्पादप्रसङ्गात् सत्ययत्रित्रलादिवृत्तिःसत्याञ्चत्रलादिवृत्तावयजितीत्यत आह। अयंचेति। कारकमनोरमाग्रन्थस्तुप्राचामनुसारीति नत*द्विरोध-इति भावः। ननूभशब्दस्यायचिकृतेसर्वत्रैव तद्विषयत्वाभावसंभावनायद्ययचंविनासम्भावनेत्युच्यतेतदोभयतउभयत्रेलादावपि सनस्यादत आह। उभयशब्दस्येति। द्विवचनेति। तञ्चोभशब्दप्रकृतिकमेवेतिनाहग्रः। तेनपरमोभावुभोभावित्यादौ समासप्रकृतिकेपि तत्रनायच्प्रत्याख्यानेद्विवचनशब्दग्रहणेन तदर्थस्यसम्भवेनारम्भेपि तथैवोचितत्वात्। उभशब्दादुत्पन्नं द्विवचनमिति मनोरमाग्रन्थस्यतु तदन्तादित्यर्थइति बोध्यम्। विषयत्वंचपरत्वम्। नन्वेवमुभावित्यत्रप्रक्रियायामेकादेशतः प्राक् तस्यतत्परत्वसम्भावनायामपि परिनिष्ठितेतदभावस्यापि सम्भावनयाऽतिव्याप्तिर्दुर्वारेति चेन्न। तद्विषयत्वसम्भावनाभावस्यविवक्षितत्वात्। विषयत्वविषयिण्यभावप्रतियोगिभूतासम्भावनेत्यर्थात्। लुकाचानुत्पत्तिरेवेति नत†त्रापिसम्भावनेति बोध्यम्। यद्वोभौसाभ्यस्येति निर्देशेनस्वोत्तरत्वस्वावयवत्वान्यतरसम्बन्धेन तद्विशिष्टत्वमेव तद्विषयत्वंपरिनिष्ठितेविवक्षितमिति यथाश्रुतमपि साधु। अलुकीति। यद्यपि द्विवचनबहुवचनयोरलुक्नेत्यलुगुत्तरपदइति सूत्रभाष्याल्लभ्यते तथापि सम्भवाभिप्रायेणेदमुक्तमिति बोध्यम्। निर्देशेनेति। उभशब्दप्रकृतिकसुबन्ता-

---

* कप्रत्ययेनेष्टसिद्धिवादिमतउभशब्दस्यगणेपाठाभावेनायचम्विनासर्वनामप्रकृतिकसप्तम्यन्तत्वाभावादिति भावः। † लत्रादिस्थलेपीत्यर्थः।

भावेन स्वार्थिकायजुत्तरञ्चारित्यर्थ्याभावेन तक्रकौण्डिन्यन्या
यात्प्रवृत्त्यासर्वथानिरवकाशत्वेनैवावयवार्थकोऽयच्तद्बाधकःस्या
दिति तत्रकृतेक्रोष्ट्रीत्यत्रङोब्वत्स्वार्थिकोऽयच्दुर्वारइति निर्दे-
शे*नैववारितइति बोध्यम्। अनभिधानमेवेति। तत्प्रत्याख्या-
नेनफलैक्यायेदमावश्यकमिति भावः। वस्तुतइदं प्रत्याख्या-
नमिष्टापत्तिकृत्वैवातएवोभोभाविति वक्ष्यमाणग्रन्थसङ्गतिरि
ति बोध्यम्। अयच्यकच्तुनेति। अयम्भावः। सुबुत्पत्तेः पू-
र्वमयजङ्गीकारेतत्रकृतेऽयजन्तस्यगणेपाठेन सर्वनामत्वादकचि-
तद्विषयत्वमेवस्यादिति तदभावसम्भावनाभावेन पूर्वमप्रवृत्तौ-
कप्रत्ययेपोष्टसिध्योभशब्दपाठोव्यर्थः वृत्त्यनन्तरमयजङ्गीकारे-
तुनायं दोषइति। उपजीव्यत्वेनेति। अयंभावः। उक्तरीत्यो-
भयशब्दस्य तद्विषयत्वाभावसम्भावनाभावेप्युभशब्दस्यकप्र-
त्ययविवक्षायास्तदभावसम्भावनासत्वेनायच्युपजीव्यकापवा-
दकचोऽप्रवृत्तिरिति। नचैवमुभयशब्दस्यैव तदभावसम्भा-
वनाऽयच्प्रयोजिकास्तूभशब्दस्यतु सामास्तुफलाभावात्। एवं-
चपाठोनकार्यइति लाघवं नह्यत्रापिकप्रत्ययस्योपजीव्यत्वमिति
वाच्यम्। एवमपि पूर्वमयज्माप्रवर्ततांङ्कप्रत्ययोत्तरन्तु सप्रव-
र्तेततदातदभावसम्भावनासत्वादित्याहुः। किमर्थमिति।
एवं सतिप्रत्ययविधौतदन्तविधिनिषेधेनपरमोभकावित्याद्यसि-
द्धिस्तुन तन्निषेधेप्यव्ययोभसर्वनाम्नाटेः प्रागकच्तदर्थगतकु-
त्सादावित्यर्थेनसमुदायार्थेतद्विवक्षायामवयवार्थेतदविवक्षाया-
वक्तुमशक्यत्वेन परमगार्ग्यायणइत्यत्रोक्तरीत्येष्टसिद्धेरित्याश-

* न तु वाच्यबाधकभावेनेत्यर्थः।

र्यात् परमभवकानित्यत्वमेतन्मतान्तरमिति क्षोदिष्यते विशिष्टस्यप्रकृतित्वाभावेऽनुभकावित्यादौ स्वरेतुनदोषः सतिशिष्टत्वेन स्वघटितपदघटितत्वेनचनिघातप्रवृत्तेर्निष्प्रत्यूहत्वात्। एवंहिगणेऽन्तोदात्तनिपातनंन*कार्यमितिलाघवमिति भावः। प्रत्याख्यानेनगणेऽन्तोदात्तनिपातनानुमानम्। अन्यथास्वरार्थपाठस्यावश्यकत्वात् तदसङ्गतिः स्यात्। अतएवापरञ्चेति। इदञ्चत्वच्छब्दस्तान्तइति पक्षेफलंसुवचमिति वादिनांमतेन स्वमतउपसर्जनेकुत्सादिविवक्षायाः कर्तुमशक्यत्वंस्पष्टमन्यत्रेति बोध्यम्। अनुवादकत्वमिति। बोधकत्वमित्यर्थः। अतएवोभावित्यस्यसिद्धिरतएवोद्द्योतेबोधकपदोपादानमेव। अभावबोधकेति। नवेतिविभाषेत्युक्तेरिति भावः। एवञ्चापवादविषयेऽन्तरङ्गोद्भावनमसङ्गतमिति भावः। इदञ्चप्राप्तिमभ्युपेत्यवस्तुतस्तत्प्राप्तिरेवनेत्याह। किञ्चेति। युगपत् प्राप्त्यभावादिति। उभयविषयकवाक्येजसिपरतःसर्वनामतावानभवति जसःकार्यंप्रतीति सूत्रार्थोऽत्रपक्षेजसःकार्यमिति वाचनिकंयद्वाजसःस्थानआदेशेकर्त्तव्येजसइकारेकर्त्तव्यइत्यर्थोवाजसुत्तरमेव तस्यकर्तव्यतेतिनयुगपत्प्राप्तिः प्रकल्प्यचेति न्यायप्रवृत्तिपक्षेनित्यसंज्ञायाः पूर्वमप्रवृत्तिरप्रवृत्तिपक्षेजसःपूर्वमेवनित्यसंज्ञाप्रवृत्तिरित्युभयइत्यस्यसिद्धिरिति भावः। ननुप्रथमइत्यादिसिद्ध्यनुरोधाद् वाक्यान्तरेजस्विषयेपूर्वमेवसर्वनामतावाभवतिशीभावेकर्त्तव्यइत्यर्थआवश्यकःजसआदेशस्यविषयइत्यर्थोवोभयथापि शीभावविषयताजसः प्राक्ता-

* घृतादित्वकल्पनञ्चेत्यपि बोध्यम्।

लीनैव सामर्थ्यादृह्यतइति युगपत्प्राप्तिर्नित्यविकल्पविध्योः सम्भवतीति चेत्तत्राप्यसम्भवएवेत्याह । जसीति । विषयसप्तमीति । ननु मनुष्योयंप्रातरुत्थायेति दृष्टान्तेनपूर्वंयस्यनिमित्तसम्पत्तिः तस्यपूर्वंप्रवृत्तिरित्यर्थः सिध्यतितस्यापि परिभाषयाक्रोडीकारेनवाधकं तल्लासिद्धत्वंचनिमित्ताभावादप्राप्तिरूपमिति युगपत्प्राप्त्यभावेपि परिभाषासंचरत्येवेति चेत्तत्राह। स्थानिवदिति । निरवकाशेति । अयंभावः प्रकृतिभेदात्प्रत्ययोभिद्यतेस्थानिभेदादादेशोभिद्यतआदेशभेदात्स्थानिवद्वा वाक्यंभिद्यतेनलृविधिभेदाच्च । एवञ्चोभयशब्दावयवोऽयजादेशः सर्वनामत्वेऽनलृविधौकर्तव्येतयरूपस्थानिवदितिवाक्यंनिरवकाशमिति। एतेनोभयीत्यत्रङीप्सम्पादनेनद्वयेत्यादिसाधनेनचातिदेशप्रापितापिसावकाशेतिपरास्तम् । अन्त्यस्यानभिधानाच्चचेन निषेधानांबलीयस्त्वस्यसंग्रहः। ननुपरिभाषाविरोधादतिदेशवाक्योपप्लवएवनेति चेत्तत्राह । प्रत्यक्षेति । निरवकाशत्वंचदिवःकर्मचेति सूत्रस्थमनोरमानुरोधेनतद्दीत्यापि ननु कार्यकालपक्षेजसुत्तरमेव नित्यसंज्ञायाअपि प्राप्तिरिति युगपत्प्राप्तिरस्त्येवेति चेत्तत्राह । सर्वनामेति । अतएवतयादेशइति तयवन्तत्वप्रयुक्तआदेशेकर्तव्यउभयशब्दावयवादेशस्यस्थानिवत्वप्रतिषेधोवक्तव्यइत्यर्थः । अतएववार्तिकमतउभयीति ङीपिकर्तव्येतत्प्रतिषेधोनशीभावएवतद्विधानात् । अतएवभाष्येयदिप्रत्ययान्तरम् । उभयीत्यत्रेकारोनप्राप्नोतीति शङ्कितम् । ननु र्यादस्थानिवत्वप्रतिषेधइत्यादि । अनभिधानमेवेति । इदंहित्रिभ्यान्तयस्यायचश्चेति । तयग्रह-

णस्योकरणप्रौढ्यावस्तुतस्तूक्तसूत्रोक्तत्वायच्प्रत्ययान्त-
न्तत्रतयस्येत्यननुवृत्तेः द्वित्रिप्रकृतिकस्तुतयस्थानिकएवनतु-
प्रत्ययान्तरमिति भाष्यकारतन्मतश्रद्धालवोऽन्येत्वत्रह्यच्प्र-
त्ययान्तरमिति भाष्यंयथाश्रुतंयुज्यते ऽसतिबाधकउद्देश्यता-
वच्छेदेन विधेयान्वयस्यव्युत्पत्तिसिद्धत्वात् । त्वयातूभशब्द
प्रकृतिकोऽयजिति व्याख्येयमिति तद्भङ्गःस्यात् । भाष्ये-
तत्रचद्वितयइत्येवपाठइतिवदन्ति । इदञ्चनवेतिविभाषेत्या
रम्भेप्रत्ययान्तरत्वेन समाधानमावश्यकमिति स्पष्टमेतत्प्रत्या-
ख्यानेत्वन्तरङ्गप्रथमादिसाहचर्याद्विधिमुखेनैव प्रवृत्तिर्भविष्य
तीति नित्यसंज्ञाप्रवृत्तिर्मूलोक्तरीत्यान्याय्यैवेति बोध्यम् । तद-
न्तविधिद्वयेनेति । यद्यप्येकेनापि तदन्तविधिनाप्रयोजनला-
भात्पाठः सार्थकस्तथापि सत्येकस्मिंस्तदन्तविधौ प्रत्यय-
ग्रहणाभावेन संज्ञाविधाविति निषेधाप्राप्त्याप्रयोजनंसर्वनामे-
ति बोधिततदन्तविधिस्वीकारेबाधकाभावइति भावः । सन्नि-
हितत्वादिति । दिग्देशवृत्तीनांप्रवृतिनिमित्तभेदादेवभाषित-
पुंस्कत्वाभावोभाष्योक्तः सङ्गच्छते । चेनसदृशःस्थानेन्तरत-
मइति यथा । प्रथमार्थएवेति । प्रथमानिर्देशसाध्यप्रयोजन-
साधनतात्पर्यकएवेत्यर्थः । नतु चिकीर्षित इत्यध्याहारतात्प-
र्यंकोलघुनिप्रथमानिर्देशेकर्तव्येगुरुस्सप्तमी निर्देशस्त्वदृष्टार्थ-
एवेति भावः । सौलत्वात्प्रथमार्थेसप्तमीत्येवं तुनव्याख्येयम् ।
गौरवात् मनोरमोक्तरीत्यासिद्धेफलाभावाच्च । अन्यथेति ।
चिकीर्षित इत्यध्याहारतात्पर्यकत्वइत्यर्थः व्यर्थः । स्यादिति ।
इदन्तुचिन्त्यम् पाणिनिनापिकिमर्थंप्रथमार्थेसप्तमीस्वीकृतेति

प्रश्नेतवाप्युत्तरस्यदुर्लभत्वात् । अपरशब्दस्तुरूढः परापरयोस्तु ल्यार्थत्वात् । नामपदस्वारस्येनेति । नम्यमानार्थकनामेति व्युत्पत्तेरिति भावः । विशेष्यभूतार्थकमिति यावत् । अभिव्यक्तेति । इदञ्चान्येषांमतेन । क्वचित्त्वेतदपपाठःस्वमतेतु प्रसिद्धार्थकाव्ययभूतनामपदस्वारस्येननामपदोपादानादेवोभयलाभः । यद्वासर्वेषामिति बहुवचनेन प्राधान्यलाभः । अव्ययनामपदेनप्रसिद्धलाभइति बोध्यम् । पदवन्तोति । इदंचान्यरीत्यास्वीयमतेतुवृद्धिसूत्रोक्तरीत्यापदाभिन्नानीत्यर्थोबोध्यः । लोकतः सिद्धेरिति । यत्रसंज्ञोपसर्जनीभूतउभयमपि लोकतः प्रसिद्धंतत्रासंभवान्नोभयविधिरिति बोध्यम् । नचासंभवेपि तत्सादृश्यविधिरन्यत्रेवास्त्वन्यतरविधानेपि सार्थक्येनान्यत्रेवात्रसामर्थ्याभावादिति भावः । एतेनेति । उक्तरीत्यासर्वार्थवाचकस्य पदार्थैकदेशत्वेनेत्यर्थः । दोषांतरमप्याह । एकपदोपेति । अव्युत्पन्नत्वादिति । इदंचसमासउद्देश्यविधेयभावेनान्वयोनेति वादिनांमतेस्पष्टमेव । तन्मतेतेनरूपेणान्वयेपृथगुपस्थितेस्तन्त्रत्वात् । स्वमतेतुसमासेपितथान्वयोभवत्येवेति कारकेवक्ष्यतेमंजूषायांचवक्ष्यतेतदाऽव्युत्पन्नत्वादित्यस्यौत्सर्गिकत्वादित्यर्थोनिपुणतरैर्मत्सजातीयैरन्यैरपिवेदितव्यः । पदन्नोमा । स्वानुरूपाइति । वर्णतोऽर्थतश्चेति बोध्यम् । नन्वस्यवैकल्पिकत्वाच्चरणादेरादेशत्वेपि नदोषइति चेन्न । पदाइत्यस्मोच्चरणत्वप्रकारकबोधोमाभूदिति चरणोऽस्त्रियामित्युक्तेस्तस्यनपुंसकत्वेनतस्यादेशेशसिपन्दिपइयेति माभूदिति सुन्दरास्नेत्यत्रमुखस्याङ्गमिति स्वरोमाभूदितिच । अन्तरतम-

इति सप्तम्यन्तपाठस्यदूषितत्वेनैतल्लाभः कथमिति परंचिन्त्यम् । भाष्यइति । जातावेकवचनं । चेति । तदर्थकान्यतरस्याग्रहणेत्यर्थः । निश्निशयोरिति । शब्दपरत्वेनभिन्नार्थत्वान्नै*कशेषः । सुटोति । इदंचसुप्त्वेन [illegible] मिति मतेहल्न्तेति । वि+परीतन्तुनाऽऽस्यञ्चप्रयत्नश्चेतिभाष्यप्रयोगात् । ननु छन्दसिसर्वविधीनांवैकल्पिकत्वेनादेशत्वेपि दोषभावाद्भाष्यमेकदेश्युक्तिरेवात आह । येचतद्धितइति । इत्युक्तमिति । तस्यस्वरितत्वेतु शिरस्यप्यस्यदुर्वारत्वेनतन्निवृत्तयेक्रियमाणःस्थानिनिर्देशोविफलः स्यादिति भावः । ननु वाकेशेष्वितिज्ञापकान् नात्रसंबन्धइत्युक्तमेवेति चेन्न । तज्ज्ञापकानुसन्धानेहिप्रकृत्यंतरत्वेपि दोषाभावेनतदसंगतेस्तदव‡स्थत्वात् । प्रकृत्यंतरेति । तेचशसादौसाधवइत्यर्थः । अतोनपूर्वोक्तभाष्यादिप्रयोगविरोधः । अतएवेति । नत्वाआबितिप्रश्लेषादिति भावः । यत्तुवृत्तिकारमतेशिरसइति स्थानिनिर्देशोनकर्तव्यो भाष्यानुसारिमतेतुकर्तव्यइति पाठककृतंलाघवोपवर्णनन्तन्नशीर्षण्यइति वच्छिरस्यइत्यस्याप्यापत्तेः । अन्येतुपदादीनामादेशत्वमेवतस्यन्यायप्राप्तत्वात् । अतएवशीर्षन्छन्दसोतिसूत्रेभाष्येप्रकृत्यंतरंद्रष्टव्यम् । आदेशोमाविज्ञापीत्युक्तम् शिरसोग्रहणम्कर्तव्यंप्रकृत्यंतरंमाविज्ञापीतियेचतद्धितइति

---

* विरूपाणामित्यनेन । † सुटियद्यजन्तस्यप्रयोगस्तदानिशाशब्दस्यैवेत्याकारकः । ‡ एवञ्चज्ञापकमवुद्ध्वावतत्प्रवृतिर्वाच्येत्यञ्चज्ञापकबलेनानुवृतेर्वारयितुमशक्यत्वेन तस्यस्वरितत्वेप्रकृतेतदनुवृतेर्दुर्वारतयाशिरसइति वाकेशइति च वार्तिकद्वयम्विफलमेवस्यादिति भावः ।

सूत्रस्थभाष्यंत्वर्थाधिकारप्राप्तातिप्रसङ्गभङ्गायेति नास्माकंप्रतिकूलंवाकेशेष्वित्यतोवेतिसंबध्यते तेनहृदयस्येत्यादेर्नासङ्गतिः। वार्तिकस्थपदस्याप्यनुवृत्तिःसूत्रेकृष्टेतिचेद् वैयाकरणाख्यायांचतुर्थ्याइणःषइत्यनयोःपश्य अतएवशोर्षन्छन्दसोति सूत्रइवपदन्नितिसूत्रेप्रकृत्यन्तरंद्रष्टव्यमितिनोक्तम्। तेनह्यत्रसूत्रआदेशत्वप्रकृत्यंतरत्वयोःफलाविशेषोध्वनितःविकल्पासंबन्धेतुविशेषस्य स्पष्टतयातदसङ्गतिःस्पष्टैवेत्याहुः। आहुरिति। स्थानेन्तरतमेइति पाठदूषणावसरएतत्फलान्यथासिद्धाकरणात् प्रकृत्यंतरत्वमेषां ध्वनितंभाष्यइत्यपिवोध्यम्। सुडनपुंसकस्य। व्याख्यानादौटइति। आगमस्तुन सर्वनामस्थानेचासंबुद्धाविति पर्युदासात् फलाभांवाच्चटाटकारेणप्रत्याहारेशसोप्यन्तर्भावात्। शिसर्वनामस्थानइति नियमाश्रयणेनेतरेषां क्लीवेसंज्ञाविरहेसिद्धअनपुंसकस्येति व्यर्थमेवस्यादनुबन्धवतश्चेत् शेरेवेतिनियमस्तुनराजासेमनुष्ययुवानइति निर्देशादनुबन्धवतोऽजरूपस्यचेत् शेरेवेति तेनराजानौपश्येति औटिनस्यादितिचेत्। औटिटकारोच्चारणसामर्थ्यात् तेन प्रत्याहारइत्यवेहि। सुटसर्वनामस्थानमशोरिति तुनसूत्रितंज्ञानमित्यादौ सन्निपातपरिभाषयानुम् वारणसंभवेप्यजरसंपश्येत्यादौ दीक्षितमतेनझलन्तलक्षणनुमापत्तेः सर्वइत्यादौ यस्येति लोपस्तुनऔङःश्यामित्यत्रऔङित्यस्याकरणात् तत्प्रत्याख्या*नेतदलाभाच्च। स्वादिषु। प्रथमैकेति। अतएवसर्वनामस्थानेति चरितार्थम्। व्याख्यानादिति। सुपांत्रयइष्टेसुप्सु-

* यस्येतिसूत्रेनदीमंङ्गके कारइत्यर्थं स्वीकृत्येतिशेषः।

इत्येववदेत्। अधिकग्रहेविनिगमनाविरहात् कबतानामिति भावः। कपःसंग्रहायाह। तदन्तेष्विति। यच्चिभं। सौत्रत्वान्नटजिति। समासांतानित्यतायाः क्लप्तत्वादितरयोगद्वन्द्वएकवचनमितिनोक्तम्। तेनेति। पूर्वसूत्रेराजानावित्यत्रनलोपस्तुनापादितःभसंज्ञयावाधात्। भवतीति। तेनदतोदतेत्यादौ जस्त्वंनेति भावः। आकडारादेकासंज्ञा। संज्ञाग्रहणंस्पष्टार्थंप्रकरणादेवतल्लाभादिति स्पष्टमत्रैवभाष्ये। व्याप्त्यर्थकेति। तेनचार्थेद्वन्द्वइत्यस्यसंग्रहःतेनकर्मधारयसंज्ञाविषयेनद्वन्द्वसंज्ञा। युक्तमिति। तदुत्तरमस्यानुपयोगादिति भावः। पदगौरवेपिमात्रालाघवंप्रतिपत्तिलाघवंचात्रपक्षइत्याशयः। इदमुपलक्षणमाद्वन्द्वादित्यस्य तेनाभिव्याप्त्यर्थकत्वंसंभाव्येतसिद्धांतेतुतथात्वेपि नक्षतिरित्यपास्तम्। वस्तुतोऽवधिनिर्देशोऽफलउपसर्जनंपूर्वमिति प्रकरणेविच्छेदेनाग्रेऽसंबन्धसंभावात्। निरवकाशत्वेति। एकस्याइति भावः। नन्वेकेत्युक्तेःपरैवकुतोऽतआह। विरोधाभावेनेति। पर्यायापत्तिरिति। पर्यायोहिक्रमप्राप्तस्यानतिक्रमःतत्कार्ययोर्मध्येयत् क्रमात् प्राप्तंपरंतदनतिक्रमस्यापत्तिरित्यर्थः। सिद्धांतेतुसंज्ञयोर्यापरात्त्रयुक्तंकार्यम्पूर्वमपि प्रवर्ततइदानीं तुकार्यगतपरत्वंनियामकंस्यादिति भावः। एतेनैकमेवकार्यंस्यादिति चिन्त्यमेतदित्यपास्तम्। नलोपस्यापत्तिरिति। सर्वथानिरवकाशत्वादल्लोपेजातइति भावः। नदीघिसंज्ञइति। भाष्यप्रयोगात्पूर्वनिपातोनद्याः। अनुपपदानादिति। लघुनोपायेनेतिशेषः। दीर्घाच्छ-

* यद्याश्रुतेतुगौरवङ्कडारपदघटितसूत्रद्वयानुसन्धानादितिभावः।

सित्येवेति । तस्माच्छसइत्यतःप्रागितिशेषः । एवंचतस्माच्छसइत्यत्रशस्ग्रहणंनकर्तव्यंभवति तस्मादितिपञ्चम्याश्रयणात् सप्तम्यन्तस्यषष्ठ्यंतत्वकल्पनसंभवात् चोनकर्तव्यइति लाघवमिति भावः । नन्वेवन्तच्छब्दोऽनन्तरपरामर्शार्थइति सिद्धान्तान् नियमशास्त्राणांविधिमुखेनप्रवृत्तिरिति पक्षेवहुश्रेयसीनित्यत्रैवनत्वंस्यात् नतुहरीनित्यादौ तदुत्तरंपाठेतुशस्पदंकर्तव्यंहरोनित्यत्रैव स्यान्नतुवहुश्रेयसीनित्यादाविति दोषश्चेति चेन्न । प्रकृतेनिषेधमुखेनैवप्रवृत्तिरित्याशयात् तस्मादित्यनेनाकोदीर्घःपरामृश्यतइत्याशयाद्वामृगान्हंतीति निर्देशश्चात्रलिङ्गं स्पष्टंचेदंसर्वंप्रथमयोरित्यत्रभाष्ये। विपरीतनियमापत्तेरिति। मृगान्हंतीतिनॄनेकानाम्ॄ डितइति निर्देशाश्रयणेतुप्रतिपत्तिगौरवमिति भावः। नन्वेवंप्रथमयोःपूर्वेत्यत्रत्यभाष्योद्द्योतविरोधः ततोहिग्रन्थादस्यन्यासस्यनिर्दुष्टत्वंलभ्यतइति चेन्न । इज्ग्रहणंनकर्तव्यमिति प्रसङ्गसत्वेनतस्यलाघवपक्षपातित्वादितिवदन्ति।अत्रदोर्घात्सुटीतिसूत्रयितुमुचितम्। आतोधातोः। सानितोति । आकारेणसहितानित्यर्थः । एतेनपञ्चमीसमासेनस्वमतेस्थानिवत्वेनान्यथासिद्धिःप्रयुक्ता । यद्यभिधानमिति। यदीत्यनेनेदंसूचितंवस्तुतःफलाभेदायतेषामनभिधानमेवेति । नन्वनापइत्यस्यप्रत्याख्यानंत्कइनइति निपातनेनापि भाष्येकृतंतेनह्यत्रलोपोनेष्टइति प्रतीयतेयोगवि*भागेनप्रत्याख्यानन्तुनास्माकंप्रतिकूलमतोभाष्यांतरविरोधमाह । अतएवप्रेति ।

* तत्पक्षेपि योगविभागस्यकाचित्कत्वेन सादिशब्देलोपाभावस्य सम्पादयितुंशक्यत्वादिति भावः ।

एतदेकवाक्यतयैवनिपातनेनाधातुपदस्याप्यिन्नपरत्वबोधनद्वारालोपइत्यर्थः कार्यः तदग्रे कथंश्नइति प्रश्नस्तूक्तमाशयमजानतएकदेशिनः। अतएवभूवादिसूत्रेभाष्येयाःपश्यसीत्यस्यान्यथासिद्धिरनापइत्युत्काकृता। धातुपदस्ययथाश्रुतार्थकत्वेतदसङ्गतिः स्पष्टैव नन्वेवं नमुनइति सूत्रप्रयोगस्यनेयत्कार्यमिति तत्सूत्रीयभाष्यप्रयोगस्यचविरोधइति चेन्न। वन्धुनीतिवत् नपुंसकनिर्देशाङ्गीकारेणोभयोपपत्तेरितिवदंति। दीर्घविधायेति। पररूपबाधकेदीर्घेकृतेपूर्वसवर्णदीर्घेसिद्धान्तइवनत्वस्य[illegible]दर्थकेषांचित् तस्मादित्यत्रतच्छब्देनाक्स्थानिकदीर्घमात्रपरामर्शोनतुपूर्वसवर्णदीर्घस्यैवेति क्ङे शस्तुमुखैवेति बोध्यम्। रामानित्यत्रबहुवचनइति दीर्घेकृतेऽनापइत्यालोपस्तुन। पञ्चमीसमासेनस्थानिवत्वात् वाध्यविशेषचिन्तापक्षेपि पूर्वसवर्णदीर्घेकृतेयथोद्देशेभसंज्ञाप्रवृत्त्यापूर्वान्तवत्वेनाकारांतेभत्वेप्राप्तस्यलोपस्यवारणमुक्तरीत्यास्थानिवत्वेन सन्निपातपरिभाषयावा बोध्यम्। नकार्यमिति। नन्वेवंरमाणामित्यादावर्णान्तत्वलक्षणनुटश्चारितार्थ्याद् रामाणामित्यादौ तुपरत्वाद् बहुवचनइति दीर्घेनुट्विधावनुवर्तमानानापइति लोपप्रसङ्गः। आबग्रहणसत्वेत्ववर्णान्तलक्षणोनुट्बहुवचनइति दीर्घापवादइति नदोषः। अतएवभाष्येतन्नकार्यमिति नोक्तमिति चेन्न। चारितार्थ्येपि नुटःप्रतिपदोक्तत्वात् पूर्वप्रवृत्तेःपूर्वंदीर्घेपि पञ्चमीसमासेनस्थानिवत्वेन सन्निपातपरिभाषयावालोपाप्रसक्तेश्चकथं कीलालपानांकुलानामिति भाष्यन्तुसर्वेषामेकदेश्युक्तिरेवेति निपुणतरमालोचनीयम्। इत्यादन्तः।

जसिच्च । योगविभागस्येष्टसिद्ध्यर्थत्वात् क्वचिदप्रवृत्त्यापूर्वस्य गौरीत्यादि सिध्यर्थोयोगविभागइति वोध्यम् । शेषोघ्यसखि. यूभ्यामिति । यूपदह्रस्वपदानुवृत्तिफलितार्थकथनमदः । अनवकाशत्वान्नदीति । ननु गवांपत्यैस्त्रियाइत्यत्रसावकाशत्वात्कथं नदीत्वमितिचेदत्राहुः । विप्रतिषेधेपरंकार्यंह्रस्वौयूघ्यसखिपतिस्समासएवषष्ठीयुक्तश्छन्दसिवाङिति नदोस्त्रियमियङ्उवङ्स्थानावस्त्र्यामिवान आख्याह्रस्वंलघुइति न्यासभेदेनसावकाशत्वेपि परत्वान्नदीत्वंबाधकंभविष्यतीति शेषग्रहणस्यस्पष्टार्थतावादिनामाशयइत्येकेपरंत्वलारंभसामर्थ्यान्नदीसंज्ञापरकार्यत्वाच्चघिसंज्ञे ति भाष्यादिग्रन्थेयोजनैवतस्माद्यथाक्रमएवङितिह्रस्वः पतिश्चसमासएवघिः षष्ठीयुक्तश्छन्दसिवाश्वसखीति न्यासेनसिद्धेसामान्यतो ह्रस्वान्तस्यविधानंनिरवकाशंविशेषतोविधानेलाघवन्तु मत्यैधेन्वैइत्यत्रबाधमंतरैवघिसंज्ञावस्थित्याप्रतिप्रयुक्तम् । न च सामान्यतोविधानेगवांपत्यैसावकाशेमत्यैइत्यत्रपरत्वाद्ह्रास्यतइति वक्तुंयुक्तम् । उकारांतस्यसंज्ञाविधानं न कुत्रापिसावकाशमिति धेन्वाइत्यत्रनदीत्वमेवेति फलभेदइति वाच्यम् । तदभावात् । उदंतस्यविधिव्यर्थमित्यस्योकारानुवृत्तिर्नकार्येत्याशय उततद्विषयकंवाक्यंनोपस्थाप्यमिति नाद्यः तस्याउत्तरार्थत्वात् नान्त्यःतस्यविप्रतिषेधसूत्रप्रतिवध्यत्वादित्यन्येभाष्य*प्रामाण्यात् ङितिस्त्रियांपतिशब्दस्यानभिधानमित्यपरे । ङितिह्रस्वश्चेत्यत्राटश्चेतिवच्चकारः पुनर्विधानार्थस्तस्यानवकाशत्वमित्याशय-

* शेषग्रहणस्य स्पष्टार्थत्वप्रतिपादनपरेति शेषः ।

इतीतरे वस्तुतस्त्वहन्नित्यत्रवक्ष्यमाणरीत्यानवकाशत्वंसुस्थमेवपतिशब्देघिसंज्ञाप्राप्तियोग्यतासत्वात् नियमेनापि वाधइत्यन्यत् । एतेन नव्यमतेपरमसख्यैस्त्रियाइत्यत्रापि सार्थक्यमित्यपास्तम् । असखीत्यस्यप्रसज्यप्रतिषेधत्वांगीकारेणनञ्डिसंबुध्योरित्येतत्तुल्यत्वात् । मालइतीति । अयमत्रमूलाशयः यूग्रहणाननुवृतावपि ह्रस्वपदानुवृत्याविश्वपादिशब्देनातिप्रसङ्गः । अदंतस्यतुसत्यपिघित्वेक्षतिर्नास्ति तथाहि रामेणेत्यत्रेनादेशोनादेशापवादः । रामस्येत्यादौ सत्यपिगुणेक्षतिर्नास्ति । इदानोमिकप्परिभाषोपस्थित्यातदप्राप्तेश्च । अच्चघेरित्यत्रेदुदभ्यामित्यनुवर्ततएवहरिहरावित्यत्रहृन्हे घोत्यस्यविषयेपि नदोषः । अदन्तंचेदजाद्यं वेति नियमार्थत्वादजाद्यदन्तमित्यस्येदग्नेरिति ज्ञापकाच्चनविपरीतनियमइति । आङोनाः । रूपासिद्धेरिति । प्रियत्रिणाकुलेनेत्यादौ विभक्तेर्हलादित्वाभावेनषट्त्रिचतुभ्योंहलादिरिति स्वरासिद्धिरपि बोध्या तत्रस्वमतेविहितविशेषणाभावात् ननु नमुनइत्यस्यसिद्धांतेपि नकारेसिद्धत्वनिषेधकत्वेनरूपंसिद्धम् । अमुष्मैकुलायेत्यादितुनभ*त्वयेवेति चेत्तत्राह । नमुनइति । विरोधादिति । एवंचनसोऽर्थः सिद्धान्तइदानीन्तुसतवाश्रयकस्तथाचामुष्माइत्यादिप्रमितलक्ष्यविरोधःस्यादिति भावः । तत्रार्थेसूत्रसंमतिमप्याह । अतएवसूत्रेति । नकिंचिल्लाघवमिति । नइति न्यासेपिनकारइत्यर्थांगीकारेलघुभूतन्यासत्यागोनिर्बीजः स्यादिति भावः ।

---

* किन्त्वमुनेकुलायेत्येव तथाच तवैवाव्याप्तिरिति भावः । † नकारेकर्तव्येकृतेचमुत्वस्यासिद्धत्वंनेत्यर्थः ।

औङआपइति सूत्रभाष्यऔविभक्तेर्ङित्वेखट्वइत्यादौ याट्-
स्यादित्युक्तंतदयुक्तम् । शीभावस्ययाडपवादत्वात् । अतो-
ऽन्यरीत्यायोजयति । अतएवेति । हरिणामत्येति । तक्रकौंडि-
न्यन्यायेननादेशस्यगुणबाधकत्वमाशारुचिः । नयाडिति । ह-
रीत्यादौ गुणोनेत्यपि वोध्यम् । घेर्ङिति । दिगिति । दिगर्थ-
स्तुतत्रतदनापत्तौनुडापत्तिः । सिद्धांतेहिपरत्वादाटानुड्वाध्यते-
रमायामित्यादौ ङेरामियाडनापत्तिरपि वोध्यायदितत्रङेर्ङाम् ।
क्रियतेतदारमायामित्यत्रपूर्वंप्रत्ययत्वाभावेनेत्वाप्रवृत्याङका-
रयुक्तएवादेशेकृतेवार्णपरिभाषयाया*टिकृतेप्रत्ययादित्वाभा-
वादित्त्वंङस्यनस्यात् । अनित्यत्वेनाप्रवृत्तौतुनमानंयदितूभयो-
रादेशत्वेएवसमानकार्यित्वएवसेत्यनुगमवादिमतमवलंवसेत-
दासुपःसंप्रतिङादित्वासंभवेनभौतपूर्विकंतत् गृह्यतेवासुपीति
निवर्त्यात् ङवतइत्यत्रैवप्रवर्ततवेत्यादिनानाविकल्पग+तंकुक्षौ-
निक्षेपामियदिनिर्देशादिकंप्रदर्शयिष्यसितदाप्रतिपत्तिगौरवेण
भोषयाष्यामोति तूष्णोमेवास्वेति । ङसिङसोश्च । नासूत्रो-
ति । जयंतिभवंतोत्यत्रांतरंगत्वापररूपेऽचःपरेतिस्थानिवत्वें-
नगुणेपरादित्वेनङित्वसत्वात् प्रकृतसूत्रेपि दोषो बोध्यः ।
पूर्वरूपेतुनस्थानिवत्त्वम् । पूर्वपरविधित्वात् । अच्चघेः । ननु
तत्प्रतिज्ञायांकिंमानमत आह । अतएवेति । समत्वादिति ।
नन्वित्संज्ञकविशिष्टस्वरूपंशब्दस्येत्युक्त्याविशिष्टस्यविधानेश्र-
वणापत्तिरतइत्संज्ञालोपौप्राथ्यैतअनित्संज्ञकतपरेतुतपरसूत्रप्र-
वृत्यातकाररहितस्यैवविधानमितिवैषम्यमिति चेन्न । भाव्य-

* अन्तरङ्गापीत्संज्ञालोपौबाधित्वेति शेषः ।

मानेनसवर्णग्रहणंनेत्यनेनगुणाभेदकत्वादिप्राप्तस्येवतपरसूत्र-प्राप्तस्यापिनिषेधप्रौढ्यात् अतएवकिमोदितिपक्षेऽनुनासिकोनेति बोध्यम् । फलभेदोनेति । नन्वौदादेशेदित्वंनाश्रयणीयमतोपिफलैक्यंनहिभाष्यऔदादेशोदिदिति । अदादेशोदिदितिवाकंठरवेणोक्तमस्तीति चेन्न । दित्वमाश्रित्यतीति प्रत्याख्यानावसरेभाष्यऔकारस्यतपरत्वानुक्त्यातेनफलभेदापत्तेरिति भावः । इत्वंनेति । अलोंत्यस्येतितुननानर्थकइति निषेधात् तत्प्रत्याख्यानेतुनदोषइति स्पष्टमत्रैवसूत्रेभाष्ये । प्रदेशेष्विति । अस्तिसिचोऽपृक्ते गुणोऽपृक्तेवेरपृक्तस्येत्येतेषुसूत्रेष्विति भावः । हल्ग्रहणोनैवेति । तत्राद्योरुतोवृद्धिर्लुकिहलोत्यतोहलोत्यनुवृत्तावपितदादिविधिप्रतिबन्धायहलिति वक्तव्यम् । तृतीयेतुवेरित्यनुनासिकनिर्देशमाश्रित्यापृक्तस्येति भाष्येप्रत्याख्यातमिति नकर्तव्यम् । हल्ङ्याबितिसूत्रेतुवर्ततएवेतिबोध्यम् । अदृष्टार्थमिति । नन्वेवं हल्ङ्यादिसुत्रेतदन्तविधिनाहलंतंसुतिसिलुप्यतइत्यर्थेनहन्यादित्यादावतिप्रसङ्गः संज्ञाकरणेतुनतदन्तविधिरिति दृष्टंफलम् । न च निर्दिश्यमानपरिभाषयानिस्तारः सूत्रेषष्ठीनिर्देशाभावात् । यदितूक्तातिप्रसङ्गभङ्गायषष्ठीनिर्देशः क्रियतेतदाभिन्तादित्यादावतिप्रसङ्गोदुर्वारः । स्थानिवद्भावविषयउक्तपरिभाषाया अवृत्तेरिति चेन्न । सुतिसिहलिति सुतिसिहलइति वाकर्मधारयनिर्देशेपरनिपातनात्तस्य विशेषणत्वाभावनिर्णयेन तदन्तविधेरभावेनातिप्रसङ्गाभावात् । षष्ठीतत्पुरुषस्तुन निषादस्थपतिवद् गौरवात् । एतेनापृक्तग्रहणं चिन्त्यप्रयोजनमित्यादिशब्दरत्नादिग्रन्थाव्या

ख्यातादिति बोध्यम्। ख्यत्यात्परस्य। भिन्नावयवाविति। अन्त्यावयवेत्यर्थः। अतएवाह। प्रातिपदिकान्त्यवर्णादेरिति। अन्यथासख्युर्घातकइत्यलुक्समासेऽति प्रसङ्गःस्यादिति भावः। लक्षणयेति। यद्यपि तदन्तविधिकल्पनेनापि भाष्यमुद्द्योते योजितं तथापि वर्णसंज्ञापक्षेलक्षणावश्यकत्वेनात्रसैवादृता। किञ्चतदन्तविधिकल्पनेलिङ्गविशिष्टपरिभाषाया अप्रवृत्तयअनित्यत्वमाश्रयणीयम्। विभक्तौलिङ्गविशिष्टाग्रहणमिति तन्निषेधप्रवृत्तयेकार्यकालपक्षेपदैकवाक्यतावाश्रयणीया स्यात्। लक्षणापक्षेतु वक्ष्यमाणरीत्यान्यायतएवतदप्रवृत्तिः सिद्ध्यतीति सैवादृतेति बोध्यम्। प्रातिपदिकवदुपस्थापकेति। ननुतद्वदुपस्थापकत्वंविशेषणतयाविशेष्यतयामुख्यविशेष्यतयावासर्वसाधारण्येनवेहविवक्षितं नाद्यान्त्यौसख्यवयवेलक्षणायामपि विशेषणतयासखिशब्दस्यभानसत्वात्तद्वदुपस्थापकत्वध्रौव्येणप्रकृतेपरिभाषाप्रवृतेर्दुर्वारत्वात्। अतएवनद्वितीयोपि। आनुपूर्वीनिष्टप्रकारतानिरूपितविशेष्यतायाअपिसखिशब्देसत्वात्। नापितृतीयः। प्रातिपदिकार्थेति सूत्रेपितदप्रवृत्त्यापत्तेः। द्वन्द्वनिर्देशेबहुशस्तत्संचारस्य भाष्योक्तस्यासम्बद्धत्वापत्तेश्चेति चेदत्रोच्यते सर्वसाधारण्येनैवेह तदुपस्थापकत्वं विवक्षितं लक्षणाचशक्यतावच्छेदकारोपः शब्दपराणाञ्च शब्दनिष्ठाजातिः प्रवृत्तिनिमित्तं। एवञ्च सखिशब्दावयवेषु तदारोपेप्यवयवानांजातेर्वानतद्वत्वमिति। यद्वास्तुशब्दपराणामान्तपूर्वीप्रवृत्तिनिमित्तं ध्वंसादिरूपायास्तस्याअपिनतद्वत्वमितिच। हितविशेषणानाश्रयणेनैवेति। विधीयतेस्माद्विहितं प्रकृ-

तेप्रकृतिरूपंतदादीत्यर्थः । तेन यत्सखिपत्योर्विशेषणन्तदनाश्रयणेनेत्यर्थः । अपादानेनिष्टाचण्ङ्ङस्वादिति सूत्रभाष्येस्पष्टेति तत्सूत्रएवोक्तम् । अयंभावः । ङसिङसोरिति प्रत्ययग्रहणेन तदादीत्युपस्थितंनसखिपत्योर्विशेष्यंतयोः श्रूयमाणपदार्थविशेषणत्वस्यन्याय्यत्वात् नापिस्वातन्त्र्येणपरपदार्थविशेषणव्यधिकरणविभक्तिद्वयापत्तेः। किन्तुसखिपत्योर्विशेषणम् । एवंचसुसखेरित्यादौ नातिप्रसङ्गइति । परिभाषानाश्रयणेनैवेति । ननु लिङ्गविशिष्टपरिभाषयासखीशब्दस्यापि ग्रहणेनकृतह्वस्वेचातिदेशेन तत्वसत्वात्सुखेनैव लक्षणप्रतीतिः परिभाषाप्रवृत्तिर्नेति चेन्न विभक्तौलिङ्गविशिष्टाग्रहणादलमर्थस्तु वस्तुतस्तुभाष्यस्यायं भावः सुसखेरित्यत्रातिव्याप्तिपरिहारायसखिपतिभ्यांपरस्येति सूत्रेयदिलक्षणप्रतिपदोक्तपरिभाषासंचरति तदासहस्वेनवर्ततइत्येवंनिष्पन्नेव्याप्तिः । तत्परिहारायद्यनित्यत्वात्तदप्रवृत्तिं ब्रूषेतर्हिपूर्वोक्तेऽतिव्याप्तिरित्युभयतःपाशारज्जुरिति । पतिःसमासएव । समासइत्युक्तेरिति । पतिन्नेति वाच्यइति भावः । वहुच्पूर्वेनघित्वमिति । तत्रैव नघित्वमित्यर्थः । पतिन्नेत्युक्तेतुभूपतिनेति समासेपि नस्यादिति भावः । एवमुक्तिस्तुवृत्तौविस्तिन्यासेदोषदानमिति बोध्यम् । अतएवेति । प्रसिद्धावेवकारोनत्ववधारणेतेनपतीयतेऽक्विप्पत्युरित्यादौनघित्वम् । पत्यावुपपीडंशेतेपत्योपदंशऊचुंवतइत्यादिकृद्वृत्तौच नघित्वमिति बोध्यम् । लाक्षणिकइति । अतएवभाष्योक्तवर्णसंज्ञापक्षेणनफलभेदइति बोध्यम् । पतिसखीसमासइति इदम्प्राचाम-

नुसारेण तन्मतेऽभिव्यक्तेति न्यायेनवृद्धेर्वारणात् । पदकार्य्य विषयकत्वन्तस्येति स्वमतेतुसंख्याग्रहितियुक्तम् । इत्यादीष्टेति आदिनाद्वन्द्वे पूर्वनिपातसंग्रहः । बहुत्वसंख्येति । इदंप्राचामनुसारेण स्वमतेबहुत्वेसंख्यात्वाभावस्य वक्ष्यमाणत्वात् । संख्येयविषयप्रश्नेति । यद्यपि संख्याप्रश्नेवृत्तिस्तथापि संख्येयमपि तत्प्रश्नेविषयोभवत्येवमेवोक्तम् । भाष्येस्पष्टत्वादिति । तत्रहिडत्यान्तादेकवचनद्विवचनेनस्तः तत्र संख्यायानिर्णयेनप्रष्टव्यत्वाभावेन किमोऽप्रयोगादित्यभिप्रापकमुक्तम् । बहुगणशदन्तेति । तिपर्युदासस्तुनोक्तः । तस्यार्थवत्परिभाषाबाधेनापि सार्थकत्वसम्भवेन प्रकृतार्थसाधनेसाधारणत्वात् । अस्मज्ञातविरोधन्यायेन प्रथमोपगतसंख्यापदेसंचरितकृत्रिमन्यायबाधानौचित्याच्च । संख्यापदार्थनिर्णायकः कृत्रिमन्यायः तिशब्दार्थनिर्णायकोर्थवन्न्यायः तत्रकतरस्यबाधइति संशयेशदन्तपर्युदासस्यैव विनिगमकत्वं वाच्यम् । ततोवरन्तन्मात्रप्रदर्शनमेवेति चेत् । अयमेवतत्रत्यभाष्यप्रदीपोद्द्योतानामाशयइति बोध्यम् । अभ्यासाम्रेडितादीति । तेषुमहासंज्ञाकरणंप्रचोमनुरोधेनेति बोध्यम् । तयोरिति । तदर्थयोरित्यर्थः । नियतविषयेति । नियतानियतान्येकत्वान्येतद्विषयेत्यर्थः । नियतैकत्वज्ञानाच्त्रित्वादेरत्यन्तानियतैकत्वज्ञानाद्बहुत्वेऽतिरिति भावः । बहुत्वादिहीति । आदिनागणत्वन्तच्छब्दवाच्यं हीत्यर्थः । यथाश्रुतआदिपदग्राह्यं दर्वचंस्यादिति बोध्यम् । ष्यादीति । त्रित्वादीत्यर्थः । धर्मविशेषइति । न तु त्रित्वादिरूपमित्यर्थः । सचैकोऽखण्डोप्यधिस्तस्य चानेकेषु पर्याप्ते-

रेकत्वम् समवायवदिति बोध्यम् । न च बहुत्वस्यात्रित्वाद्यतिरिक्तत्वेगौरवमिति शंक्यं बहुत्वस्यत्रित्वादिरूपत्ववादिनां बहुत्वत्वजातिरूपम् । बहवःत्रयइत्यादिप्रवृत्तिवैलक्षण्यावश्यमतिरिक्तं वाच्यं मयातुबहुत्वमेवातिरिक्तमिष्यते बहुत्वस्त्वन्तुवह्वितराद्वृत्तित्वेसतिसकलबहुवृत्तित्वरूपामेति । विशेषाभावादथत्वयोर्व्येतमयाबहुत्वत्वमपि जा।तेरतिरिक्तंनेष्यते किन्त्वेकत्वद्वित्ववद्ब हविशिष्टसंख्यात्वमेव बहुत्वत्वमिति तन्मयापि बहुत्वमतिरिक्तंनेष्यते किन्तुएकत्वद्वित्ववद्ब हुत्वेतिवक्तुंशक्यमित्यलमतिप्रशस्तविचारेण । अतएवेति । बहुत्वेसंख्यात्वाभावादेवेत्यर्थः । इत्युक्तमिति । ननु बह्वादीनां शब्दरूपाणांत्रित्वादिवृत्तिसंख्यात्वजातिमद्भिन्नत्वमित्यर्थेलक्षणापत्तेश्चव्यपदेशातिदेशश्चायंत्रित्वादिसंख्यायांयोव्यपदेशः संख्येतिसवह्वादिषु भवतीत्यर्थेनसर्वेष्टसिद्धौ बहुत्वस्यसंख्यात्वेपिनेदं भाष्यंविरुद्धं किञ्चवतुडतिविषयकमेवास्तु तयोःसंख्यावाचकत्वस्य बाधात्तुलक्षणेति च तत्तात्पर्यंवक्तुंशक्यम् । किञ्चबहुत्वस्यसंख्यात्वाभावेसंख्यानैव तथातिङामिति भाष्येसंख्यापदेनबहुत्वमपि विवक्षितम् । तथा तस्यपूरणइति सूत्रेवार्तिकं संख्यापूरणइति वक्तव्यमिति । अत्रापि संख्यापदेनबहुत्वंविवक्षितम् । बहुतिथइत्यादिसिद्ध्यर्थम् तद्विरुध्यते । एवं बहुस्थलेषु संख्यापदेनबहुत्वंविवक्षितम् । तद्विरुध्येत तस्मादस्तुबहुत्वंत्रित्वादिरूपासंख्यैवेति चेन्न । अत्रप्रकरणेसंख्यापदेन संख्यावाचकपदस्यैवविवक्षितत्वात् । किञ्चबहुत्वस्यसंख्यात्वेभूम्न्यादीनां संख्याकार्य्यंदुर्वारम् । न च नि-

यमेननिस्तारः सम्पूर्णसूत्रस्यभाष्येप्रत्याख्यातत्वेन तद्विरोधस्य दुष्परिहरत्वात् । तत्रतत्रभाष्येबहुत्वस्य संख्यापदेनव्यवहारस्तु बहुशब्दस्यसङ्ख्यासंज्ञकत्वेन शब्दार्थयोस्तादात्म्याङ्गीकारेण द्विरेफव्यवहारवद् हिरण्यपूर्वकशिपुमितिवच्चनेयः ॥ एवञ्चतस्यनतादृशनिश्चयहेतुत्वमिति भावः । तस्यत्रित्वादिभिन्नत्वेपि त्रित्वादिवृत्तिसङ्ख्यात्वजातिमत्त्वमस्त्येव । अतएवनित्यंबहुवचनान्तइति प्रतीकेबहुत्वसङ्खावच्छिन्नेति स्वग्रन्थोबहुत्वंसंख्येत्यभिप्रायकाभाष्यादिग्रन्थाश्च स्वरसतःसङ्गच्छन्तो बहुत्वंनसङ्खेति । शब्दरत्नादिग्रन्थास्तु शब्दपराद्बहुशब्दात्त्वप्रत्ययेबहुशब्दः नियतविषयपरिच्छेदहेतुत्वरूपसंख्यात्वाभाववानित्यर्थाबोध्याः । यद्वा बहुत्वादित्यत्रसंख्यापराद्बहुशब्दाद् भावप्रत्ययोबहुत्वादीत्यर्थः । संख्याव्यापकइति । तादात्म्येनयत्रसङ्खातत्रसमवायादिनासइत्यर्थः । एवञ्चबहुत्वत्वेनरूपेणन बहुशब्दात्त्रित्वभानमिति न तादृशोनिश्चयः त्रिशब्देनतुत्रित्वभानमिति सोऽस्त्येवेति भावः । धर्म्मविशेषइति । न तु त्रित्वत्वादिरूपइति भावः । बह्वादिकयाचापि संख्यायतइति भाष्यविरोधः । अनेनहिभाष्येणैकादिषु च तुल्योयोगइति प्रतीयतइति चेदत्राह । यत्त्विति । एकादिकयेति । एकत्वादिकयेत्यर्थः । बह्वादिकयेति बहुगणशब्दवाच्यबहुत्वसंख्ययेत्यर्थः । यथाश्रुतमेवतदादिशब्दरूपेत्यर्थकं स्वव्याप्येति । यत्रयत्रशक्तिसम्बन्धेनश्यादिशब्दस्तत्रतेन सम्बन्धेनबहुगणशब्दाविति भावः । त्रित्वादिसंख्येति । पूर्ववत्त्वप्रत्ययेनत्रिशब्दार्थसङ्खेत्यर्थः । शेषप्राग्वद्व्याख्येयमि-

तिवदन्ति । सङ्ख्यायतइति । अस्येतीति शेषः बहुत्वंसंख्या-तिवादिनापिबहुइति विषयएवदिशैवव्याख्येयत्वात् । सम्पूर्णसूत्रस्यत्वयानियमार्थत्वानभ्युपगमादिति भावः । नन्वेवमपि कतिशब्दासंग्रहः । जिज्ञासाविषयसङ्ख्यावन्तोहिकतिशब्दवाच्याः तत्रत्रित्वादेरेवसङ्ख्यारूपत्वेतद्व्याप्यत्वंदुर्वचं । अतःप्रकारान्तरेण तत्संग्रहमाह । कतिशब्दोपीति । वस्तुतस्तु समवायतादात्म्यघटितसामानाधिकरण्येन संख्यात्वस्यत्रित्वादिव्यापकत्वंसुवचम् । अभेदेनव्यापकत्वमित्यत्रमानाभावश्चेति बोध्यम् । उह्यमिति । अयंभावः । एकत्वादिषु लोकप्रसिद्धयोगस्यबह्वादिषु बाधात्तदर्थान्तर्भावेण संख्यापदस्यव्यावृत्तिः स्वीक्रियतेसाचेहैवनप्रदेशेषु मानाभावात् । एतेनैवंसतिभूय्यादिषु सङ्ख्याकार्य्यातिप्रसङ्गइत्यपास्तम् । बह्वादिसङ्ख्यापदंयोगरूढमिति यावत्सङ्ख्यापदेबाहुलकात्करणेऽङिति । इत्यलमिति । इदं सूत्रंभाष्येप्रत्याख्यातं तस्यायंभावः । आरम्भेपि प्रदेशएकादीनां ग्रहणायातिशदन्तायाइति साकान्यापेक्षंज्ञापकंवक्तव्यमेव तद्दूरंबह्वादीनामेव सङ्ख्यापदेनग्रहणायतादृशज्ञापकाश्रयणम् । एतेनकौस्तुभकृदुक्तं समाहितमित्यलमर्थः । एतेनेति । उक्तसङ्ख्यात्वस्यबहुगणयोरभावेनेत्यर्थः । नन्वेवक्लिष्टकल्पनयाबह्वादिषु योगरूढस्वीकारेफलमस्तिनवाऽऽद्ये महासंज्ञाकरणसामर्थ्यात्प्रदेशेकृत्रिमन्यायबाधइति भाष्यासङ्गतिः । द्वितीयेस्तुसङ्ख्यापदस्यरूढिरेवालमनयाक्लिष्टकल्पनयेत्यरुचेराह । यद्वेति । सूत्रेबहुग्रहणन्त्रित्यारभ्यव्याख्यान्तरम् । अत्रनियमेनसङ्ख्येति शब्द-

स्यापि सङ्ख्याकार्य्यवार्य्यतइति विशेषइति बोध्यम् । तयो-
रिति । बहुगणशब्दयोरित्यर्थः । अनियतेत्यादि नियतैक-
त्वनिश्चयजनकत्वाभावेनेत्यर्थः । तादृशनिश्चयजनकशब्दएव
सङ्ख्यापदस्य वृत्तिरसङ्ख्यासङ्ख्येत्यादिभाष्यादेकादिकथा-
चापिभाष्याच्च सङ्ख्यासंज्ञास्यादिति वार्तिकाच्च । अतएवसङ्
ख्येतिपदेनसङ्ख्याकार्य्यन्त्वदीयनियमेनतुवारणीयम् । तस्य
बहुत्वाचित्वाभावात् । प्रत्ययलोपे । अनुवृत्तेति । तत्फलन्त्वपि पू
र्व्वईङ्गतौक्विप्भागुरिमतेऽल्लोप पिपौपियः इत्यत्रैरनेकाचइति
यण्ननन्देत्यादावाम् चनप्रत्ययपदाभावेतु यस्यकस्यचिल्लो-
पेप्रत्ययलक्षणमित्यर्थेनानेकाच्त्वाभावेनाप्राप्तौ यणामभावा-
वतिदिश्येयातां किञ्चोक्तेर्थेऽवैहतीत्यत्रष्यङ्स्यादिति बोध्यम् ।
लोपइति चसतिसप्तम्यतएवपञ्चभवेत्यादावतिङइति निषा-
तप्रतिषेधः दधीयतिमधूयतीत्यत्रसुबन्तलक्षणः क्यच्वेभि-
दीतिचेच्छिदीतीत्यत्रयङोवेतीट्चसिद्ध्यति । अवयवलोपे-
माभूदिति । अत्रकैयटोऽन्यतमावयवलोपेतद्घटितसमुदा-
यस्याप्यदर्शनमस्त्येव यथावयवेदग्धेपटोदग्धइति मुख्योऽवय-
हारइति तस्यायंभावः । समवायिकारणनाशेसत्यसमवायि-
कारणनाशेवाकार्य्यनाशोस्त्येवेति सर्व्वसम्मतम् । एवंचमहा
पटस्यनाशोमुख्यएवतन्न । शसहकृतात्वकारणकलापात् स्व-
एडपटोत्पत्तिस्तद्वत्प्रकृतेपीति आग्नीयेत्यादाविति । आदित्ना-
समिध्रमिच्छतिसमिध्यति क्विप्समिधेत्यत्रहोनादेशोन ज्ञा-
पकमिति । अयंभावः नदभावबुद्धिप्रतिबद्धः प्रतिबन्धकेति
सर्व्वसिद्धंशास्त्रे त्वाऽऽहार्य्यापि सात्मनेतिनिश्चितम् । एवंचा-

वयवलोपेनसमुदायस्यैवेत्यवयवान्तरेतिदेशेन तद्बुद्धिसस्वेन कथं तल्लोपबुद्धिः स्यादतःकैयटोक्तम् नयुक्तंकिन्तुज्ञापकमेवाश्रयणीयम् । अतएव भावरूपआदेशेनतल्लोपकार्य्यमिति प्रपञ्चितं प्राग्विति । नन्वेवमाध्नीयेति भाष्योदाहरणासङ्गतिः तथाहि कात्स्न्यनिवेशेपि [illegible]इयँवाच्यैव प्रत्ययलोपेलुप्तप्रत्ययवृत्त्यसाधारणधर्म्मनिमित्तकं भवतीत्यन्यथासुदृषदित्यत्रदीर्घोदुर्व्वारः । असःकृत्स्नप्रत्ययस्यलोपसत्वादसम्बुद्धौसौविधानेन प्रत्ययलक्षणत्वाच्च । अतएवैकेनैवप्रत्ययपदेन कात्स्न्यर्लाभेद्वितीयप्रत्ययपदमकार्य्यमित्युक्तं भाष्येप्रत्यासत्यनङ्गीकारेतूक्तरीत्योभयोरप्यावश्यकत्वेन तदसङ्गतिः स्पष्टैव। एवञ्चतवमतेलुप्तः सकारात्मकः प्रत्ययस्तद्वृत्तिझल्त्वं नप्रत्ययासाधारणम् कैयटमतेतुनदोषः लुप्तप्रत्ययविशिष्टः तद्वृत्तिस्तदसाधारणोधर्म्मआर्द्धधातुकत्वादिरेवेति चेन्मैवंलुप्तप्रत्ययएवयत्कार्य्यप्रयोजकस्तत्प्रत्ययलोपेपि भवतीत्यर्थेनादोषात् सुदृषदित्यत्रलुप्तः । अस्सत्वप्रत्ययोप्यव्युत्पत्तिपक्षेसुपयाइत्यादौ दीर्घप्रयोजकआध्नीयेत्यत्रतुलुप्तः सःसतुप्रत्ययसंज्ञकएव।अनुनासिकलोपप्रयोजकइति। अवयवेपि प्रत्ययत्वव्यवहारस्येति । नचैवं प्रत्ययादेरित्संज्ञायामतिप्रसङ्ग आदिपदानुवृत्तिसामर्थ्येन कृत्स्नप्रत्ययादेरेवविवक्षितत्वात् । एवमायनेयीत्यत्राद्युदात्तश्चेत्यत्राप्यतिप्रसङ्गोभञ्जनीयः । नन्वेवमपि येनविधिरिति सूत्रेभाष्येऽचिष्णुइति सूत्रेतदादिविधेरभावेश्रियौश्नुवावित्यत्रैवस्यात् श्रियःश्नुवइत्यत्रनस्यादित्युक्तं तद्विरुद्धमेतत्प्रत्ययावयवेपि प्रत्ययत्वसत्वेनाचप्रत्ययइत्यर्थेऽजादौ

प्रत्ययइति वार्थेप्रितत्रतत्प्रवृत्तेर्निष्फलत्वादिति चेन्नैवम् । तस्यप्रत्ययत्वेपि विधानाभावेनाङ्गसंज्ञानिमित्तत्वाभावात् । एतेनकर्म्मठइत्यत्रैकादेशोपि परिहृतःठस्येकइति सूत्रेभाष्येकर्म्मठेऽतिप्रसङ्गमाशंक्याङ्गस्येति वर्त्ततेऽङ्गस्य यष्ठकारःकिञ्चास्य ठकारनिमित्तंयस्मिन्नङ्गमित्येतद्भवतिकस्मिंश्चाङ्गमित्येतद्भवति प्रत्ययइति यदुक्तन्तस्यप्रतीयतइति व्युत्पत्त्याविहितइति नतद्दोषः अङ्गसंज्ञासूत्रेसाक्षादेवविधानमाश्रीयतेनघटकतयेतिचतदाशयः यदपि प्रत्ययस्थादिति सूत्रेभाष्येकेति संघातग्रहणंकारिकाहारिकेत्यत्रनस्यात् वर्णपक्षेतुवचनसामर्थ्यादेवभविष्यतीत्युक्तम् । तस्यायमाशयःस्थग्रहणेसतिसामर्थ्यात्परिभाषावाध्यते वर्णग्रहणेतुवचनसामर्थ्यादेवन प्रवर्त्ततइति स्थग्रहणंनकार्य्यमिति । एवंभोह्होति सूत्रेपितत्सामानाधिकरण्यानुरोधात् कृत्स्नप्रत्ययग्रहणमिति तद्विरोधेनेति बोध्यम् । अनेनावयवेप्रत्ययत्वज्ञापनेपितद्व्याप्ययित्वादेरज्ञापनात् । अन्यथाभूयास्तामित्यादाविडादेरापत्यावहूपप्लवापत्तिः । एवमन्यत्रातिप्रसङ्गोभञ्जनीयस्ततोज्ञापकसिद्धस्यासार्व्वत्रिकत्वेनयदिप्राप्नोति । एवंचेति । एतेनकैयटमतेप्रत्ययग्रहणात् स्वरूपतःप्रत्ययस्यग्रहणमिति कल्पनाप्रत्युक्ताचारितार्थ्येपि फलाभावात् । ओदेशप्रेति । अत्रावयवप्रत्ययविषयवाक्येतद्विधानाभावेनासम्भवात् तदादेरित्यस्यानुपस्थितिरिति । एधिषीष्टेत्यादौ सीयुट्सुडादेः षत्वसिद्धिरित्यपरमनुकूलम् । अन्यथातदादेरित्यस्योपस्थित्येण्कवर्गान्ततदादेरिति सूत्रार्थेनतत्रतदनापत्तिरतोलक्ष्यानुरोधान्नैवमर्थः किन्त्वेण्चवर्गा-

भ्यांपरस्यतदादेरवयवोयः प्रत्ययस्तदवयवस्यसकारस्यषत्वमित्यर्थइति वक्तव्यंस्यात् । लक्षणादोति । आदिनाआद्ये सौत्रत्वाद्द्वन्द्वःव्यधिकरणान्वयश्च । अन्त्येप्रसज्यप्रतिषेधो व्यधिकरणान्वयश्चइति । चरितार्थमिति । एवंचैकयैवकल्पनयाद्वयोश्चारितार्थ्यमिति लाघवंकैयटमतेकल्पनाद्वयमिति । गौरवमिति भावः । ननु कारस्न्यंविवक्षायाः फलंविद्ध्यर्थमिति पक्षआश्रीयेति । नियमार्थमिदसूत्रमिति पक्षेतद्विवक्षायाःकिं फलमिति चेच्छृणुतद्विवक्षांविनातस्यनियामकतायाएववक्तुमशक्यत्वमिति किञ्चप्रथिमानमाचष्टेप्रथिमयतिततः क्विप्प्रथिमित्यत्रानश्चेति टच्सिद्धिः । एवंवाग्मिनमाचष्टेवाग्मयति ततःक्विप्संयोगान्तलोपेवहवोवाग्मोयस्यांनगर्य्यांसावहुवाग्मका नगरीत्यत्रेनः स्त्रियामिति कप्सिद्धिश्च । एवंसर्व्वतआचष्टेसर्व्वतयति ततः क्विप्सर्व्वादित्यत्रात्वसन्तस्येति दीर्घसिद्धिश्च । अचःपरेति स्थानिवत्वन्तुननव्यमतेसपादसप्ताध्यायीस्थदीर्घविधौतन्निषेधात् । एवंसर्व्वाद्विद्यतेयस्याससर्व्वत्वोसर्व्वत्विनाविल्यत्रास्मायामेधास्रजइति विन्प्रत्ययस्यसिद्धिः । एवंसुसर्व्वादित्यत्रनसुधातोः क्विप्परमेणसमासआचक्षाणेणिचिक्विपि परमन् । सुनासमासेसुपरमन्नित्यत्रसोर्म्मनस्यलोमोषसीति खरसिद्धिश्चेहापि नस्थानिवदाद्ये ऽपूर्व्वविधित्वादन्त्येस्वरविधित्वात् । अन्यथा प्रत्ययावयवलोपेपि प्रत्ययासाधारणधर्म्मनिमित्तकमेवेति नियमेनान्नन्तत्वमिन्नन्तत्वमसन्तत्वंस्यानिद्भावेनलभ्येतेत्युक्तोदाहरणेषूक्तविधीनामप्रवृत्तिरेव स्यात् । एतेनकचित्पर्य्युदासेनकचित्तत्सूत्रस्थपदान्तरसाहचर्य्येणश्रूयमाण-

तदन्तेष्वेवोक्तविधीनांप्रवृत्तेरङ्गीकारेण वक्ष्यमाणलक्ष्येषु तदप्रवृत्तिसिद्धौप्रत्ययलक्षणसूत्रंव्यर्थम् साहचर्य्यन्नसर्व्वत्रव्यवस्थापकंमतिहितज्ञापनार्थन्तदितिशब्दरत्नाद्युक्तम् । बहूनांज्ञापकान्तराणांसत्वादित्यपास्तम् । साहचर्य्येणतत्रैवतत्प्रवृत्यङ्गीकारउक्तलक्ष्येषु तदप्रवृत्त्यापत्तिः नचेष्टापत्तिः सुदृषत्प्रासादइति भाष्योदाहरण स्यासङ्गत्यापत्तेः । नियमार्थमिति । तत्फलन्तुसुदृषत्प्रासादइत्यत्रस्थानिवत्वेनासन्तत्वात् स्वरदीर्घौन ननुनिर्दिश्यमानपरिभाषयानिर्दिश्यमानावयवाचएवदीर्घविधानात् कथमत्रतत्प्राप्तिरिति चेच्छृणु अस्पदस्यषष्ठ्यन्तत्वाभावेन तत्परिभाषायाअप्रवृत्तेरिति नन्वन्तरङ्गानपीति परिभाषयेत्संज्ञालोपाभ्यांप्रागेवजसोलुकि स्थानिवत्वेन जसन्तत्वमेवनासन्तत्वं न च स्थानिवत्वेनजसन्तत्वेऽसन्तत्वमर्थसमाजग्रस्तमिति वाच्यम् । एवंसत्यटिटदित्यादौस्थानिवत्वेनण्यन्तत्वइति निर्दिश्यमानणिबुद्धेरप्यर्थसमाजग्रस्तत्वेन षाष्टद्वित्वस्यादेशत्वेणि लोपोनस्यादिति भाष्योक्तेरसङ्गत्यापत्तेः । एवञ्च कथमेतदुदाहियतइति चेत् शृणुफलेविशेषाभावेनोक्तपरिभाषयातस्यलोपइत्यस्याबाधनात् न च प्रकृतसूत्रारम्भेविशेषोऽन्यार्थमावश्यकस्योक्तत्वात् फलेविशेषत्वेपीत्संज्ञासूत्रतपरिभाषयानबाध्यत आकडाराइति नियमारम्भेणसंज्ञानकस्यापि बाध्यानवाकस्यापि बाधकेत्यर्थस्यसामान्यतोज्ञापनाङ्गीकारादतएवगर्गाविदाइत्यादौ जिनित्यादेरिति स्वरवारणार्थंलुकिस्वरविधौ प्रत्ययलक्षणंनेति वचनमारब्धंनलुमतेति सूत्रेभाष्यइत्संज्ञायालुकः प्रागप्रवृत्तौत तद-

सङ्गतिः स्पष्टैव। अतएवदेवदारोर्विकार≍फलंदेवदारुओ-रञित्यत्रफलेलुगिति तस्यविकारोञितश्च तत्प्रत्ययादित्यञि-दैवदारवमित्युदात्तं सिध्यति तथा विदस्यगोत्रापत्त्यानिवि-दाः ततोविदस्ययून्यतइञ्तस्यण्यक्षत्रियेति ञितश्चप्रत्ययात् परत्वाल्लुकिविद इदंत्वनचैवंभसंज्ञापि लुकानबाध्यत इति राजपुरुषासिद्धिरिति वाच्यम्। उपजनिष्येति न्यायेननलु-मतेतिनिषेधेनप्रागपि तदप्रवृत्त्यङ्गीकारादिति बोध्यम्। एवं पीतमम्बरंयस्याःसापीताम्बरेत्यत्रसोर्लुकि स्थानिवत्वेनोगिद-न्तत्वादुगितश्चेति ङीम्न। एवंशिखिनमाचष्टइति णिचिटिलो-पेक्विपिशिगित्यत्रस्थानिवत्वेनेनन्तत्वादिन् हन्निति नियमेनोप-धादीर्घवारणेपि वर्तमानेसौचेतिदीर्घोनयदितत्रनेत्यनुवर्तते त-दातलुनोस्यास्तीति तलुनीतमाचष्टेणिचिक्विपितलुनइत्यादाव-नुनासिकस्येतिसर्वनामस्थानेति वादीर्घोन। बहवःशिखिनोय-स्यांनगर्य्यांसावहुशिङ्नगरीत्यत्रेनः स्त्रियामितिकम्न। एवंक-ल्याणधर्म्माणमाचष्टेकल्याणधर्म्मयति ततःक्विप्कल्याणधर्म्म तस्यसमोपमुपकल्याणधर्म्ममित्यत्रापि स्थानिवत्वेनानन्तत्वाद नश्चेति टच्न। एवमप्रजसमाचष्टेअप्रजयति ततःक्विप्सोऽस्या-स्तात्यप्रज्वानित्यत्रस्थानिवत्वेनासन्तत्वादसन्तलक्षणोविन्ने-ति। अन्यथाकृत्स्नप्रत्ययलोपेपि स्थानिवत्वेनतदन्तत्वात् उक्तोदाहरणेषु तेतेविधयस्स्युरेवेति बोध्यम्। प्रत्ययस्यासा-धारणमिति। अत्रप्रमाणंद्वितीयप्रत्ययग्रहणमिति भाष्यकृतः। अन्यथा तल्लक्षणमित्येववदेदिति। तदाशयं कैयटःप्रकृतेत-स्पदप्रत्ययपदयोः पर्य्यायत्वेपि प्रत्यासत्तिः प्रार्थनीयस्याप्रार्थि-

तस्यैवलाभायेति लाघवमिति तदाशयः वस्तुतस्तुनतच्छब्दः कस्यचित्पर्य्यायइति मञ्जूषायांसिद्धान्तितम्। उदद्योतेयत्तुपर्य्यायत्वमुक्तन्तत्तुकेचिदाहुरित्युक्त्यामतान्तरमिति बोध्यम्। इतोपि लाघवमभिप्रेत्यस्थानिवत्पदानुवृत्तिरेव कार्य्येति तदाशयंकौस्तुभकृतः। बहुव्रीहिलभ्यफलस्यनखभिन्नइत्यादेरन्यथासिद्धत्वादेवमुक्तमिति तदाशयः। नन्वेवं कात्स्न्यसाधारण्ययोर्विवक्षायैद्वयोरपि प्रत्ययपदयोःसामर्थ्यवर्णनीयन्तच्चासम्भविलोपेस्थानिपदित्युक्तावतिप्रसङ्गस्योक्तत्वादुभयोरप्यभावे प्रत्यासत्तेरप्युक्तयावक्तुमशक्यत्वात् तृतीयस्यचप्रत्ययपदस्यभगवताप्रत्याख्यानात् तथाचकोस्यभाष्यस्याशयइति चेदयम्। तावन्मात्रफलकत्वेमात्रालाघवायप्रतिपत्तिलाघवायच कृत्स्नप्रत्ययलोपइत्येवब्रूयादिति नचैवमपि प्रत्ययग्रहणसामर्थ्यादवधारणान्तर्भावेण समासेऽसाधारण्यंलभ्यतांस्वसमानाधिकरणवर्णविशेषत्वरूपं प्रत्ययस्यप्राधान्यं दुर्लभम्। तंविनापितस्यचारितार्थ्यात्। एवञ्चचित्रायांजातायांचित्रे त्यादावनिष्ठंङीवादिविधायकत्वमेवास्यस्यान्नियामकत्वमिति चेन्न। अकारान्तायेटिदादयः तदन्तंयत्प्रातिपदिकंतदन्तादिति तदर्थाङ्गीकारेणानल्विधावित्यनुवृत्तेर्विधिपक्षइवविशेषणसामर्थ्यात् श्रूयमाणाकारान्तादित्यर्थाङ्गीकाराद्वातत्रास्याप्रवृत्तेः स्पष्टश्चायमन्त्यः प्रकारःप्रकृतसूत्रेकैयटे। अस्तिसिचोपृक्तइति सूत्रेशेखरेच नचान्त्यपक्षेसशमारज्जुरित्यलङीबर्थंनतुमात्रजितिप्रत्याहारनिर्देशइति सिद्धान्तेकतिस्त्रियइत्येतद्वारणायावश्यकत्वेनान्यत्र चात्रसामर्थ्याभावादिति वाच्यम्। नष-

डितिनिषेधेनापिकतीत्यस्यसुसाधुत्वादऽस्तुवाश्रवणेत्यादिनिर्देशेनोक्तप्राधान्यस्यलाभइति दिक् । तत्रैवेतोति तदेतियुक्तम् । अन्यत्रेति यङ्लुङन्तशेखरइत्यर्थः । एवंपास्यद्धीतिवक्तव्येवेभिदीतीत्युक्तिमात्रमेकदेशिनोन्यत्सर्व्वंसिद्धान्तिनइति बोध्यम् । नलुमताङ्गस्येत्युद्देश्यकमिति । तत्पूर्व्वत्वेनतदुद्देश्यकमित्यर्थः । अन्यथासुबन्तत्वेन तत्पूर्व्वभागश्चराजनित्यस्योद्देश्यतासत्वाद् राजपुरुषेपदत्वंनस्यादिति बोध्यम् । संज्ञाचनेति। आद्यपक्षइति शेषःजातातिष्ठतीति। वक्ष्यमाणरीत्याजातेपि लुकितत्प्रवृत्त्यालुकोऽन्तरङ्गाङ्गसंज्ञानिमित्तविनाशकत्वाभावेन तत्रकर्त्तव्यायान्तन् न्यायाप्रवृत्तेरिति भावः । भसंज्ञायास्तुलुकिकृतेन लुमतेतिनिषेधादप्रवृत्त्यातद्रूपान्तरङ्गनिमित्तविनाशकत्वं लुकोस्त्येवेति तत्रकर्त्तव्यायांतन्न्यायाप्रवृत्तिरिति बोध्यम् । तृज्वत्वमिति । जातन्तिष्ठतीति भावः । अङ्गसंज्ञायांनलुमतेत्यस्याप्रवृत्तेरेवं चलुकोऽन्तरङ्गसंज्ञानिमित्तविनाशकत्वाभावादन्तरङ्गानपीति न्यायाप्रवृत्तेः पूर्व्वमङ्गसंज्ञायां तृज्त्वेडोबादिरिति भावः । स्वमोर्नपुंसकादिति सूत्रइति । इत्यनुवर्त्तमानेनेतराच्छन्दसीति सूत्रइत्यर्थः । त्रेस्त्रयः । शङ्कावारणायेति । तत्रापि न्यासउक्तनिर्देशाश्रयणेतुजरायाअसुङोवप्रतिपत्तिगौरवमिति भावः । ईत्वमवकारेति । अस्यतर्थेत्यादिरादाविति फलितार्थकथनं भाष्येवकारप्रतिषेधइत्येवन्निरुक्तेः। आवश्यकमितीति। इदमपि सम्भावनामात्रेणेति शेषः । अत्रपक्षचतुष्टयमुपलभ्यते तत्रावकारेप्रतिषेधइति वार्तिकारम्भएवज्यायानन्यथा संस्थाशब्देप्रत्ययलक्षणेना-

तृणेडित्यत्रेवेत्वापत्तेरित्येकः प्रत्याख्यानमेकदेश्युक्तिरिति प्रत्ययलक्षणसूत्रं च वार्तिकानारम्भेप्रकृतेऽनिष्टत्वसिद्ध्यर्थमेव स्याद्यथोत्तरंमुनीनां प्रामाण्याच्चक्विपोत्वंभवत्येव हलीत्यस्यानर्थकत्वात् संस्थाशब्देविजेवभाष्यप्रयोगाद्दृत्वाभावइति द्वितीयःवार्तिकानारम्भणीयामल्विधाविति प्रत्ययलक्षणसूत्रेऽनुवर्तनीयमितिक्विपोत्वंनैव प्राप्नोतिदधातेर्व्वेतित्वेकदेश्युक्तिरेव यत्तुदृशिग्रहणादपूर्व्वत्वाशयकत्वंतस्यजोर्य्यतेर्य्युरित्यस्यैवेत्याहुरिति तन्नसम्यगेवमपि जनसनेति सूत्रेधियोधियइत्यत्रेयङ्त्वस्याभीयासिद्धत्वन्तुनभवति क्विपोत्वंविभक्तावियङितिव्याश्रयत्वादिति भाष्योक्तेरसङ्गत्यापत्तेरिति तृतीयः ईत्वविषयेक्विवेवनेतिचतुर्थः तस्यायंभावः । एवंसतिवार्तिककारस्यप्रत्याख्यानयोः फलैक्यंसंपद्यतअनल्विधावित्यस्यस्वरितत्वप्रतिज्ञांमण्डूकानुवृत्तिंविनैव प्रत्ययलक्षणसूत्रेनियमार्थत्वं चसंस्थाशब्देचक्विपमङ्गीकृत्यवार्तिकारंभावश्यकत्वकल्पनांभाष्यकारप्रयोगादीत्वाभावकल्पनांचापेक्ष्यस्थः कचेति सूत्रकलस्वरितत्वप्रतिज्ञाकं विच्पदमेवानुवर्ततेनाकलस्वरितत्वप्रतिज्ञाकं क्विप्यपीयमेव कल्पनायुक्तातत्रभाष्येक्विप्यपीदन्तु वार्तिकानुसारिणइति युक्तश्चायंक्विठिविधायकेदृशिग्रहणेनकित्वप्रयुक्तकार्य्यादर्शनेसनदृश्यतइत्यस्यैव युक्तत्वादिति बोध्यम् । स्पष्टञ्चेदं सर्व्वंघुमेति सूत्रेभाष्यप्रदीपोद्द्योतेषु इति दिक् । पर्य्यालोचनयासिद्धादिति । इदंक्वनिबर्थंपाधात्वर्थञ्चोक्तंशेषन्तु वार्तिकंशेषउपलभ्यतएवेति बोध्यम् । ह्वस्वइति कप्चेति शेषः । यूस्त्र्याख्यौनदी । तदन्तयवेलक्षणेति । शत्रन्त-

स्याङ्गसंज्ञायानिमित्तभूतेनयत्वयवइत्यर्थः । तेनतुदन्गौरो-
त्यत्रनदोषः नचैवमपि शत्रन्तान्मतुपिचतुदद्वतोत्यत्रदोषएव-
मतुपस्तदङ्गसंज्ञानिमित्तत्वान्नयत्वयवत्वाच्चनचेष्टापत्तिः वर्णसं-
ज्ञापक्षेऽप्राप्तिरिति चेन्नशीसाहचर्य्येणेकारप्रश्लेषेणवाईकार-
रूपेनयत्वयवइत्यर्थाङ्गोकारात् नन्वेवमपि तुदतेहितं तुदतीय-
न्तमततितुदतीयात् तमाचष्टइति णिच्चिक्विपिटिलोपेयलो-
पेतुदतीः ततोमतुपिङीपितुदतीमतीत्यत्रदोषएवेति चेन्न । व-
र्णसंज्ञापक्षेपि तत्रप्राप्त्याइष्टापत्तेः।अतएवशीङोरिति नासु-
त्रियदितत्रानुमोनिष्टत्वेमानमुपलभ्यते । तदाचरमावयवेलक्ष-
णेति बोध्यम् । आख्याग्रहणादिति । विच्पक्षइदंकपक्षेतुख्य-
ग्रहणेतियुक्तम् । अनभिधायकत्वेति । येन प्रवृत्तिनिमित्तेन
लिङ्गान्तरावैशिष्टेन स्वेनार्थोभिधीयते यत्प्रकारकबोधजनने-
च्छयोच्चरितं तत्वंयदास्वस्यतदानित्यस्त्रीत्वमितियावत् यस्यनदो
संज्ञाचिकीर्षितासस्वपदार्थइति बोध्यम् । लिलिङ्गे नेति ।नपुंस-
केह्रस्वात्प्राक्समानाकारत्वमिति बोध्यम् । सयइति । अनुवर्त-
त्तइति । सुप्तिङिति सूत्रादिति शेषः । अयचीति । प्रेत्य । नेति ।
प्रसज्येति । इदञ्चासर्व्वनामस्थानइत्यत्रत्यनञसम्बन्धमभि-
इदमपि निषेधार्थकोऽशब्दमभिप्रेत्यस्वादिषु पूर्व्वपदम्भवति
ततोयञादावसर्व्वनामस्थानेपरेमध्येचेत्सुबन्तन्तदपि पदम्भव-
तीति वाक्यद्वयेनसुवाचेत्यादिसिद्धौ वाक्यत्रयकल्पनाचिन्त्या ।
एवञ्चसौपरेफलभेदोनेत्यपरमनुकूलंशम्भवतीत्यादौ शमुपप-
दपूर्व्वसुबन्तभूशब्दादाचारक्विबन्ताल्लटितिपि शपिगुणेपू-
र्व्वरूपमपि नयञादीत्यादिशब्दस्यप्रकारवाचित्वेन शपोपि

यञादित्वादिति। एवं सजनतीत्यादिबोध्यम्। गोतोणित्। वि-
परिणम्बतइति। णित्कार्य्यमिति। एवञ्चणिच्छब्दस्यणिङ्-
तिलक्षणेत्यर्थः। वस्तुतःसप्तम्यन्तनेवास्तुगोतइति तुषष्ठ्यन्तं
णिच्छब्दस्यणिन्निमित्तककार्य्यलक्षणा। एवञ्चसर्व्वनामस्थाने-
परेगोशब्दस्यणिन्निमित्तककार्य्यम्भवतीत्यर्थइतीदंचिन्त्यम्।
नदोषइति। हेचित्रगवित्यत्रनदोषोविहितविशेषणस्य वक्ष्यमा-
णत्वात्। इत्याहुरिति। गामित्यत्रवृद्धिस्तुन। इत्यजन्ताःपु-
ल्लिङ्गाः। रमेतिक्रीडार्थकरमधातोः पचाद्यचिसाधुः। स्वादय-
इति। आवन्तत्वायपूर्व्वान्तवद्भावस्यावश्यकत्वेन ततएवस्वादि
सिद्धिरिति भावः। एतेन वाचेत्यस्यसिद्ध्यर्थंलिङ्गविशिष्ट-
परिभाषासञ्चारस्यावश्यकत्वात् प्रकृतेपि तयैवसिद्धौ पूर्व्वान्त-
वद्भावोद्भावनेचिन्त्यंप्रयोजनमित्यपास्तम्। प्रतिपदोक्तत्वेने-
ति। नाप्राप्तलोपेऽस्यबाधकत्वादित्यर्थः। एतेनलोपेप्यापइति
प्रतिपदोक्तत्वेन तत्वाल्लोपस्येत्यपास्तम्। अनित्यत्वादिति।
भाष्योक्तपरिगणनस्यतुपरिभाषास्वीकारेतात्पर्य्यन्तुपरिगणनेनहिभिक्षुकाः सन्तोति दृष्टान्तेनतथैवलाभात्।
ध्वनितञ्चैदमितोन्यत्राप्रवृत्तिरिति वदतेतोन्यत्रेत्यत्ररुत्वउत्वे-
गुणएङः पदान्तादिति कुर्व्वताभाष्यकारेण। अन्यथाऽकार-
निमित्तकत्वेनोत्वस्य गुणद्वारापूर्वरूपाद्वाराच्च तद्विघातकत्वात्त-
दसङ्गतिः स्पष्टैव। सर्व्वनाम्नःस्या। असम्भवादिति। टुटु-
लोःतुट्वेत्यादौतु तयोरावृत्तिस्तत्सामर्थ्याच्च तत्रोद्देश्यत्वंयुष्म-
द्युपपदइत्यत्रतुतिङ्ग्रहणंतत्स्थानिकलकारेलाक्षणिकम्। आ-
पोहृस्वश्चेति। इदञ्च ह्रस्वपदश्रुत्याऽत्वपरिभाषोपस्थित्वा-

आपइत्याबन्तात्सर्व्वनाम्नः परस्यङितः स्याडुचश्च ह्रस्वःसम्बालोऽन्त्यपरिभाषयाऽन्त्यस्यैव स्यात्तत्फलितार्थकथनमापोह्रस्वइति। एतेनापइत्यस्यावृत्तिपरंलापनञ्चित्यम्। आहुरितिविभक्तौलिङ्गविशिष्टेति निषेधःस्यादेवतस्यानडुहीत्यत्रामनडुहःस्त्रियामिति वार्तिकेनाम् विकल्पेऽभावार्थंविभक्तिनिष्ठनिमित्ततोककार्य्यइत्यर्थआवश्यकइति। अत्रापि तेनैव निषेधः कुतोनस्यादिति चिन्त्यमेतत्। उद्देश्यत्वविधेयत्वप्रतीत्येति। एवञ्चपर्वतो वह्निमानित्यादाविवोद्देश्यस्यविशेष्यत्वेन विधेयस्यप्रकारतास्यादितोदञ्चिन्त्यम्। एवञ्च पूर्वाशब्दस्यपूर्वत्वप्रकारकज्ञानलक्षणयापूर्व्वत्वप्रकारकज्ञानविशेष्यासाप्रसिद्धोत्तरत्येव परमप्राचीनोक्तमुत्तरपूर्वेत्येवयुक्तम्। नविधौपरशब्दार्थः इत्यपिचिन्त्यम्। आयुर्वैघृतमित्यादौ घृतमायुर्जनकमित्यर्थेनविधेयायुः शब्दस्यलक्षणयातस्यदुष्टत्वात्। सिंहोमाणवकइत्यादौ विधेयसिंहशब्दस्यसिंहसदृशेलक्षणायाः स्वयमुक्तेश्च। नियमेति। अत्रह्यक्षरमित्यस्यार्थशब्दस्यविशेषणत्वनोपपत्तौ नियमपरतयाव्याख्यानंक्लिष्टम्। भवत्येवेति। पुनष्टाप्तुनभवतिवहिरङ्गासिद्धत्वात्। उक्तमिति। एवञ्चेन्निर्जरसेनिर्जरसइत्येव भवितव्यमिति भाष्यविरोधात् पूर्व्वविप्रतिषेधेन जरसइत्येवोचितमिति निर्जरशब्दस्थशेखरश्चिन्त्यएवेति। स्वंभ्रूयमाणेति। स्वमादेशइति वक्तुंयुक्तम्। अकाराश्रयमाकारत्वमित्यर्थेपौनरुक्त्यं स्यात्। वक्ष्यमाणरीत्येति। सान्वपरम्परासम्बन्धेन स्थानिनिष्ठधर्म्मस्यनातिदेशइत्येवंरूपा। एवञ्चेद्धात्वन्तयकोस्तु नित्यंसुनयिकात्रनीधातोर्गुणअयादे-

शेधातुत्वं शिवीऽर्च्यइत्यत्वपूर्वरूपम् । आरतुःआरुरित्यादौ वसंयोगाल्लिट्किदिति कित्वन्नस्यात् । मध्येकिंचित्कार्य्याभावेन तद्धर्म्मानतिदेशादितीदमपि चिन्त्यमेवभावश्चेति पाठः । लौकिकमिति । तच्च वाक्यार्थवत्वेसतिसार्थविशिष्टार्थान्तरबोधकत्वरूपंनेतरविशेषणत्वरूपंटापोद्योतकत्वेन सर्व्वत्रोपसर्जनस्यैव सत्वादिदञ्चसमासएव वाक्येतुन तेनसर्वस्मैपुरुषायेत्यादौ नदोषः।त्वासम्भवादिति । तन्मात्रलौकिकोपसर्जनत्वन्तु स्त्रीप्रत्ययान्तघटितत्वाद् बोध्यम् । यद्यप्येतादृशोपसर्जनत्वयत्रोदाहरणेन तत्र तदादिनियमप्रसक्तिः यत्रप्रसक्तिर्नतत्रोपसर्जनत्वं तथापि परिभाषायाअनुपसर्जनस्त्रीप्रत्ययोपस्थापकस्त्रीप्रत्ययेतदादिनियमोनेत्यर्थात् । नन्वस्यस्त्रीत्यर्थेऽशब्दात् ङीषियस्येति चेतिलोपइति तस्यनिरशब्देनसमासएकविभक्तिचेति प्रत्ययमात्रस्यशास्त्रीयोपसर्जनत्वसम्भवइति न च फलाभावो ह्यस्तु स्वमतेस्यादेवोपसर्जनस्त्रीप्रत्ययान्तप्रातिपदिकादिति वाच्यम् । स्त्रीभ्योढगितिनिरिशब्दस्य स्त्रीप्रत्ययान्तत्वेढकिआदिवृद्धिरिति चेन्न । स्त्रीभ्योढगित्यस्यस्त्रीत्वरूपार्थवाचकाद्ढगित्यर्थस्यैव वक्ष्यमाणत्वेन निरिरित्यस्यतत्वाभावात्तदप्राप्तेः वस्तुतस्तु कुम्भकारेयोप्यापद्ये तस्त्रीभ्योढगितिढोऽत्रप्राप्नोतीति भाष्यविरोधाच्चिन्त्यमिदं तत्रशेखरोपि चिन्त्यएवमातृष्वसेयइत्यादितु पृषोदरादित्वाद्वोध्यम्। नतेनेति । तेनस्त्रीप्रत्ययांतेनकिन्तु स्त्रीप्रत्ययष्वतदादिनियमःप्राप्तइति तत्रैवनिषेधउचितइति भावः । वस्तुतःशास्त्रीयोपसर्जनत्वमेव स्त्रीप्रत्ययान्तइति बोध्यम् । तत्र तदादि-

नियमप्रसक्तिस्तु तवानुपसर्जनस्त्रीप्रत्ययोपस्थापकस्त्रीप्रत्ययइ-
वानुपसर्जनस्त्रीप्रत्ययान्तघटकस्त्रीप्रत्ययोपस्थाप्यस्त्रीप्रत्ययांते
बोध्या। अतएव कृत्रिमाकृत्रिमन्यायस्यनबाधः प्रत्याश्रयणञ्च।
अतएवार्द्धन्नपुंसकमित्येकदेशिसमासप्रत्याख्यानपरभाष्येणफ-
लभेदश्च नतत्रार्द्धप्रिष्यलीत्यादौ कर्मधारयाश्रयणेन भाष्यकृ-
ताप्रत्याख्यातं तत्रारम्भेलौकिकोपसर्जनत्वेन ह्रस्वोनप्रत्या-
ख्यानेत्वनुपसर्जनत्वाद्ध्रस्वः स्यादेवेति ममतुपूर्वमिदानीञ्च
शास्त्रीयोपसर्जनत्वाभावाद् ह्रस्वइति। निशायामितिहलन्ता
ट्टापोनभिधानेतु बह्वयञ्चायामित्यादि बोध्यम्। सत्वादिति।
एवन्त्वतिखट्वायेत्यत्रह्रस्वात्पूर्वमाकारसत्वेन कथं तस्यलक्ष-
णिकत्वम्। किञ्चतत्तच्छब्दानुवादेन विहितत्वरूपप्रतिपदोक्त
त्वस्यसत्वेन कथं परिभाषयावारणमिति चिन्त्यमेतत् तस्मा-
दतिखट्वायेत्यत्रयकारमुपजीव्यजायमानोदीर्घो यकारसन्निपा-
तविघातकयाटन्नप्रवर्तयतीति सन्निपातपरिभाषयावारणंबो-
ध्यम्। मानाभावादिति। अत्रयद्वक्तव्यन्तदुक्तं प्राक्। ब्रश्च।
विभ्रागित्येवेत्याहुरिति। एवंचेद् भ्राशोविभ्राडिति भ्राजो-
विभ्रागिति रूपद्वयसिद्धौ भ्राजिग्रहणं व्यर्थंकिञ्चैकानुबन्ध-
कराजिसाहचर्य्यादेकानुबन्धकभ्राजेरेव कुतोनग्रहणं तथाच
फणादेःषत्वन्नस्यादिति साहचर्य्यंचिन्त्यम्। अविचार्य्यइति
तुच्छेदइति तुनसम्यगविचारेयुक्तिस्तुपूर्वोक्तैव। ङितिह्र-
स्वश्चद्वयमिति। अतएवसूत्रेच आद्यइत्यस्यतत्रेत्यादिः।
ह्रस्वयोरप्राप्तइति। न च यूस्त्र्याख्येत्यत्रह्रस्वग्रहणपक्षस्यापि
भाष्यउक्तत्वात्कथमप्राप्तिरिति वाच्यम्। तत्रैवपक्षेशेषपद-

मकृत्वापरत्वात् घिसंज्ञायाबाधइत्यस्याप्युक्तत्वेनादोषात्"। निषेधादिति । न च दीर्घवाक्यइयङ्डितिनिवृत्त्योभयत्रविभाषा त्वमेवकृतोनेति वाच्यम् भावमात्रतात्पर्य्यलाघवानुरोधेना-प्राप्तविभाषात्वस्यैवौचित्यादुभयत्रकल्पनातएककल्पनेलाघ-वस्यवाक्ययोः साम्यस्यचसत्वात् । ह्रस्वांशेति । इष्वाद्युपक्र-मानुरोधादेकदेशावृत्तेरयुक्तत्वात् । भाष्येह्रस्वघटितवाक्ये-स्त्र्याख्यावित्यस्य कण्ठतउक्तत्वाच्चाह । यद्वेतिङ्दाक्षि-प्तेति । इदं प्राचीनवासनयावस्तुतः प्रत्ययग्रहणपरिभाषया-तल्लाभोनेदं प्रत्ययमात्रग्रहणमिति चेन्न वामोति साहच-र्य्येणतन्मात्रग्रहणात् । अतएव हेगौरिशेतेऽयमित्यादौनदी-त्वविकल्पोनात्रङितिह्रस्वश्चेति सूत्रविषये। अन्वाख्यायकइति। अस्त्वेदमपूर्वमिति भावः। अतएवतदाचार्य्यःसुहृदभूत्वान्व-ष्टइत्युक्तम् ह्रस्वोह्रस्वेवर्णाद्यन्तौ शब्दावियङादिस्थानेवर्णा-द्यन्तौचतावित्यर्थः । प्रवृत्तौप्रवृत्तिरर्थान्तरसंक्रान्तिः तस्यांस-त्यामिति केयटोनतुपुंवाचकेति यद्यपीदन्नभाष्यतथापि नपुंस-केनुमाबाधात्फलति। वार्तिकइति। इत्यर्थकवार्तिकव्याख्याना-वसरइत्यर्थः । ङिदाक्षिप्तेति । यतोङिद्धितः तदादित्वा-भावादित्युद्द्योतोक्तेरुक्तएवाशयोऽस्य मुख्योऽर्थान्तरसंक्रमो-ह्रस्यैवेति भावः । दर्शितइति । ह्रस्वेति वार्तिकव्याख्यानभा-ष्यइति भावः । अजानतइति । अन्यथा ह्रस्वावित्यस्यनियमा-र्थतान्नवदेदुभयलिङ्गादौ विध्यर्थत्वसम्भवात् । एकदेशी-त्युक्तहेतोर्गौरवाच्चास्य तत्वमिति भावः । तदन्तस्येति। तेनक-टप्रुवेब्राह्मण्याइत्यत्रननदीत्वं श्रियेब्राह्मण्याइत्यत्रनदीसंज्ञाऽत-

एवप्रकृतौच प्राक्चप्रवृत्तेऽस्त्रीवचनावेवेति भाष्यउक्तमिति भावः । तदलाभादिति । स्त्रीवचनावित्येवभाष्योक्तैरुक्तप्रयोगाणामनभिधानाच्च । अतएवोक्तवार्तिकंचद्वयरहितम् । अपरआह्नेत्यादिनापठित्वोकृन्मेजन्तश्चानिकारोकारप्रकृतिरन्यप्रकृतिरिति वा वक्तव्यमित्यादाविवन्याय्यविचारोनकृतोभाष्यकृताकैयटेनाप्युक्तञ्च शब्दोत्रतन्मतइति पूर्वस्माद्विशेषो नहिप्राक्प्रवृत्तेःकिञ्चिदनिष्टमापद्यते ब्राह्मण्याइति नसिद्धेरदन्तेतदनिवेशेऽत्यशेनयअतिषयेब्राह्मण्याइति नसिद्धेरदयमेव चकारमपठतोवार्तिककारस्यापरस्यनहिप्राक्प्रवृत्तेः किञ्चिदनिष्टमापद्यतइति कैयटस्यचाशयोनित्यस्त्रीवचनस्यस्त्रीवचनत्वाव्यभिचारइति। आद्यवाक्येनित्यस्त्रीत्वनिवेशादेवोपक्रमेनिषेधपरतयाव्याख्यानेनफलभेदः तदुक्तनित्यस्त्रीत्वार्थमजानतएकदेश्युक्तिस्तुसाहसमात्रम् । साधकान्तरभाष्याभावाद् विपरीतस्यापि वक्तुंशक्यत्वाच्च । अतिश्रियअतिभ्रवइत्यनयोस्तदन्तविधिनोपपत्तेश्च । अन्तेतन्निवेशादेवयुइति ह्रस्वयोर्ग्रहणमिति पक्षेह्रस्वश्चेत्यस्यनियमार्थतासिद्धान्तिताऽतएवाकडारसूत्रएतत्सूत्रारम्भसामर्थ्यान्नदीसंज्ञामाश्रित्यशेषग्रहणन्नकर्तव्यमित्युक्तम् । अन्यथागवांपत्न्यैस्त्रियाइत्यादौ चारितार्थ्यात् सामर्थ्योक्तिरसङ्गतैवस्यान् नित्यस्त्रीत्वञ्च वार्तिककृत्सम्मतम् । यत्तुदेवेति । शकटयेधेनवइति स्वरसतोलुबन्तविषयकमपि भाष्यंसुयोजम् । प्रतिषेधपरतयाव्याख्यानस्यैकदेश्युक्तित्वन्तुनैवयुक्तम् । अवयवविषयत्वात् सिद्धमिति चेदियङुवङ्स्थानिप्रतिषेधेयण् स्थानिप्रतिषेधोऽव-

यवस्येयङुवङ्स्थानत्वादिति वार्तिकप्रतिषेधइत्युक्तेरिति दि-
गित्याहुः । ङितिह्रस्वश्चेति । सूत्रस्थव्याख्योत्तरंङिति ह्रस्वश्च
यत्तुवाचिह्रस्वश्चेत्येव सूत्रेणसिद्धेङिति ह्रस्वश्चवामोति सूत्रह-
यंव्यर्थमिति तत्सामर्थ्यात्सन्निपातपरिभाषाया अनित्यत्वज्ञा-
पनार्थमिति तन्न यदागमपरिभाषायाः स्वमतेवर्णग्रहणेपि प्र-
वृत्त्यात्राजादित्वातिदेशादित्यतिदेशेन विघाताभावेपि वस्तुत-
स्तद्विघातसत्वान् नच प्रत्ययग्रहणपरिभाषयातदादेरित्यस्योप-
स्थित्यैङ्ह्रस्वादित्यादाविवाङ्गलाभइति वाच्यम् । नेदंप्रत्य-
यमात्रग्रहणमिति सूत्रान्तरसाहचर्य्यन्तु स्वयमेवान्यत्रखण्ड-
तम् । किञ्चोक्तयुक्त्यातदादेरित्यस्यालाभेप्यत्रसप्तम्यन्तप्र-
त्ययस्याश्रयणेपि न षष्ठ्यन्ततदादिरित्यस्योपस्थितिस्यात्तेन-
च ह्रस्वपदेनसामानाधिकरण्यन्नैव सम्भवतिस्पष्टम् चेदंपरंच-
तत्र पञ्चम्यन्ततेत्यादिनापरिभाषेन्दुशेखरेत्वन्मते वार्तिका-
नुत्थानञ्च किञ्चाङ्गविशेषणत्वेकटप्रुवेब्राह्मण्याइत्यस्यपरित्या-
गः किमर्थंकृतइति शङ्कादुरुद्धराच प्रथमलिङ्गग्रहणंचेत्यस्यख-
रकुट्यायिति वचनंसङ्गच्छते । विभक्तिविपरिणामेति । शब्दा-
धिकारेणयुइति ह्रस्वयोरपिसम्भवात् तयोर्ग्रहणस्यविभक्ति-
विपरिणामेह्रस्वश्चेत्यत्रान्वयः । दिगिति । तिसृचतसृत्यत्र
विभक्तिविपरिणामेनोभयानुवृत्त्यात्रिचतुः स्थानिकयोस्ति-
सृचतसृोरादेशोभवतीत्यनेनऋतइति स्पष्टार्थमितिदिगर्थः ।
एतेनेति पूर्वविप्रतिषेधकरणेनेत्यर्थः । त्रयादेशइति । तवादेशे-
दीर्घेतदसङ्गतिरिति भावः । उत्तरपदत्वाभावादिति । ऋका-
रान्तोत्तरपदकबहुव्रीहावित्यर्थः एतेन बहुमातृकइत्यादितदुदा-

हरणेषु समासान्ताअलौकिकप्रक्रियावाक्येबहुजस्मातृजस्इ-त्यत्रैव प्रवृत्त्यातत्रकारान्तोत्तरपदत्वाभावादित्यपास्तम् । सू-त्रान्तरसामर्थ्येनपूर्वलक्ष्यार्थाङ्गीकारात् । नेयङुवङ्स्थाना। बाधकाविषयइति । इदंच स्वरूपकथनं नत्वपूर्वंयणउवङो-पवादत्वात्तस्यैव प्रवृत्तेः। तयोरिति। अत्रस्थानिनोऽधिकरणत्व-विवक्षयासप्तमी। व्याख्यानादिति। सूत्रारम्भसामर्थ्यादित्यर्थः। ह्रेश्रीरित्यादाविति इयङुवङोःक्वापिस्थित्यभावात्। नदीकार्य्या श्रयेऽङ्गइति । सुधीत्यत्रसुसुधीसुइति स्थितेसमासान्तस्यालौ-किकप्रक्रियावाक्येप्रवृत्त्यातत्रसुबन्तेनदीकार्य्याश्रयेऽङ्गइयङुव-ङोःस्थितिः क्वापिनदृष्टाइति तत्र निषेधाभावेयूस्त्याख्यावि-त्यनेननदीसंज्ञायां कप्स्यात्। किञ्चनैकत्रगृहेकाकदर्शनअन्य त्रगृहेकाकवन्तोदेवदन्तस्यगृहाइति भवतीत्युपलक्षणताप्यश-क्येति चिन्त्यमेतत्। तस्माद्यदर्थकयादृशधर्मावच्छिन्नइयङु-वङोःस्थितिर्दृष्टातदर्थकतद्रूपावच्छिन्नस्येत्यादिशब्दार्थोवक्तुं युक्तइत्यलम्। सीतापहारेति। अत्रकृद्योगेषष्ठीसमासस्यनिषे-धात् सीतायाअपहारेति वक्तुंयुक्तम्। विधिनेति। विधिना-त्वयाहापितःत्याजितः किं कुर्व्वोह्रेसुभ्रूत्वं क्वासीत्येवंसबहु-विललापेति योजनानतुत्याजितः सइतित्वयेत्यस्यानन्वयापत्तेः। भावप्रकाशेतुविधिनात्वयाहापितःत्याजितः सलक्ष्मणः ह्रेसु-भ्रूत्वंक्वासीत्येवं वहुविललापेत्यर्थ इत्युक्तम् । तत्रलक्ष्म-णस्य विलापेकर्तृत्वेननान्वयः रामविलापोऽयमिति स्वपरग्र-न्थविरोधात् किन्त्वयमप्येकोविलापप्रकारइति बोध्यम्। पर-न्तुतच्छब्देनलक्ष्मणपरामर्शोदुर्लभः तस्याप्रकान्तत्वात्। राम-

इत्यस्यैवविलापेकर्तृत्वेनान्वयित्वस्यैव स्वरसतःप्रतीतेश्च पर-
न्त्वयमर्थोनप्रकरणस्यानुगुणोनापि तत्पदव्याख्यायाः तथाहि
षष्ठसर्गएकादशभट्टिपद्यम् । आःकष्टंवतहिचित्रंहूंमातर्दैवता-
निधिक् हापितःक्वासिंहेसुभ्रुवह्वे वं विललापसःशोकेनाक्रान्त
मनाविकल्पंनादआइतिपीडायांवापिवियोगात्पोडितआइत्याह।
स्मद्दियोगमात्रात्पितापाणांस्त्यक्तवानित्याह । कष्टंकृच्छ्रमि-
ति भर्तृमरणादस्मद्दियोगाच्च मातुःकावस्थेत्यभिप्रायेणाह ।
वतेतिवतशब्दःखेदेसौमित्रिरपि सीतयाशयितइति विस्मितः
होत्याह । हिविस्मयेयदिनाममूढतयापि शयितःसीतयात-
थापि सौमित्रिणाविदुषासतापि कथ तादृशशापोदत्तइत्य-
भिप्रायेणाहचित्रमिति । चित्रमाश्चर्यंयदेवं विधमनर्थज्ञात-
न्तत् कैकयीप्रभवमिति क्रुध्यन्हूंमातइत्याह। हूंशब्दःक्रोध-
अथवा सर्व्वमेवेदं दैवदत्तविचेष्टितमिति न च तेषुमयानुचि-
तमित्यभिप्रायेणधिग् दैवतानीत्याह । धिक् कुत्सायांप्राणां-
स्त्यक्तवन्तमपि पितरंनपुनरहंद्रक्ष्यामीत्यभिप्रायेणाह । हा-
पितःकद्रष्टव्योऽसिहाशोकेहेसुभ्रु सीतेक्वासोत्यादितद्व्याख्या-
नञ्चेति बोध्यम् । समुदायस्यचेति । इदञ्चपदान्तरम्विना-
पि स्त्रियाम्वर्त्तमानत्वंनित्यस्त्रीत्वमिति वृत्तिकारमतमनुसृ-
त्योक्तम् । कैयटमतेतुशोभनेभ्रुर्वौयस्याइति बहुव्रीहिःशोभ-
नंभ्रमतीतितत्पुरुषस्यवानित्यस्त्रीत्वाभावान्नदीत्वप्राप्तिरवने-
ति बोध्यम् । भावप्रकाशेतुजयमङ्गलादौ भ्रुशब्दादप्राणिजा
तेश्चेत्यूङितदन्तेन समासउपसर्जनह्रस्वेकृतेपि स्वभावान्मनु-
ष्यजातिवचनत्वेन पुनरूङुतइत्यूङिपूर्व्वान्तत्वेन प्रातिपदिक-

त्वेसतिसम्बुद्धौ ह्रस्वत्वम् । ऊङभावेतुदीर्घत्वमित्युक्तम् । ऊङ्चगमादीनामिति व्युत्पादितस्यक्रियाशब्दत्वाज्जातिवाचकत्वाभावे नोङ्सम्भवत्यव्युत्पन्नस्योङ्प्रत्ययान्तस्यवा शुद्धरूढस्य प्राण्यङ्गवाचकस्यतुजातिवाचकत्वादूङ्भवति । तथाच धातुत्वाभावादुवङभावेसवर्णदीर्घेभ्रू इति भ्रू ग्रहणेनतुनोवङ्तत्रधातुसाहचर्य्येणतस्यापि धातुसंज्ञकस्यैवग्रहणात् । अतएव कैयटेतत्प्रत्याख्यातं कपुतुनसमासान्तविधेरनित्यत्वात् । क्विबन्तप्राण्यङ्गयोगरूढिस्वीकारादमरेभ्रुवौस्त्रियामिति प्राण्यङ्गकबप्युपपन्नः तत्राप्यूङ्तुनाजातिपर्य्युदासेन शुद्धरूढेभ्यएवतदुत्पत्तेरिति ॥ इत्यजन्ताःस्त्रीलिङ्गाः ॥ अद्ड्डतरादिभ्यइति । एतद्भाष्यप्रवृत्तेरिति । एवञ्चेद्यत्रारम्भप्रत्याख्यानयोः फलभेदेसूत्रानभिधानं किमर्थंक्रियतेफलान्तरसूचनायैवतद्भाष्यप्रवृत्तेरित्यस्यवक्तुंशक्यत्वात् । वस्तुतः कर्तार्धर्तेत्यादौ सुनिमित्तानङिसन्निपातपरिभाषाविरोधात् सुलोपोनस्यादिति तदर्थंविभक्तित्वेपि तदनित्यत्वंज्ञापनीयमेवात्रापि विभक्तिलोपेतदनित्यत्वान्नदोषइति चिन्त्यमेतत् । विहितविशेषणेति। यदितुप्राचीनमतेषडर्थगतसंख्याभिधायित्वरूपम्बिहितत्वमित्युच्यते तदातेषामपिविरोधः। सान्तमहतः।संयोगविशेषणमिति । नन्वेवंहंसावित्यत्रैकादेशेजातेहंस्इति सान्तसंयोगस्यसर्वनामस्थानौपरकत्वाद्दीर्घः स्यादन्तवत्वेनाकारान्तत्वन्तुनतादद्रूप्यानतिदेशात् । सर्वनामस्थानपरकं सान्तसंयोगान्तंयदङ्गमित्यर्थेन सान्तत्वाभावान्नभवतीति यद्वाऽन्त्यसदेशस्येति नदोषइति । ननु परिभाषेन्दुशेखरइयञ्चोभयो-

र्युगपत्प्राप्तावेवेत्युक्तम्। अत्रतुनोभयोर्युगपत्प्राप्तिरिति चेन्न यस्यकस्यचिल्लक्ष्येयुगपत्प्राप्तिरस्तितस्यैकस्याप्राप्तावपि भवतीत्यर्थाच्छिरांसीत्यत्रोभयोः प्राप्तिरस्तिहंसशिरांसीत्यत्रान्यस्यैवेतिनदोषः। ह्रस्वोनपुंसके। अजन्तस्यति। ननु वारिणीत्यत्रह्रस्वःस्यात्तद्धारणायप्रातिपदिकग्रहणमिति वाच्यम्। ह्रस्वशौकर्तव्येदीर्घकरणवैयर्थ्येन ह्रस्वाभावज्ञापनात्। ननु ह्रस्वान्तेशिसर्व्वनामस्थानमित्यनेन सर्व्वनामस्थानसंज्ञायांज्ञानइत्यत्रनपुंसकस्यतिनुम् स्यादिति चेन्न। सुडनपुंसकस्येति सूत्रेऽनपुंसकग्रहणंनकर्तव्यं सर्व्वनामस्थानमिति नित्यमार्थंनपुंसकात्परंश्येतदेवसर्व्वनामस्थानसंज्ञम्भवति नान्यदितिनियमेनसिद्धावनपुंसकग्रहणसामर्थ्येनजस्शस्सम्बन्धिशेरेवग्रहणमिति ज्ञापनेनादोषात्। सत्वप्रधानेति। अन्तवद्भावात्प्राप्तसत्वप्रधानेत्यर्थः। तेनकाण्डइत्यत्रपूर्व्वान्तवत्वेन सत्वप्रधानत्वान्नदोषः। तदवस्थैवेति शङ्कानात्रह्रस्वइति ननुकाण्डइत्यत्रपर्जन्यवल्लक्षणप्रवृत्त्यापूर्व्वह्रस्वेततएकादेशेलक्ष्येलक्षणस्येति न्यायेननपुनर्ह्रस्वप्राप्तिरेवेति चेन्न। भाष्यप्रामाण्येननपुंसकवटकवर्णैकादेशभिन्नेलक्ष्येलक्षणस्य [illegible] प्रवृत्तेरित्यर्थादतएवज्ञानेभ्यइत्यत्रनदोषः। अन्यथा नपुंसकाजन्तप्रातिपदिकत्वाद्ध्रस्वः स्यात्। वहिरङ्गपरिभाषयावारणम्वा। एवञ्चादसोसेर्दादुदोमइत्यत्रत्यशेखरोपि चिन्त्यएवेति बोध्यम्। स्थानिवत्सूत्रस्थभाष्यविरोधोपि न तत्रलक्षणान्तरेणपुनःप्राप्तेः। प्राधान्यमिति। तत्वंचात्रः कारतानाश्रयत्वं समानानुपूर्वीकइति। अन्यथाघनरसेऽस्वत्वंप्रवृत्तिनिमित्तमादायमानु-

क्तइत्यस्मुशब्देपुंस्त्वापत्तिः।नन्वेवमप्यर्थभेदेपि शब्दैक्यमिति दर्शनेसत्वौंयंप्रयासःसफलःतत्रचदर्शनेफलवाचकशब्देऽस्तीति पुंस्त्वंदुर्व्वारमत आह । समानार्थश्चेति । त्रकारबोधेच्छयोच्चरितइत्यर्थः।एवञ्च यत्रतत्रकारकबोधेच्छयोच्चार्य्यते तदासपुंवदिति सूत्रार्थइति भावः । इत्यलं विस्तरेण पुंसकलिङ्गाः। दादेर्द्धातोर्घः।फलान्तराभावेति।अत्रकेचिद् दादेरित्यत्रकर्म्मधार्य्यो धातोरित्यविवक्षषष्ठीधातोरवयवोयआदिर्दकारः सापञ्चमीतस्मात्परस्यघःस्यादिति वाक्यार्थोधुगित्यत्रदात्पराव्यवहितहकारासम्भवेन येननाव्यवधानन्यायेनैकव्यवायेपिघत्वम् दामलिडित्यत्रबहूनांव्यवायसत्वान्नभवति। एवमधोगित्यत्रापि नदोषइति वोध्यम् । त्वन्मतेऽधोगित्यत्रघत्वायदादेरित्यस्यावश्यकत्वात्। तत्फलान्तरंस्फुटम् । एवञ्च दादेरित्यावृत्तिर्ल्लक्षणाचनकर्त्तव्याभवति त्वन्मतेधातोरितिव्यर्थंच कथमधोगितिशङ्काचस्वरसात्सङ्गच्छतेभाष्येतूपलक्षणमेवेत्याहुः । एकाचो।वक्तुंयुक्तमिति । भष्प्रत्याहारोपि झषस्तथोरित्यत्रैव कृतोऽतोभष्कर्त्तव्यउज्झितेत्यादिक्तान्तधातवःसेट्काएवेति । भष्प्रत्याहारएवास्तु किं झष्प्रत्याहारेणेति चिन्त्यमेतत्।अशक्तीति।शक्त्यभावेतिवक्तुंयुक्तम् । फलाभावइति । झलाद्योःस्ध्वोरित्यन्वयेन विशेषणत्वेनान्वयसम्भवेपि तयोर्झलाद्योरेवसम्भवेनानुवृत्तौ फलाभावइति भावः । एतेन झलाञ्झशोऽन्तइत्यत्रान्तपदेनैव तन्निवृत्तौस्ध्वोर्ग्रहणंव्यर्थमेवेत्यपास्तम् । ननु झलोझलीत्यत्रझल्पदं झलादिप्रत्ययपरमित्युक्तम् तत्कथमुच्यतेझलाद्योः स्ध्वोरितिस्ध्वइत्यनयोः प्रत्ययत्वाभावादिति

वाच्यम्। झलादेस्यप्रत्ययावयवझलादेरत्वस्य वक्तुं शक्यत्वेनाऽन्त्यत्वसम्भवात्। तद्दाडिति। आदिनाद्विट्। तेन तुल्यमिति। नन्वेवमलोन्त्यपरिभाषयाऽन्त्यस्य स्यात्। तत्रजातेपि तस्मिंश्चर्त्वेन नदोषः। नन्वस्यभष्भावेधकारादिरेव स्यादिति चेन्न। धस्यविधानंव्यर्थम् तत्सामर्थ्याच्चर्त्वन्नेति चेन्न। एवमपिदामलिडित्यत्रढत्वेभष्भावेजातएकाज्ग्रहणसामर्थ्येनालोन्त्यपरिभाषाबाधेतकाररूपस्य स्यादिति बोध्यमिति। नन्वन्तस्याभावेऽचोपि स्यादिति चेन्न। वस्तुतोझलाञ्झशीत्यतोझलामित्यनुवर्त्यव्याख्येयमिति पूर्व्वककारस्यापि स्यादिति बोध्यम्। स्पष्टैवेति। अप्रशानितिनिर्देशस्तुपदान्तेपि पदान्तप्रयोजकप्रत्ययइत्यर्थः। इग्यणः। हलइति। दीर्घापत्तेरिति। यदिहलइत्यस्याङ्गपदस्यसम्प्रसारणपदेप्रत्यासत्त्यासंप्रसारणनिमित्तप्रत्ययनिमित्ताङ्गेत्यर्थेनदोषइत्युच्यते तदात्रनदोषइति बोध्यम्। अदोषइति ननूयतुरित्यत्रवेओवयादेशेद्वित्वसंप्रसारणयोः वयादेशयकारस्यसंप्रसारणे प्राप्तेपश्चात्परस्यवकारेकृतेतस्यसंप्रसारणन्तुनवश्चास्येत्येव वादेशविधानसामर्थ्यात्संप्रसारणन्नभवति। तत्रोकारेसंप्रसारणसंज्ञायां पररूपार्थमेववादेशविधानं स्यात्। ममतुपूर्व्वसूत्रात्संप्रसारणपदानुवृत्त्यापररूपस्यापिवकारविधानसामर्थ्याभावादिति सुधियः। किमःकः। इमइत्येवकर्त्तव्यम्। त्यदादेरित्यनुवर्त्तते तेनेमन्तत्यदादेश्चादेशइत्यर्थात्कुतिहोः क्वातीत्यत्राप्येवमेवेति ककारोच्चारणसामर्थ्यात्त्यदाद्यत्वविषयइत्युक्तावपि दोषः स्यादेवात आह। तन्मध्येति नत्रेमोनिर्दिश्यमानत्वात्तस्यैव स्यादिति वाच्यम्। इव-

र्णान्तोवर्णान्तधातोर्यथानिर्द्दिश्यमानत्वन्तथात्रापीमन्तत्यदादेरेवनिर्द्दिश्यमानत्वात्। अनाप्यकः। विभक्ताविति। अत्रविभक्ताविति चिन्त्यप्रयोजनम्। हलिलोपः सौतुतक्रकौण्डिन्यन्यायेनायंलोपबाधकः स्यादेवेति बोध्यम्। वक्तुंयुक्तमिति। ननु लोपकरणेस्वरितोनभवति। अश्करणेत्वशःसंपूर्णस्थानिकत्वात्स्वरितः प्रसज्येतेति चेन्न। अशोनिपातानुदात्तकरणेनादोषात् आहुरिति। अत्रारुचिस्तूपसर्ज्जनत्वात्पूर्वमेवाकचोऽप्रवृत्तौ प्रतिबन्धकत्वाभावइति तदनन्तरंगौणत्वेपि प्रवर्त्ततएवेति बोध्यम्। आद्यन्तवदे। एतल्लब्धमेवव्यपदेशिवदेकस्मिन्निति बोध्यम्। बाधकाबाधितेति। ननु कृताकृतप्रसङ्गमात्रेणैवनित्यत्वमस्तुमास्तुचेदम्। अस्मायित्यत्रस्मैपुनःप्रसङ्गविज्ञानात्स्यादिति चेन्न। इदमएइति स्थितेत्यदाद्यत्वापेक्षयानित्यत्वादनादेशापत्तेः। वस्तुतस्त्वन्तरङ्गत्वादुपजनिष्यमाणेति न्यायान्नादेशः नास्त्येवेदंफलमिति बोद्धव्यम्। अन्यार्थतापत्तेरिति। सामर्थ्यादकारस्यैव स्यादिति तदर्थमेवकुतोनतत् स्यादिति भावः। पर्य्युदासेति। प्रसज्यप्रतिषेधेतुशास्त्रीयत्वात्प्रसज्यलक्षणेननिषेधः स्यादिति भावः। जञोर्ज्ञः। ध्वनेरिति। ध्वन्यनुवादकत्वंशब्दस्य वाधितमत आह। लिपीति। नलोपःसुप्। सर्व्वविभक्त्यन्तइति। सम्बन्धस्यसामान्यषष्ठ्यासमासोबकर्तुमुचितः। कर्म्मसाधनइति। एवञ्च विधिशब्दस्यावृत्तिरिति यदितु सुप्शब्दस्य सुप्सदृशेलक्षणा तदातुनविधिशब्दस्यावृत्तिरिति बोध्यम्। भक्ष्यनियमइति। अत्रशास्त्रेनियमस्यसामान्यशास्त्रबाधकत्वमिति वचनस्यव-

चनेनबाधइति नियमत्वंयुक्तम् । पञ्चपञ्चनखेत्यस्यतुनै तत्रसर्व्वमांसभक्षणस्यरागतः प्राप्तत्वेनबाध्यवचनाभावात् भाष्यन्त्वितरमांसभक्षणनिषेधेतात्पर्य्यकम् । किञ्चयथाचा-च्येप्रातिपदिकसंज्ञायांसाधुत्वंस्यात् । एवञ्च पञ्चनखभक्ष-णाभावेप्रत्यवायः स्यात् भवतितुनेतिवैलक्षण्यसत्वाच्चिन्त्यमे-तत् । तद्व्याप्येति । सचभिस्त्वादिः यदितु पूर्व्वत्रासिद्धमित्य-तोनलोपःसुप्स्वरेतिसूत्रेपूर्वत्रेत्यनुवर्त्यपूर्वेष्वेषु विधिष्वित्युच्य-तेतदेदंव्यर्थंषत्वस्यसपादिस्थत्वाभावात् । वैरूप्यापत्तेश्चेति सा-चस्वरविधौ विधित्वमितरेषु नियमत्वमित्येवंरूपेविभिन्नशब्द-एकत्रकर्म्मसाधनत्वमिति वैरूप्यस्यत्वन्मतेपि सत्वाच्चिन्त्य-मेतत् तस्मात्पूर्वत्रेत्यत्राप्यनुवृत्तिरेव ज्यायसीति बोध्यम् । न दोषइति । ननु संज्ञाग्रहणंमास्त्वयमर्थश्चनकर्तव्योनियमश्च स्यादेवेति चेन्न । ग्रामणिपुत्रोवित्यत्रद्वन्द्वे ग्रामणिशब्दस्य पूर्वनिपातोत्तरह्रस्वप्राप्त्यापूर्वघित्वाभावात्पूर्वनिपातोनस्यात् । ब्रह्मवाचककशब्देनदिव्शब्दस्यसमासेद्यु कावित्यत्रपूर्व्वनिपा-तेसतिसन्धित्वं प्राप्नोतिनोत्तरप्रयोगइति तदर्थमेवैतादृशसूत्रा र्थाश्रयणस्यावश्यकत्वात् तत्रोतरपदेप्रत्ययलक्षणंनोत्तरपदत्वे-चेतिनिषेधात् तन्निपातोत्तरन्तुनतन्निषेधप्राप्तिरुत्तरपदस्य-कार्य्यित्वएवतन्निषेधप्राप्तेरितिवदन्ति नन्वेवमपिहरिहरावि-त्यत्रपूर्व्वमेव घित्वप्रवृत्त्यादोषः न च तदुत्तरमपि तत्प्रवृत्त्या-नदोषइति वाच्यम् । यदेशएवघटोवर्त्ततेतदेशएवघटोभवती-ति प्रतीत्यापत्तेरिति चेन्न । द्वन्द्वे घीत्यस्यावृत्त्यर्थंहयाङ्गी-कारात् । हलिच । रेफान्तधातोरुदाहरणानि । सूर्य्यातोःकि-

पिसूङ्करोतीत्यादीनि । ज्ञातोः किमग्निःकरोतीति । नन्विदुदुपधस्येतिव्यर्थःस्यादिति तदवयवाङ्गत्वेन तत्प्रवृत्तिरिति चेन्न । हरिर्व्वणतीत्यादौ हलिचेतिदीर्घापत्तेः । नसंयोगात् । अत्रनहल्लोवधादित्येवसूत्रयितुमुचितं हलःपरौयौवमौततः परस्यानोकारस्येत्यादिसूत्रार्थः नन्वेवं पटमनइत्यत्रपटशब्दाण्णिचितोमनिन्प्रत्ययेणिचिटिलोपेतस्य पञ्चमीसमासेनस्थानिवत्वेन हल्परत्वाभावाल्लोपःस्यात्संयोगग्रहणेन संयोगसंज्ञाया-द्विस्वारभ्यस्यैवनसविधिरिति नस्थानिवद्भावइति चेन्न । तस्यानित्यत्वात् । इन्हन्पूषार्य्यम्णाम् । स्येतिदीर्घइति । एतेननोपधायाइति सूत्रस्थोपधाग्रहणस्येदमेव फलमिति सूचितं यदित्वनन्तरस्येति न्यायोबाध्यसामान्यचिन्तेति चाश्रीयतेतदात्वसन्तस्येति सूत्रउपधाग्रहणानुवृत्तयेगोमानित्यत्रनुम् दीर्घयोः प्राप्तावुभयोरेकविषयत्वेन दीर्घस्यनुमपवादत्वंस्यादिति गोमानित्यत्रनुम् नैवस्यात् । उपधादीर्घो नुम्तूगिद्भिन्नोद्वेश्यत्वान्नेति । वृत्रहयतीति । नन्वत्राकारः स्यादुपधायावृद्धिः स्यादिति चेन्न । अत्रउपधायाइत्यत्रोपधाशब्देन पूर्व्वपदाघटकस्यैवग्रहणात् । अतएव वृक्षवयतीत्यत्रवृक्षोत्तराकारस्य वृद्धिर्नस्थानिवत्वन्ननपदान्तेतिनिषेधात् अतएवजागच्छब्दाण्णिचिजागयतीत्यत्रवृद्धिः । अन्यथातुल्यत्वाद्वृद्धिर्नस्यात् । यायंनियमइत्यादि । ननु हल्ङ्यादिसूत्रेणत्वसिद्धिरेव तत्फलमिति विधित्वसम्भवमितिकथम् नियमत्वमिति वाच्यंरषाभ्यामित्यनुवृत्त्यारेफषकाराभ्यांपरस्येति सूत्रार्थाश्रयणेननियमं साधयितुमुचितत्वाद् वस्तुतोऽत्पूर्व्वस्येति पर्यभा-

षाहन्तेर्णत्वमात्रमस्यालिङ्गम् । एवञ्च येनवाक्येनहन्तेर्णत्व न्तत्रपूर्व्वस्येत्युपतिष्ठतइत्यनियमेनियमकारिण्त्वाभिप्रायेण- नियमइत्युक्तम् । हस्थानिकेति । अत्पूर्व्वस्येत्यस्यभाष्येप्र- त्याख्यानेतुह स्थानिकवर्गाभाववद्धन्तेरुपलक्षणत्वाद्धादेशेषु प्रतिषेधोवक्तव्यइत्यस्याप्यत्रैवतात्पर्य्यम् । प्रघनाघनइति । नन्वभ्यासस्यनैरर्थक्यादर्थवद्धन्तित्वाभावान्नणत्वं परस्यत्व- भ्यासव्यवायान्नेति चेन्नहन्तेरित्यस्यार्थवद्धन्तिसम्बन्धइत्यर्थ- नणत्वापत्तेरित्याशयात् अतएव प्रणिहिनादौनणत्वमुभौसा- भ्यासस्येतिचात्रलिङ्गम् । नकर्तव्यमिति । तत्तुप्रत्याख्यानप- क्षे प्राचान्तुनदोषः तत्पक्षेतन्मतेवचनेनैवनिर्व्वाहात् । हा- देशइति चेदंवार्तिककृतासूत्रस्य प्रतीकंगृहीतंकुव्यवायइत्या- दिणत्वविधायकशास्त्रेषु णत्वस्यप्रतिषेधइत्यर्थः । तेनटीको- क्तानुक्तिशङ्काप्रत्युक्ता । मघवाबहुलं । लोकेऽसाधुत्वमिति । इदंचिन्त्यम् । मघवन्शब्दस्यत्रन्तादेशस्यासाधुत्वबोधनेनोप- पत्तौविशिष्टस्यासाधुत्वबोधनेमानाभावात् । अतएवेन्द्रोमरु- त्वान्मघवाइत्यादयोलोकेप्रयोगावहवोदृश्यन्तअतएववार्तिके- तदित्येकवचनप्रयोगः सङ्गच्छतेऽन्यथैताविति वक्तुमुचितं- स्यात् । आभीयान्तरङ्गइति । नचाभीयान्तरङ्गस्यासिद्धत्वेपि पररूपस्याभावेनान्तरङ्गपरिभाषाप्रवृत्तिः स्यादिति। एवञ्चस- म्प्रसारणस्यासिद्धत्वेपि पररूपस्यासिद्धत्वाभावाद्यस्येतिलोप- इति वाच्यं संप्रसारणाश्रयपूर्वरूपेतन्निष्ठधर्म्मस्यातिदेशात् । अतएवान्तरङ्गपरिभाषाज्ञापनपरभाष्यंसङ्गच्छते । अन्यथाव- हिरङ्गसंप्रसारणस्यासिद्धत्वेपि पररूपस्यासिद्धत्वाभावाल्लघूप-

धगुणेविश्वौह इति सिद्धौचारितार्थ्याभावेनासङ्गतत्वं स्पष्टमेव वस्तुतोऽसिद्धवदत्राभादित्यत्रजातासिद्धत्वमेवातएवभाधिकारेपरत्वादिनाबाध्यबाधकभावोभवत्यतएवचनवीनाअन्यथा तेनेदं बाध्यमुतानेनेति विनिगमनाविरहः स्यादिति प्रकृतेत्वद्भावादन्तरङ्गपरिभाषाप्रवृत्तिः स्यादिति चिन्त्यमेतत् । नार्थइति ननु स्थानिबद्भावेनानूत्वाभावेप्यन्नन्तत्वंस्यादेवसुबन्तत्वमिति चेन्न । अल्लोपोऽनइत्यत्रामोनिर्दिश्यमानस्यैवसत्वेनास्यैवात्रानुवृत्त्यात्राप्यनोनिर्दिश्यमानस्यैवग्रहणात् । अर्थाधिकारानुरोधाद् यद्वावैयधिकरण्येनैषामनइत्यर्थोऽत्रसचनिर्दिश्यमानएवतस्यावृत्त्यातदन्तविधिरत्रान्तस्येत्यादिरिति नदोषः । किन्प्रत्ययस्यकुः । घइतीति । यदिघस्यान्तरतम्याद्धकारः फलमपेक्षतइति तर्ह्यत्रापि न्यासेगइत्येवोचितम् । अस्यासिद्धत्वेनजश्त्वाप्रवृत्तेः प्रक्रियालाघवाच्च । तथापि कैयटानुरोधेनघउक्तस्तदाशयस्तुविवरणेद्रष्टव्यो नच यथा कथं चिद्घकारस्यवकारान्तरतमत्वोपपादनेपिनशेर्वेत्यत्रशकारषत्वजश्त्वाभ्यामुकारउकारान्तरतमत्वन्दुर्वचमेवेतिकथमुच्यते नशेर्वेत्यत्रघानुवृत्तावप्यदोषादिति वाच्यम् । गृहंगन्तुम्प्रवृत्तस्यकपाटंपर्य्याटयाग्रइति न्यायेनतेनतस्यतद्वदेवसुवचतरत्वात् । यद्वाझषस्तथोरित्यतः प्राक् किनोघोन्तेनशेर्व्वाझलाञ्झश इति न्यासेनजश्त्वसुलभेफलभेदाभावः । नचैवमपि प्रक्रियालाघवायगेविधेयेघविधानस्यकोऽभिप्रायइति चेच्छ्णुदादेरित्यतस्तदनुवृत्तिसम्भवेन विधेयानुपादानेलाघवमिति । तथाचैवंन्यसनीयम् । चोःकुरित्यस्यानन्तरंनहोधः आह स्थोत्रश्चभ्रस्जहोढः

दादेर्धातोर्वाद्रुहः किनोन्तेनशेर्वाएकाचोवशोदधस्तथोःझलाञ्झशिति । ननु ससुट्कमेवैवन्तुनयुष्मदस्मदोरनादेशइत्यनादेशपदं योचीत्यत्रैवक्रियतइति तुनोक्तेरूपस्यसौलभ्यादिति चेन्न । युष्मयतेर्युष्माकमित्यत्राकारश्रवणार्थन्तदावश्यकत्वात् । अभिधानस्योक्तत्वात् । न च पञ्चमीसमासेनस्थानिवत्वेनाश्रेष्ठव्यएवाभ्यम्भ्यमोःफलभेदापत्तिरिति वाच्यम् । पञ्चमीसमासस्यानित्यत्वेन तत्राश्रयणेनफलभेदाभावेप्यत्राश्रयणेमानाभावात् । एवं दोषःसुष्ठावेति बोध्यम् । किञ्चयुष्मदस्मदोरित्यस्यापि च चारितार्थ्येऽनादेशेचि । हलिचोभयत्रापि यत्वापत्तिरिति तत्राचीतिनकर्त्तव्यंस्यादत्राप्यनादेशस्त्वेतुपरिशेषलब्धमेव तद्भवतीति नकार्य्यमितीदानींगौरवापत्तिः । एवञ्चेदंसम्यगेवेति बोध्यम् । किञ्चयोचीत्यत्राप्यनादेशइति मास्तुद्विर्तोयायाञ्चेत्यात्वविधानाज्ज्ञापकादादेशेऽचितदभावादितीदन्तुपुनश्चिन्त्यमाकमित्येवटिलोपेन सुटोऽप्राप्तेः ससुट्कनिर्देशोव्यर्थः । व्याख्यातमिति । शेषग्रहणस्य पूर्व्वकर्त्तव्यतायाउक्तत्वाच्छेषग्रहणमनुवृत्त्यैव भाष्योक्तरीत्यास्वादिविषयेत्वमादेशवारणस्यौचित्येनविप्रतिषेधकल्पनं भाष्यानुक्तं मूलकृताप्युक्तम् । एवं शेषग्रहणस्यस्वमतेस्पष्टार्थोक्त्यातदनुमानस्याशक्यत्वात् । पूर्व्वविप्रतिषेधाश्रयणभेदेनापि नतदप्यसङ्गतमेतदर्थंशेषग्रहणस्यावश्यकत्वाच्चेति चिन्त्यमेतत् । विग्रहइति । न च विग्रहरूपाणामभावइतीदमयुक्तमिति विग्रहोयस्येति बहुव्रीहिणासमस्योपेक्षणीयत्वात् । पदस्यान्तइति । नन्वन्तग्रहणंमुख्यार्थलाभार्थं तेनान्तइत्यत्रन-

दोषः तत्रान्तत्वस्यनिर्दिष्टत्वादिति चेन्न । उक्तार्थज्ञापने-मानाभावाद्नपूर्व्वमित्यादावनुदात्तमित्यस्यानधिकारात् । श्रु-तप्रथमेति । वस्तुतःपरस्येत्यस्यानुपदमेव व्यधिकरणत्वोक्ते र्विपरिणामकथनमयुक्तम् । न च तृज्वत्क्रोष्टुरिति वन्नाभिन-भऋचेतिवच्चस्थान्यादेशभावकल्पनस्यौचित्यात्तिङन्तस्यानुदा-त्तत्वाच्चादेशोभवतीत्यर्थादुदात्तसाम्येनाद्युदात्तएकानुदात्तत्वो-भयविशिष्टादेशापत्तिः पचतीत्याद्यनुदात्तत्वैकोदात्तविशिष्टोवा-स्यादतः सर्व्वग्रहणेसर्व्वानुदात्तइति कर्त्तव्यमेवेति चेन्न । ति-ङितिभाष्योक्तज्ञापकात्तत्रतत्रान्तग्रहणाच्चात्रतिङ्गतावयवस्य ल क्षणीयतिङित्यवयवश्चानुदात्तत्वकइत्यर्थेविनिगमनाविरहेण-सर्व्वथावयवस्यसिद्धेवैयर्थ्यमित्याशयाद् न च तिङ्गतावयवस्ये-तिस्थानषष्ठीत्वादादेः परस्येत्यापत्तिरेकैकावयवस्थानेनानुदा-त्तत्वविधानादादित्वस्य वक्तुमशक्यत्वात् । आदित्वस्य-समुदायविधानएवसत्वात् । यदितत्रतत्रान्तग्रहणाल्लाघवात्ति-ङ्समुदायस्यैव षष्ठीङ्कल्पयित्वाविधानमित्युच्यते तदात्वादेरि-ति प्रवर्ततएवेति सर्वमिति कर्तव्यमेवेति चिन्त्यमेतत् । मे-स्वमिति । न च तद्ग्रामेकंवलोमेस्वमितिच्छान्दसत्वस्यैवोदा हरणंनवाक्यस्येत्यस्तुपर्युदासइति वाच्यम् । शालीनान्त-इत्यत्रच्छान्दसत्वस्यवक्तुमशक्यत्वात् । अन्येत्विति । ननु-त्वमित्यस्यापि सम्बोधनेवर्तमानत्वेप्रथमैव स्यादिति त्वामि-त्याद्यसङ्गतमिति चेन्न । अत्रसम्बोध्यत्वेनज्ञानवत्पदार्थयुष्मद र्थः । अतएव चेतनेऽस्यप्रयोगोऽहमनेनसम्बोधितइत्यचेत-नस्यज्ञानवत्वाभावात् । एवञ्च सम्बोध्यत्वप्रकारकज्ञानवद-

र्थैकत्वेपि नसंबोधनार्थकत्वमित्यदोषात् । नचैवमपिभवच्छब्दस्यसम्बोधनार्थकत्वाभावाद्भवन्तमित्याद्यसङ्गतम् प्रथमायाएवापत्तेरिति वाच्यम् । चेतनाचेतनसाधारणतयासम्बोध्यत्वमात्रार्थकत्वेपि प्रवर्तनाविषयसम्बोध्यत्वाभावादत्रप्रवर्तनाविषयसम्बोधनस्यैव ग्रहणाद् हेभवन्नित्युक्तेहितस्य प्रवर्तनाविषयकज्ञानम्भवतिमयायत् किञ्चित्कारयतीति भवानित्युक्तेतुममद्यक्रियान्वयिसम्बोधने प्रथमात्वाम्भवन्तमित्यत्रतक्रियान्वयित्वाभावेनादोषः परन्तुगदाधरेण क्रियान्वयित्वमस्योक्तम् । वस्तुतएतादृशक्लिष्टकल्पनापेक्षयास्वेति पदस्यस्वरसतः सार्थक्यायचपूर्वोक्तमेव युक्तमिति प्रतिभाति । आमन्त्रितम् । वत्करणमिति । नच तदभावेऽस्यादर्शनापत्तिः नच लोपएवकार्येऽविद्यमानग्रहणेनाविद्यमानवदित्यर्थः । लोपषष्ठ्याआपत्त्याऽलोन्त्यस्येत्यस्यापत्तेः सर्वादेशार्थमावश्यकमेवेदमिति वाच्यं सर्वथालोपेतदर्थबोधेनैव स्यादिति तद्बोधार्थंपरंप्रयोगस्तुस्यादितीदंपूर्वप्रयोगाभावमात्रफलकंस्यात्तथाच राजदन्तादिषुपरमित्युक्तमामन्त्रितमित्येवपरप्रयोगात् सिद्धेरिदंव्यर्थमेव स्यादितिवत् करणार्थःप्रतिपद्यतइति अयंवतिर्व्यर्थएव न च शिष्यमाणंलुप्यमानेति न्यायेनसिद्धेपरप्रयोगाणामनावश्यकसजातीयविषयेतत्प्रवृत्तेः । ननुव्यासइत्यत्रपूर्वलोपेविजातीयेनाप्यर्थबोधइति प्रकृतेपि तथैवस्यादिति सर्वलोपार्थमावश्यकमिति चेन्न लोपपरइत्येवसिद्धेसामर्थ्यादित्यर्थसिद्धेः नचैवं त्रिपाद्यांप्रवृत्तयेवतिघटितत्वमिति वाच्यम् । तथासतिसन्नित्यस्याविद्यमानत्वेन तत्रङमुपनस्यादित्यमि-

ष्टमेवापद्येतेति तदप्रवृत्तेरिष्टापत्तेः। नचैवंवत् करणमूलोक्तरीत्याब्लिपाद्यांप्रवृत्तिः स्यादिति पूर्वंडमुडनापत्तिस्तर्हि पूर्वेणपरस्यप्रत्यासत्त्याग्रहणएवप्रवृतिः कल्प्यतेनाम। आमन्त्रितात्परस्येति। अत्रतत्रेदमित्यर्थः। एवमनुगतरूपेणकल्पनयाआम्भोइत्यत्राप्यामन्त्रितात्परत्वेनाश्रयणाभावेनात्रप्रवृत्त्यासर्वंनानुगतरूपेणादोषात्। नचैवं प्रत्यासत्यैवविनिर्वाहेवतिव्यर्थः प्रत्यासत्तित्वाभावार्थमिवावश्यकत्वादिदमेवकेचित् स्वाश्रयमिति दिक्। स्मरामीति। न च पश्यार्थैरिति निषेधइन्द्रियजन्यएवनिषेधात् स्मरणस्येन्द्रियजन्यत्वाभावात् संस्कारजन्यत्वाद् यद्वासाक्षात् कारार्थकेतिनिषेधःस्मरणन्तुनसाक्षात्कारः मानसंध्यानन्तु साक्षात्कारवत्। एवं मनसासाक्षात्करोमोति सङ्गच्छते। इन्द्रियजन्यत्वंसाक्षात्कारत्वं तन्नास्यास्तोत्याग्रहेतुनिर्माङ्गीकारएवेति बोध्यम्। निवृत्तिरिति। नन्वयइत्यस्यच्छन्दोवत्वाभावादपादादाविति सत्वेपि नदोषइति चेच्चिन्त्यमेतदग्नइन्द्रवरुणेति वह्वृचउदाहरणार्थमावश्यकमेवैतदित्यन्यदित्यादिबोध्यम्। करोषोति। सिबर्थआश्रयःतेनैकाधिकरण्यरूपसामानाधिकरण्यमस्त्येव। ननुप्रवृत्तीति। ननु घटोघटमित्यर्थप्रवृत्तिनिमित्तादेर्गर्भस्य विवक्षणेपि घटःकलशमित्यादौ घटत्वकलशत्वरूपप्रवृत्तिनिमित्तभेदमादायशाब्दबोधवदत्राप्यग्न्यादिपदानामर्थपरत्वस्य पूर्वमुक्तत्वादर्थैक्येपि पूर्वबद्धर्मभेदोप्यस्त्येवेति किमर्थंननुग्रन्थइति चेच्चिन्त्यमेतत्। परेत्वग्न्यादिशब्दः शब्दपरैवार्थपरत्वेत्वेतानितेऽन्यइति पुनरन्यइति पदवैयर्थ्यापत्तिः। अन्यएतानि-

नवनामानीत्येवस्वारसिकोर्थः । नचैकार्थबोधरूपसामानाधिकरण्याभावः तवनामानीत्युक्तेत्वदर्थशक्तिरेषामित्यर्थो बोध्यतइति सत्सत्वाद् नच पुनरर्थपरत्वमुच्चारणकालशब्दपरत्वमेव तवनामानीति वाक्यबोधोत्तरं तेषामेकार्थतेति सामानाधिकरण्यन्तु वर्ततेऽर्थपरत्वन्तुनेति पूर्वग्रन्थश्चिन्त्याशयोनन्वितिग्रन्थइत्याहुः । ननु सामानाधिकरण्याभेदान्वय्यर्थप्रतिपादकत्वमेवास्त्विति नदोषः । न च देवकरोषीत्यत्राप्येवंवारणआमन्त्रितेत्यस्यवैयर्थ्यमपरमनुकूलमेवेति । यद्वातत्राप्यभेदान्वयेऽस्तिक्रियातद्वतोस्तादात्म्याङ्गीकारात् । नचत्वमित्यनेनाभेदान्वयेपि नदेवेत्यनेनाभेदान्वयोदेवत्वमिति वाक्यएकदेशन्यायेनदेवेत्ये तन्मात्रप्रयोगेतुत्वं पदार्थस्यतस्मिन्नेवान्तर्भावेनाभेदान्वयस्यसूपपादत्वात् करोषीत्यस्य सुन्दरंकरोषीत्यस्यसुन्दरं करोषीत्यर्थप्रयोगेसुन्दरंपदार्थभेदस्यसत्वाच्चेति चेन्नाघ्न्यादिशब्दानांशब्दपरत्वेन वारणेप्यर्थपरत्वेनतदसत्वात् नन्वर्थपरत्वेविशेष्यविशेषणरूपसामान्यवचनमप्यस्तोति कथं तेनवारणंसामान्यवचनमित्यस्याव्यापकधर्मावच्छिन्नमर्थः घटोनीलइत्यत्रनीलापेक्षयाघटस्याव्यापकधर्म्मावच्छिन्नमेव प्रकृतेऽघ्न्यादिपदार्थानां समाननियतत्वेनाव्यापकधर्म्मावच्छिन्नत्वमिति नदोषः । अथकिमर्थंसमानाधिकरणइति पदमिति चेन्न । पाचकपाठकश्च युवांपचतमित्यादावव्यापकधर्म्मावच्छित्वरूपसामान्यवचनत्वस्य सत्वादापत्तिस्तदावश्यकत्वात् । ननु प्रथमान्तपदातिरिक्तस्य समुच्चयएवनास्तीति सम्बोधनान्तरस्यापि समुच्चयाभावइति चार्थेद्वन्द्वइ-

ति सूत्रेशेखरउक्तत्वादिदं प्रत्युदाहरणमसङ्गतमिति चेन्न। उश्चउश्चेति मनोरमादिषु प्रामाण्यप्रयोगेषु तदतिरिक्तसमुच्चयस्वीकारेबाधकाभावात् तत्र समानाधिकरणपदमपि मानमस्त्विति दिक्। निपातनैरिति। ननु युजादिषुनिरुपपदेपि निपातनसत्त्वात् कथं साहचर्येणसुबुपपदत्वलाभइति चेन्न। सर्वत्रलाक्षणिकस्य निपातनस्यसत्त्वेन तत्साहचर्यादस्याप्यलाक्षणिकत्वसुबुपपदकत्वरूपनिपात्यतइत्याशयात्। अनित्संज्ञकेति। नन्वबुददत्वानापत्तिः नच तत्र लोपोऽनिष्टएवेति वाच्यं इरइत्संज्ञावाच्येति वार्तिकसत्त्वेतत्रलोपस्य जायमानतयातद्व्याख्यानइत्संज्ञकेकारान्तत्वबदनापत्त्याफलभेदेप्रत्याख्यानानापत्तेः। यद्यपीत्पदस्य शब्दरूपाध्याहृततदन्तविधिनेत्संज्ञकेकारान्तभिन्नत्वेन नदोषः। न च रेफवान्तएवेकारः तदन्तविधिघटितवाक्यार्थसामर्थ्यादन्त्येदितोग्रहणात्। तथाप्येकदेशेशब्दाध्याहारस्य कर्तुंशक्यत्वेदोषएव नचेदितोनेति प्रसज्येततत्सम्भवः। प्रसज्यस्यात्रदृश्यमानत्वादितिचेत् पर्युदासश्चिन्त्यएव किन्तुप्रसज्येतशब्दस्वरूपाध्याहाराणान्तदन्तत्वेदोषइति तत्त्वंनप्रवृत्तिरिति अनन्त्यविकारइति प्रत्ययाप्रत्ययविशेषणाद्वेति भावः। व्याख्यानादिति। चाविति लिङ्गात्। अच्प्रत्याहारग्रहणेहि तस्यासम्भवएवस्यात्। न च वर्गग्रहणंतत्रेति वाच्यं छेचेतिवैयर्थ्यापत्तेः। अन्यथासर्वस्यपरेदीर्घस्यैव सत्त्वेदीर्घादित्येवसिद्धेऽसङ्गतिः स्पष्टैव नचोत्तरपदइत्यधिकाराच्चवर्गेषूत्तरपदएवदीर्घसत्त्वादुत्तरपदाभावेच्छेचेतिचरितार्थन्त हिंचावित्यत्रस्वरितेनाधिककार्याद्वर्गग्रहणञ्चेति पठितस्यचग्र-

हणंचेतितत्वम् । अनभिधानमिति । तृतीयइत्यत्रैव प्रयोजनस्य भाष्येकथनात् । विष्वम् । अत्रचाक्वित्येवकृत्वाऽप्रत्ययग्रहणंन-कार्यमिति केचित् । कृकमादाविंतिपठित्वातदपि वक्तव्यंना-स्तीत्युक्तंनचगणग्रहणापत्तिः।कृआदिसमुदायघटकउत्तरपदइ-त्येवमर्थस्यविलंबोपस्थितिकतयाकृआदिर्यस्य तस्मिन्नुत्तरपद-इत्यर्थस्यशीघ्रोपस्थितिकतयातदभावादित्याहुः । निपातना-दिति । क्वचिदन्तोदात्तस्यापि स्थानित्वादन्यादृशप्रयोगेप्राप्त-अन्यादृशकरणरूपस्वाभिमतनिपातनाभावादिदंचिन्त्यम् । अ-भेदकाभेदकाइति स्वीकर्तृमतेतुयुक्तमेवेतितत्वम् । अदसो-ऽसेर्नदोषइति । नन्वदकयतेः क्विपिमुत्वापत्तिरिति चेन्न । निर्दिश्यमानत्वाभावेनवारणाद् नचाकज्विषयेनसतस्याः ति-ङन्तविषयादावेवप्रवृत्तेरुक्तत्वात् । नचैवममुकइत्यसङ्गतन्त-स्यासाधुत्वात् । परेतु क्विबन्तेपोष्टमेव मुत्वमितिनामुकइत्य-सङ्गतमित्याहुः । शब्दान्तरेति । दीर्घेकृतेतद्व्यक्तेरभावेनह्रु-स्वस्यापि शब्दांतरप्राप्तिकत्वमिति चिन्त्यम् । परनिमित्तकत्वे-नेति । सुस्वूर्षतीत्यादावप्युक्तांतरंगत्वाद् द्वित्वेऽभ्यासउकार-श्रवणानापत्तिरिति तादृशांतरंगत्वंचुंचुप्चणयोर्यगवृद्धिकृत-लक्ष्यभेदानाश्रयणमित्येवोच्यतेत्रविषयेजातवहिरंगस्थलएव-नतु समकालप्राप्तिकइत्युक्तम् । एवंच प्रकृतेपिनान्तरंग-त्वमिति चिन्त्यमेतत् । यद्वोदवोढामित्यर्थमेकव्यक्तिवृत्ति-विकारकृतलक्ष्यभेदानाश्रयणमित्येवोच्यते । प्रकृतेतुव्यक्तिद्व-यवृत्तिदीर्घइकारस्यभेदएवेति नलक्ष्येलक्षणन्यायप्रवृत्तिः । न-नूषतुरित्यत्रव्यक्तिद्वयवृत्तित्वात् पुनर्ह्रस्वापत्तिरिति चेदेवंव-

क्ष्यामःपूर्वौक्तताकारस्यनपुंसकत्वमुत्तरस्यतुपुंस्त्वंतयोःसमाहारे-सुपोधात्वित्यपेक्षयापूर्वं दीर्घेह्रस्वइष्टसिद्धिरिति चिंत्यमेवै-तदुकालइत्यपिचिंत्यमेवतन्मतेप्युकरणंसवर्णग्रहणात् । अ-संदेहायह्रस्वोच्चारितइति चेत्सत्यंप्रकृतेपि वाच्यमिति वस्तुत-स्तत्स्वीकारेसनासंशेत्यादावापत्तिः । आदेशएवेत्युक्तेतुसंकोच एवदोषः स्यात् । किञ्चोदुपधायाइत्यत्रानयैव सिद्धेप्रश्ठे षप-रभाष्यविरोधः किञ्चभाव्यमानेनेत्यत्रस्वरितातिरिक्तविशेष-णान्निषेधाप्राप्त्यावैयर्थ्याभावः । अष्टदशानांग्रहणन्तुनतत्प्र-योजनाभावात् । स्वरमात्रस्यैवोपयोगात् । किञ्चतपरग्रास्त-स्यतानग्रानिषेधइति पथिमथोत्यत्रशेखरउक्तत्वात् तपरकर-णंचरितार्थमेव किञ्चादसोमादिशायतेनैप्रश्ठे षसिद्धौप्रयोज-नाभावः । नचेकारएवग्रह्यार्थंचरितार्थम् । अत्राप्यद-सोऽम्वादेशविधानेनैवसिद्धेगुरूपन्यासादेवतत्सिद्धेः । अमुक-इत्यत्रसर्वादेशापत्तिस्तुन तस्यासाधुतायाउक्तात्वाददमुयड-र्थंनतत्रादह्यड्डित्येवसिद्धांतयिष्यमाणत्वात् । अतएवेयंनाश्र-यणीयैवेत्यन्यत्रविस्तरः । मेवावश्यकमिति । इदन्तुतत्वंभसं-ज्ञापदत्वरूपेशास्त्रीयेपि भवतिनपदंतुभाष्यादिति नलोपइति सूत्रेपियच्चिभमिति भ्यामिप्रवृत्त्यापदत्वप्रतिबंधान्नलोपभा-वार्थंकार्यकालत्वंयुक्तमेव किञ्चाष्टाध्यायीकृतपरत्वाश्रयणात् परत्वात् भसंज्ञैवेति नदोषइति तत्वम् । एवंचभाष्यमपिनैक-देश्युक्तिरङ्गेन प्रत्ययाक्षेपस्यसर्वत्रोक्तेः प्रत्ययइत्युपस्थित-स्यानोविशेषणाच्चोत्थिताकांक्षत्वमत्रास्तिरस्कृतम् । कत्वविष-यइति । तेनात्वविषयस्यापिसंग्रहः । मानाभावादिति । अ-

स्वगुरुचरणाः क्वचिदन्त्यसदेशानन्त्यसदेशयोःप्राप्तिप्रसिद्धअन्त्यसदेशोपस्थितिरत्रोत्वस्य तथात्वेपि नप्रवृत्तिरवधारणगर्भानन्त्यसदेशस्यैव विकाराभावात्। अमुमित्यत्रास्यापि प्राप्तेर्मकारादावपि नप्रवृत्तिरेकप्रयोगेऽदद्रिशब्देन्त्यसदेशानन्त्यसदेशयोः प्राप्त्यभावाद् रेफेणव्यवधानादन्त्यसदेशत्वाभावादतष्वोक्तमेकइति भाष्यप्रयोगोपपन्नः। अन्यथान्त्यसदेशत्वाभावान् मुत्वानापत्तिस्तस्मादप्रवृत्तिरेव युक्तेति नाप्यदमुयडिति भवितव्यमिति भाष्यविरोधस्तवासेरिति पक्षएवंभवितव्यं तन्न स्यादिति शङ्कायामुक्तञ्चेति समाधानेनादोषात् समाधानन्तुकेचिदिच्छन्ति वस्तुतस्तुयेनेत्येवेति भाष्याशयेनादोषात्। तस्माददद्यङ्डित्येवेष्टंनद्वयमिति सिद्धान्तमाहुः। अतएवहिः प्रयुक्तइति सुधियः। समोमिडिति। नन्वकचिकृतेविशिष्टस्यादेशार्थं यथान्यासएवास्त्विति शङ्कावसरइति चेन्न सर्वनामसाहचर्येणाव्ययादपि वाचकत्वरूपप्राधान्यएवप्रवृत्तिर्नतुद्योतकस्थलेप्रकृतेतुसमोद्योतकत्वान्नाकनःप्रसङ्गइति तात्पर्यात्। ननु नलोपोनञइत्यत्राशितिन्यासेऽकब्राह्मणइत्यत्रदोषदानसाहचर्य्येणाभिप्रेतमिति चेदुच्यतउपसर्गस्यायतावित्यत्रभाष्येणोपसर्गविषयेऽकचोऽनभिधानात्। तत्रह्ययतावित्युपसर्गविशेषणं रेफस्यवाआद्ये परेःप्रतिषेधः।अन्त्येप्रतेरपूर्वविधिरित्युक्तम्। यद्यकजुपसर्गेस्यात्तदापरिवदकच्यपि निषेधआवश्यकइति तदनुक्त्याऽनभिधानमाश्यकमित्याहुः। तिरसः। अलतिर्यइति।अनीति।अतीतिवास्त्विति केचित्। अयंविचार आद्यअमञ्चतीत्याडित्यत्राकारपरत्वादापत्तिः।

अलोपग्रहणेत्वेकादेशापहृतरूपलोपसत्वेन नापत्तिर्द्वितीयेऽप्य-
इत्यस्यानुकरणेप्रकृति वदनुकरणेनेति पक्षअङ्इत्यत्रा-
पदान्तादकारादतोगुणइति पररूपआदेशः स्यादलोपग्रहणे-
तूक्तरीत्यानादेशइति नदोषइति चेन्न । अतीत्युक्तआङित्य-
त्रदोषतादवस्थ्यादतःपरत्वन्तुसर्वत्रैवेत्याहुः । नाञ्चेः । रूढ-
स्येति । ननु प्राचीनइति विशिष्टरूढत्वस्यादृष्टत्वेन वक्तुमश-
क्यत्वाद्यौगिकेनलोपानापत्तिः पूजायागम्यमानत्वादिति वा-
च्यम् । प्राचोक्तंपदंक्वचित् । पूजयोपादीयतेक्वचिन्निन्द-
यात्वतत्रनिन्दायां लोपयुक्तःप्रयोगः पूजायान्तुनकारसहितए-
वेति केचित् । अपास्तमिति । वस्तुतउत्तरार्थंनकारस्यावश्य-
कत्वेनात्रनियमगौरवेणच तदयुक्तमेवेतिभाति । एतेनाञ्चुग-
तावचिपूजायामिति पठ्यतइदित्वादेवनलोपाभावेनाञ्चेरिति
सूत्रमेवव्यर्थमित्यपास्तम् । पूजागम्यत्वेपि नलोपापत्तेः । अ-
ञ्चुयुजिक्रुञ्चामित्यत्रेकारकरणादचीत्यस्याग्रहणापत्तेश्चोकारा-
करणेनतस्यापि ग्रहणेऽचीत्येकइत्यस्याप्यापत्तेस्तत्राकारांतंकृ-
त्वाह्यनुबंधकत्वादग्रहणमिति चेद्गौरवमेवेति दिक् । ओ-
पधत्वेति । क्रुञ्च्यादित्यत्राशीर्लिङितत्वन्तत्रनोपधप्रयोज-
नङ्क्रुच्यादिति तत्रकुचीतीदित्पठनेनापि सिद्धमिति क्रुंचेति
पाठोव्यर्थः स्यादतोयंनओपधःकथन्तर्हिकुत्वमाशंकितन्तर्हित
द्भाष्याद् कुत्वविषयेऽनुस्वारपरसवर्णत्वयोःसिद्धत्वमेवप्रति-
पाद्यतांम् । आशीर्लिङिक्रुच्यादित्येवरूपमस्त्वितिचेत् चिन्त्य-
मेतत् । शतृवदिति । नन्वतृप्रत्ययान्ताएवनिपात्यन्तांकि-
मनेनगुरुभूतेनेति वाच्यम् । अतृप्रत्ययस्यप्रकरणपठितत्वा-

भावात् पूरणगुणेति निषेधार्थमपि शतृवदित्यतिदेशस्यावश्यकत्वाच्चेत्याहुः । अत्वसम् । अनुवादकमिति । वस्तुतस्तच्छ्रूयमाणसंप्रतिपत्त्यर्थंतेन चन्द्रयतेःकिपिचन्द्रमित्यत्रनदीर्घःणिलोपस्यतुनस्थानिवत्वंदीर्घविधौतन्निषेधाट् टिलोपः स्यादिति मतेदोषेण कथं तदुपरिव्याख्यानेन निर्वाहइति दोषोदत्तएतद्वचनेननिर्वाहादिति चेन्न । इदमपूर्ववचनंनकिन्तुच्छयइत्यस्यच्छआदेशेस्थानिवन्मूलकः छेणकारघटकत्वमारोप्यतइत्यारोपमूलकोवातत्राद्ये ऽनेकान्तवादिनामुपरिनदोषः । अन्त्येतु स्वावयवावयविनिघटकत्वमारोप्यतइति तदावयवत्वस्यैवाभावेन तदवयविनितद्घटकत्वस्यारोपेपि नमशक्यत्वव्याख्यानाश्रयस्यावश्यकत्वमिति नविरोधइति यत्किञ्चिदेतत् । अत्रेदन्तत्वंनोपधायाइत्युपधापदाभावेप्रकृतेकृतेनुमिदीर्घस्यचारितार्थ्यसम्भवात् । तत्र कौण्डिन्यन्यायेनदीर्घेणनुमोबाधापत्तिः तत्सत्वेऽनवकाशत्वाद्बाधेपुनरुत्सर्गप्रवृत्तिर्भवतीति नदोषइति सुधियःकेचित्वतुपदम्मौपदेशिकात्वं तल्लाभार्थंमतुप्यपिहलन्त्यमिति संस्कारानन्तरमानुमानिकादेशत्वंसमस्त्येवेति । अपितूपसंख्यानंनापूर्वमित्याहुः । नलोपिनइति । यथा श्रुतेप्राङ्ब्राह्मणीत्यत्रोगितइति ङीबापत्तिः । उभेलक्ष्यानुइति । वस्तुतस्तूभशब्दस्यद्वित्वावच्छिन्नबोधकत्वादुद्देश्यतावच्छेदकद्वित्वरूपमेकमेवेति नवाक्यभेदः किञ्चविधेयतावच्छेदकभेदेन वाक्यभेदेप्युद्देश्यतावच्छेदकभेदेवाक्यभेदएवन यथाघटपटौस्तइत्यत्रननुगर्गाइत्यत्रशतनिष्ठस्वत्वनिवृत्तिविधेयाधारत्वस्वत्वनिवृत्ति पूर्वकम्वास्वत्वप्रकारकेच्छायादण्डनपदार्थत्वादेवञ्च-

तिष्ठतेरेकत्वेपि विधेयतावच्छेदकंयत्तत्वम्। तथाच वाक्यभेदादेववाक्यभेदोनतुविधेयतावच्छेदकभेदादिति स्वीकारेण प्रकृतेविधेयतायाअभेदेनादोषाद् यद्वास्वत्वंनविधेयतावच्छेदकमानन्त्यप्रसङ्गात्। अपितु स्वस्वत्वेनानुगतरूपेणेति नविधेयतावच्छेदकभिन्नं न च शतनिवृत्तिर्गर्गेषुनास्तीति वाच्यम् एकदेशद्वारासत्वादित्यलम्। असतोति। प्रयोजनाभावेसत्यशब्दार्थप्रयोजनकथनस्योपहासपरत्वादिति भावः। अन्तरङ्गत्वादिति। वस्तुतोवोभवत्वित्यत्राभ्यस्तस्वरानापत्त्येदमायनसत्रविषयकमेवान्यथाऽन्तरङ्गत्वादयादेशेतदाशयएवाभावेनतद्विचारासङ्गतिः। एवञ्चान्तरङ्गत्वादित्ययुक्तमेवति बोध्यम्। किञ्चेत्यप्ययुक्तमेव। अजक्षुरित्यत्रजुसश्चारितार्थ्येन सामर्थ्याभावात् सामर्थ्यमूलकएवप्रवृत्तेः। तत्रापि शबभ्यस्तसंज्ञाद्यपेक्षयावहिरङ्गत्वादन्तिः स्यादेवेतिसामर्थ्यसूपपादमिति केचित्। नदीषइति। वस्तुतऐर्त्सन्नित्यत्रैकादेशेपरादिवत्वेन सत्वेप्यभ्यस्तत्वाभावः। नचैकदेशविकृतन्यायेनतत्वं तस्यफलाभावेनानाश्रयणात्।अतएव स्थानिवत्सूत्रइमामुपन्यस्यैकदेशंविकृतस्येति वक्तव्यमित्युक्तम्। तत्र वक्तव्यंभवतीत्येवफलमुक्तंनलक्ष्यसिद्धिरूपमुक्तंभाष्ये तदाश्रयणेवाऽर्द्धविकारेतदप्रवृत्तिरेवेत्यत्राभ्यस्तत्वाभावादेवनदोषः।एवञ्च समासानाश्रयणेपि नक्षतिरभ्यस्ताद्विहितेनवारणंत्वयुक्तमेव जुहुवतुरित्यत्राभ्यस्तत्वानापत्तेः साहचर्यमपि पूर्वमुक्तमित्यलम्। केचित्तु देवदत्तादयोभोज्यन्तामिति स्वीकारेप्रत्येकमर्थापत्तिरित्युभेग्रहणमित्याहुः। चिन्त्यमिति। केचित्तु वहुव्रीहि-

फलत्वेनमानम् । स्त्रगितिभाष्योदाहरणेनापवादत्वंयुक्तमेवान्यथा रज्जुसृड्भ्यामित्यत्रेवषत्वापत्तेः । नचकथमुपयट्काम्यतोत्यत्रषत्वं बहुव्रीह्यभिधेयापेक्षावधित्वस्य सृजोनिरूपपदलक्षणस्य प्राद्युपसर्गोपलक्षस्य चाश्रयणेनादोषादित्याहुः । तन्निषेधादिति । ननु पदचरमावयवविधायकातिरिक्तस्यग्रहणादत्राप्रवृत्तिरेवस्यात् । नपदान्तेति सूत्रशेखरविरोधश्चेति चेन्नलोपसमाननिमित्तकपदचरमावयवविधायकातिरिक्तस्यतत्रविवक्षणमित्याशयात्। ननु क्रौलुप्तमित्येवदोषइति वाच्यंपिपठिषतेः क्विप्निमित्तकाल्लोपस्य क्रौलुप्तत्वाभावात् तस्यासार्वत्रिकत्वाच्च । पदसंज्ञानिमित्तकप्रत्ययनिमित्तकाभावादेशविषयत्वस्यवापरिष्कारेणादोषात् तस्मिम्प्रत्ययेपरेयोलोपःतस्मिन्प्रत्ययेपरएवकार्य्येकर्त्तव्यइत्यर्थेवानदोषः तद्धितनिमित्तकलोपात्तिरिक्तलोपोनस्थानिवदित्यर्थोवा तेनपटयतेःपडित्यत्रजनयतेः जनूततोजातइति लापनेनजज्ञातइत्यत्रश्रुत्वंसिद्धमन्यथा निषेधाप्रवृत्त्यालोपस्य स्थानिवत्वात्तदनापत्तिरिति श्रूयमाणप्रत्ययनिमित्तकपदचरमावयवातिरिक्तइति वा निवेशनीयइति सुधियः । नुम्स्थानिकइति । शंरितिप्रत्याहारग्रहणमत्रमानंतदभावे केवलानुस्वारोपलक्षणार्थमेवनुम् ग्रहणमावश्यकं शरग्रहणेतुकेवलानुस्वारस्यतत् घटकत्वेन ग्रहणेसिद्धेनुम् ग्रहणंसामर्थ्यात् तत्स्थानिकानुस्वारोपलणार्थंनुम् शुद्धस्तुनगृह्यते विसर्गसाहचर्येणायोगवाहस्यैव ग्रहणान् नुम्स्थानिकानुस्वारएवपर्यवसन्नइति बोध्यम् । तङिति । नन्वत्रसंयोगादिलोपेतस्यासिद्धत्वेन पुनःसंयोगान्तलोपस्यप्रा-

त्तिरेवेति चेन्न । तक्रकौण्डिन्यन्यायस्यत्रिपाद्यांस्वीकारेणादो-षादेतन्मूलकमेवयं प्रत्यपवाद्यत्वंतस्यासिद्धंनेत्युक्तम् । इद-मेवत्रिपाद्यांन्यायप्रवृत्तौ मूर्द्धाभिषिक्तोदाहरणमित्यलम् । ष-त्वस्यासिद्धेति । अन्यथाषढोःकइत्यापत्तिः तर्हितन्निमित्तलो-पातिरिक्तनिवेशेपदचरमावयवेति ननिवेशनीयमित्यपिलाघ-वमिति । षडित्यत्रतुनदोषः श्रूयमाणतद्धितेति निमित्तत्वा-दिति दिक् । विस्तरइति । नन मधुश्रोततीति मधुगिति-कथमिति चेदयंसोपधःतेनसंयोगादिलोपइष्टसिद्धिरिति केचि-त् । दिधगिति । ननु दिदहित्युपदेशाभावाश्रयणं नापिद-हित्युत्तरखण्डस्योपदेशत्वम् । आगन्तूनामंतेनिवेशइति त-स्यतत्वाभावात् । नच स्थानिवत्वेनविशिष्टेतत्वम् । स्थानेद्वित्वा-नङ्गीकारात् । किञ्चस्थानिवत्वेनोपदेशोग्रहीतुमशक्यः । नचभ-वतइत्यत्रादुपदेशत्ववदत्रस्थानिवत्वेन तत्वंस्यादेवतत्रप्रत्ययस्य निमित्तत्वेनाश्रयणाददुपदेशप्रत्ययकालिकोग्राह्यइति तत्रस्था-निवत्वेन तदाश्रयणेप्यत्रकस्यापिनिमित्तत्वेनानाश्रयणात् । उपदेशप्रत्ययकालिकस्यस्थानिवल्लब्धोपदेशस्यग्रहीतुमशक्य-त्वेन ह्रस्वान्तमित्यत्रेवस्वभावसिद्धोपदेशस्य गृहीतुमशक्यत्वा-दुपदेशत्वाभावाद् ह्रस्वाभावएवप्राप्तइति चिन्त्यमिति । एवञ्च दिधडितिजैमिनीयोक्तमेव युक्तमिति सुधियः । बसोः । ब-सुसादेशेनेति । नचैवमपि वसुस्तम्भइत्यस्यैव ग्रहणंस्यादिति वाच्यम् । सामान्यग्रहणंनैकानुबन्धस्यधातोरपीति ज्ञापनार्थ-इति सकलेष्टसिद्धिरित्याशयात् । एतेनवसोःस्थानिवत्वेनैवोगि त्वेलब्धउकारानुबन्धवसोःसामान्यग्रहणार्थंभविष्यतीति भो-

ख्यारूढमधिकसकारानुबन्धनोत, सञ्ज्ञनंव्यर्थमित्यपास्तम् प्रत्ययाप्रत्ययोःप्रत्ययस्याङ्गीकारादिति केचित् । उकारोच्चारणसामर्थ्यादस्यापिग्रहणम् । अपिनाप्रकांतत्वादेकस्योपस्थितित्वादन्त्यस्यैव प्रत्ययस्यैवग्रहणौचित्याच्च । धातोरग्रहंपरिभाषांविनापिजातमित्यपिकेचिदाहुः । नचैवंस्त्रंसइति साहचर्यात्तत्रसत्रेधातोर्ग्रहणापत्तिः । अलवसोरिति प्रत्ययस्यैवग्रहणात्तत्रापितस्यैवग्रहणौचित्यात् सांतेतिविशेषणाच्च नहिधातोर्विशेषणेफलमस्ति । सर्वत्रसान्तस्यैव सत्वेनाव्यभिचारादिति दिक् । परेत्विति । वस्वेकेत्यस्यापि प्रतिपदोक्तत्वमितिचेत् । सदइत्यवस्थायामेत्वलोपाभ्यामेव प्रतिपदोक्तत्वात् । संप्रसारणेनबाधइत्यन्यत्रविस्तरः । पुंसो । वस्तुतइति । गौरवादेतदुक्तंयुक्तंभवति । अदसः । प्रसिद्धेरिति । नच तक्रन्यायेनसिद्धिरित्यादिसिद्धयेतदादिविषयेतदप्रवृत्तिस्वीकारात् । नन्वनन्त्यग्रहणप्रत्याख्यानइदमेवेति नियमेप्रकृतेऽत्वं यदिस्यात् । दकाराभावेनसनियमोऽसङ्गतःस्यादतस्मासथ्यर्दत्वंन प्रवर्ततइत्यदोषः किञ्चपरत्वात्सत्वेसकृद्गति न्यायेनत्यदाद्यत्वमिति सुवचमेवेति चेन्न । तत्प्रत्याख्यानपक्षमादायैतत् ग्रन्थप्रवृत्तेः वस्तुतस्त्यदादीनामइत्यत्रविभक्तीति विषयसप्तमीविहितविशेषणादिगौरवात् सैवचिन्त्यमित्युक्तत्वात्।एवञ्चसकारस्यात्वेपररूपऔडादेशेटिलोपइतिन्यायेनपुनरत्वाप्रवृत्त्याऽदोषात् । नचपररूपात्पूर्वमेवान्तरङ्गत्वाल्लोपेऽसकावित्यत्रटाप्यौङः इयाद्यापत्तिरौकारविभक्तित्वादिति वाच्यं द्विवचनौकारविभक्तेरेवौङिति संज्ञास्वीकारात् प्रत्ययस्यादितो-

त्वापत्तिरितिचेत् डित्वसामर्थ्यात् पररूपानन्तरमेव टिलोपस्यवक्तव्यत्वादन्यथा सोरौदित्येववदेदेवं चेदंचिन्त्यमित्याहुः । नमुने । ननु मुग्रहणंमास्त्विति चेन्न । पञ्चानाममुनेत्यत्रनाभावेकृतेनलोपस्यान्यथासिद्धत्वनिषेधापत्त्याऽर्थान्तरत्वेनामेर्वावर्णमिति स्वरापत्तेः नेकृतेऽव्यवहितस्यैवासिद्धत्वनिषेधइति नदोषइति चेदत्रनइत्यस्यविषयसप्तमीत्वेनौपश्लेषिकसप्तम्यभावेन तस्मिन्नितिपरिभाषाया अप्रवृत्त्याव्यवहितत्वांशस्यलब्धुंशक्यत्वादिति दिक् । इति हलन्ताःपुल्लिङ्गाः । पक्षइति । पदस्यादिरिति पक्षेतुगतिकारकेतिकृदन्तेनसमासेपदत्वाभावेननिषेधोनेतितत्वम् । वस्तुतः पञ्चमीसमासेनहुसेनाविस्यत्रनिघातापत्तिरिति बोध्यम् । अपो । व्याख्यानादिति । सानुबन्धकपरिभाषायाउभयोः सत्वेशास्त्रीयग्रहणमत्रतुलौकिकएवसम्भवतीति भावः । नच प्रत्ययाप्रत्ययोरिति न्यायेनदोषः । तदभावादद्भिरितिनिर्देशाच्चेत्याहुः । इति हलन्ताःस्त्रीलिङ्गाः । उत्तरपदत्वे । ननुकार्यित्वनिवेशेफलसत्वेपि प्रमाणाभावइति चेत्पदादिविधाविति पर्युदासएवाकेहि । तथाहि पूर्वकालाव्यवहितकालवृत्तिर्हिपदादिविधिर्यथासेचइति सकारस्यपूर्वकालाव्यवहितकालवृत्तित्वं । एवञ्चतत्साहचर्य्यात्परकालाव्यवहितकालवृत्तिरूपपदान्तकार्यएव तथाच कार्यित्वनिवेशोऽर्थात्फलितः यद्वाऽलाभाववृत्तित्वेनसाहचर्य्ययथासइत्यत्रप्राग्भाववृत्तित्वं तथाचध्वंसवृत्तित्वंपदांतकार्यएवेति नपदव्यवायेपीत्येतद्विषयेप्रवृत्तिः । अभावप्रतियोगित्वेनवासादृश्यमिति नदोषः । न च पदादिविधिर्नान्तेत्यादौणत्वविधौ

[illegible]भावेन पूर्वकालाव्यवहितकालवृत्तित्वं बाधितमिति वाच्यम् । उत्तरपदकार्येपदादिविधेस्तथात्वेनादोषात् । ननुपदप्रयुक्तकार्यउत्तरपदीयेकर्तव्येपूर्वपदीयपदत्वस्यापि निषेधादिति चेन्न । उत्तरपदीयेनेति निवेशेनोत्तरपदसंबन्धिनिकार्यइति निवेशेनवादोषात् । अवत्यकार्यित्वादिफलमुक्तं ङमुट्सूत्रे । अनभिधानमिति । अभिधानेहिगतिकारकेतिसुबुत्पत्तेः प्राक्समासेऽपदत्वादनिष्टः स्यादिति भावः । नसलिखितइति । ननु मधुशब्दाद् यञन्ताद्धहुवचनेजसियञोलुकिह्रस्वस्यगुणोभवति तत्रपदत्वादेङः पदान्तादिति दुर्वारंनचाननिषेधउत्तरपदत्वाभावादेतत्प्रत्याख्याने तुयजादौसर्वनामस्थानेंपूर्वस्यपदत्वनिषेधेनादोषादिति चेन्नोत्तरशब्देनोत्तरपदंनलक्ष्यतेकिन्तुवृत्तिचरमवर्ति तथाच प्रकृतेनिषेधसौलभ्यमिति बोध्यम् । युक्तञ्चैतदन्यथाप्रत्याख्यानेऽस्मादेवाचारक्विपि शपिमधवतिशंभवतीत्यत्रगुणेकृतेपूर्वरूपापत्तिरत्रसर्वनामस्थानाभावेन तस्यनिषेद्धुमशक्यत्वात् । मन्मतेवृत्तिचरमएवसइति निषेधःस्पष्टैवेति दिक् । संबध्यतइति । ननु तत्सम्बन्धएनयोरित्यत्रचारिताथ्यात् सामर्थ्याल् लुकालुप्तेतीत्यसङ्गतमिति चेन्न । प्राचीनानुरोधित्वात् । तस्यस्वसतेद्वेकवचनएवेति बोध्यमिइमत्रतत्वमेनोनवक्तव्यः । न च तत्रन्यायेनत्यदाद्यत्वबाधःत्यदादिविषयेऽप्रवृत्तेरुक्तत्वाद् यदिसोपि नदोषावह एनदेवकर्त्तव्यइति भगवतःसिद्धान्तस्तत्रैनदेवकर्त्तव्यइति शङ्कितेऽपरेयद्ये नत्क्रियतेतर्ह्येनोपि नकार्यइति तदुपर्युपहासपरतयातत्सार्थक्यादिति सुधियः । ननूपसर्ज-

नेतकारचारितार्थ्यमतः सामर्थ्याभावइत्यत आह । अनयो-
रिति । अहन् । निषेधेनापीति । अपिनातक्रन्यायः । ननुनि-
षेधविषयेचारितार्थ्यात् तक्रन्यायोनदृष्टइति चेन्न ब्राह्मणे-
भ्योदधिदीयतांनरात्रौ तक्रकौण्डिन्यायेत्यत्रबाधदर्शनात् ।
नच वाक्यद्वयकार्येवत्वकरणसामर्थ्याद् बाधोस्त्वत्रकि-
ङ्गमकमिति वाच्यम् ब्राह्मणेभ्योगौडेभ्योदधितक्रंश्मश्रुम-
त्वक्यद्वयेपि बाधदर्शनात् । अप्राचीनंग्रामानहृत्वा-
आम्नायेवर्णास्तेन्यग्रोधाइत्यत्रचदर्शनात् । ननु नडीति नि-
षेधपर्यालोच्यनलोपइत्यसङ्कोचेप्राप्तिरपि दुर्लभेतिचेन्न । स-
[illegible]कालिकत्वेन वाक्यार्थपूर्वमेवच व्याप्यव्या-
पकज्ञानसत्वेन पूर्वंशास्त्रस्यैतद्बाधज्ञानादेतद्विषयसङ्कोचस्य-
तयादोषान् निषेधशास्त्रस्यचप्रतियोग्यपेक्षत्वेन पूर्वन्तत्सङ्कोचा
भावात् नचाहयतेःक्विप्यहइत्यत्रनान्तत्वाभावात्कथंनान्तप्रा-
तिपदिकत्वमहश्शब्दइति वाच्यम् । पदान्ताहश्शब्दस्यसर्व
त्रनान्तस्यैवसत्वेन तस्यतद्व्याप्यतायाः सौलभ्यादिति दिक् ।
विभावयन्तुसुधियः । ऊर्गिति । इयमूर्जीतिवैदिकप्रयोगात् ।
अस्यस्त्रीलिङ्गत्वेनपुंनपुंसकयोरेवेति नप्रमाणमिति क्विबत्रकर्त्त
रिवहूर्जीति। नन्वतइत्येवकृत्वातस्यैवानुवृत्त्यासिद्धेप्रत्याहारग्र-
हणंव्यर्थमिति पूर्वपक्षश्चेदयमपरोक्तइति तत्वमचइत्यनुकृष्ये-
कइति नकार्यमिति तुनौडश्यामित्यारम्भेण सन्निपातेनपर-
त्वेनौङभ्यसोः स्वदोषेपि सप्तम्येकवचनेकारान्तेपि नुमापत्ते-
रिति दिक् । षाण्मासिकइति । अयमपपाठः । ठनिष-
ण्मासिकइत्यपेक्षितत्वान्नुम्नेति । वस्तुतःसर्वनामस्थानत्वमे-

वन नपुंसकत्वादिति चिन्त्यम् । अश्वेति । समासेभूतश-
ब्दस्यपञ्चशतपरत्वमेवमक्षिशब्दस्यविंशतिपरत्वम् । अन्यथा
भूतादेःपञ्चद्विसप्तसंख्याकत्वेन चतुर्दशसंख्यात्वस्यैवापत्तेः।
आच्छी । परोयःशतेति । इदमेवयुक्तम् । अन्यथाशतृभिन्ना
वयवेत्यर्थेपि शत्रकारेसमुदायावयत्वमादापत्तिरेव स्यादिति श
तृभिन्नावयवोर्थवान्ग्राह्यइत्युक्तेगौरवंस्यात् । पूर्वान्तत्वेनत-
स्ययत्रार्थवत्वं तत्रैवप्रवृत्तिरन्यत्रतुनेतिकल्पनंचेति नचत्वन्म-
तेऽपवर्गाभावः परत्वेनदृष्टोयःशतेति व्याख्यानेनादोषात्।
उक्तगौरवेणास्याकिञ्चित्करत्वात्। इत्याहुरित्युक्तभाष्यद्वय-
विरोधः कथं परिहार्यइति चिन्त्यम् । अन्येतुच्छदिष आकृ-
तित्वंतृणेष्वेव प्रसिद्धमिति छदिरुपधोत्यस्यप्रतिपदविधित्वेपि
चर्मणितदप्रसिद्धेः प्रतिपदविधित्वाभावाच्चर्मणोञित्यस्यपर-
त्वात्तत्प्राप्तौ पूर्वविप्रतिषेधारम्भइत्येकेऽत्रपरिहरन्ति अन्यत्र-
शीघ्रोपस्थितिकत्वान्नित्यविहितैष्टच्प्रभृतिभिः कपोबाधसम्भ-
वेपि तथाविधकब्विधेरप्रवृत्तिपक्षऊर्ध्वजानुरित्यत्रपाक्षिककपो-
निष्टस्यापत्तौ भाष्यतात्पर्यान्नसः किन्तुहृद्भाद्दिभेतिपाक्षिको-
जुरित्याहुः । अपरेतुलोहितान्मणाविन्यनेन पुंसिचारिताथ्यैन
स्त्रियांप्रतिपद्विधानमात्रालिङ्गबोधकप्रत्ययबाधेप्राप्तेक्रियमाणा
ल्लोहिताल्लिङ्गबाधनंवेति तद्वार्तिकतद्विरुद्धोक्तभाष्येद्वयेप्येकदे-
श्युक्तित्वंकल्पयतः तुल्यन्यायात् प्रकृतेप्राप्तस्याप्यनित्यंशाकृ-
तव्यूहपरिभाषयानुमकारनिष्ठोपधात्वस्यविनाशोन्मुखत्वेन दी-
र्घाप्रवृत्तेः । स्वंपीत्येकमेवेत्याहुः । इति नपुंसकलिङ्गाः ।
स्वरादि । आपतेरिति ननुचादयआद्युदाताइत्येवं पाठेनतत्र-

नदोषः ननु स्वरादयोऽसत्वइति पाठेस्वरादीनामसत्वएवाव्य-यत्वापत्तिरव्ययमिति महासंज्ञयासिद्धान्तेप्यसत्वएवेष्टत्वात् स त्ववाचकानान्तु क्वचित्सातिगमकएवेति नदोषइति चेन्न । त-त्रचचादयइति पदद्वयकरणेननिपातप्रदेशेषु चादिपाठेनगौर-वापत्तेः यदिसंज्ञाप्रदेशेषु निपाताइत्यव्ययमित्युच्यतेतदानसि द्धान्तेनसममेव स्वरादिसूत्रेनिपातग्रहणंनकार्यमिति त्वत्रप-क्षेलाघवंनचोपसर्गादीनामाद्युदातानापत्तिश्चादित्वाभावादि-ति वाच्यम् । चादिगणएवोपसर्गाइत्यारभ्याधिरीश्वरइत्यतः पाठेनचादित्वसिद्धेः प्रादयइति चनकार्यमिति चलाघवं नच चादीनामप्युपसर्गगत्योरप्यापत्तिरुपादिग्रहणस्यनियमार्थत्वा-द् नच कर्मप्रवचनीयेष्वप्युपसर्गगत्योरप्यापत्तिरुपसर्गादि-गणेपाठत्वेननिपातवत् कर्मप्रवचीयत्वाप्राप्त्यापि समावेश-इति वाच्यम् । कर्मप्रवचोयाइत्यत्रकर्मप्रवचनीयाएवेति पठि-त्वागत्यादिबाधसिद्धेरन्ययोगव्यवच्छेदोह्येवकारेण स्वघटित-पदत्यागएवनिवेशेचकिंलाघवमिति चेदेकंपदंकार्यमिति शेष इदमत्रतत्वम् । स्वरादयोव्ययमित्येवसूत्र्यताञ्चादयोपि त-त्रैवपाठ्याःचादौ प्रादयएवोपसर्गाइत्येवकारेणोपसर्गादिबा-धश्चादीनाञ्चादयआद्युदाताइत्येवचपाठ्यम् । असत्वइति । पठित्वाचादीनांपाठःकार्यःतत्रकर्तव्यं वा तथाचचादयोऽसत्व-इति प्राग्रीश्वरान्निपाताइति स्वरादिनिपातमित्यत्रनिपाताइति नचकार्यमिति । एतत्पक्षेनिपातपदमनुक्तमपिलाघवं निपात एकाचइत्यादिषुचादयइति पाठेचगौरवेपि सप्तपदाकरणाद मात्रालाघवंत्वतिशयितमेव नच संज्ञाकृतलाघवं तदनाश्रय-

णस्योक्तत्वात् ननु स्वरादिषुचादि[illegible]दराकृतिगणत्वाद्-
ति[illegible]क्ताव्ययानामसम्भवेपाठेतेषांचादित्वस्याप्रापत्त्याद्वा
त्तापत्तिरिति चेन्न । आकृतिगणेऽन्त्यएवपाठ्यइत्यत्रविनि-
गमकाभावेनचादितः पूर्वमेवतेषांपाठेनादोषादिति प्रक्रिया-
चातुर्यवतांपरममधुरइति भात्सर्यमुत्सार्य्यविचार[illegible]न्तुसुधियः
सत्ववाचकत्वइति । स्वरादिषुसत्ववाचकत्वेप्यव्ययत्वस्वीकारा-
दिति चिन्त्यमिति । पाठकस्तुचिन्त्योगमक[illegible]वतत्स्वीकारात्
वामिति यद्यपि विभक्त्यन्तार्थेनन सादृश्यन्तथापि प्रकृत्य-
र्थेनतत्वम् । तत्तदर्थेति । यद्यप्येकस्यैवद्विरुक्त्यापीदंसिद्धंत-
थाप्येकतच्छब्दस्य प्रकृतिपरत्वेनैकस्य प्रत्ययपरत्वेनतदसम्भ-
वः नच तञ्चितोरित्यत्रतदित्यस्यनस्यादित्यर्थकेनप्रथमान्तचि-
दित्यनेनसामानाधिकरण्याभावाद्द्वन्द्वोदुर्लभः परिनिष्ठितवि-
भक्त्यासमासेनादोषात् नहि द्वन्द्वसूत्रेशेषइत्यस्यानुवृत्तिर्येन
प्रथमान्तानामेवसस्यादिति भावः । अत्रकेचित् । यद्विभक्ति-
समानानुपूर्वीकत्वंतद्विभक्तिसमानार्थकत्वमेव प्रत्यासत्येति-
वामित्यादीनां पाठंविनाऽव्ययत्वानुपपतिरित्याहुः । साधीय-
इति । यश्चसाधीयइति । भाष्यात् । सर्वेति । अत्रविभक्ति
पदंत्रित्वेपर्यवसन्नंप्रत्येकमेकवचनादाविति भावः । द्वितीये-
वेति । द्वितीयायाः कर्मत्वमेवार्थंतात्पर्यादर्थापेक्ष्यत्वम् । त्रया-
णामिति । अन्यथाकपिञ्जलाधिकरणन्यायेनायमेकइमेत्रयइत्य-
पेक्षाबुद्धिरेव चतुष्टयजनिका प्रथमोपस्थितित्रित्वावच्छिन्नबो-
धनेनैववहुवचनसार्थक्येतद्वैयर्थ्यस्पष्टमेव अत्रेदन्तत्वम् । सर्व-
विभक्त्येकवचनत्वाङ्गीकारेगङ्गाया आनयेत्यतःसर्वविभ[illegible]त्येक-

वचनापत्तिर्नहितथात्वानुभवः। तस्मादेकैवविभक्तिस्तत्रस्थित इत्यत्रसप्तम्येवस्वर्गतइत्यादौ पञ्चम्येवएवंचसुबित्याद्यौहिप्रत्याहारश्चरितार्थः तत्रतत्रसप्तमीपञ्चम्यादेर्लुगर्थत्वात् त्वदुक्तासर्वविभक्तित्वमयुक्तमुक्तश्चुक्तेः नच येषामपादानादिर्नास्तितेषांतु सर्वैकवचनापत्तिरिति वाच्यम्। अर्थेप्रथमेत्येववक्तव्येप्रातिपदिकग्रहणात् प्रथमैवेत्यदोषात्। कर्मादियोग्येत्यर्थस्तुनप्रातिपदिकपदवैयर्थ्यापत्तेः किञ्चपचतिकृन्मित्यादौ सदुर्वारःविशिष्टकर्तृत्वस्यकेनाप्यनुक्तत्वात्। कृन्मे। संज्ञायाअधीति। अतएव तेभ्यएषामित्यादिसिद्धिरादये येनविधिस्तदन्तसंज्ञांप्रतित्यदाद्यत्वस्यासिद्धत्वापत्त्यादन्तत्वापत्तिः। अन्त्येगुरुसंज्ञाम्प्रतिदीर्घस्यासिद्धत्वात्तस्याअप्यनापत्तिः वस्तुतोऽव्ययीभावश्चेत्यत्रसामर्थ्यान् महासंज्ञायास्त्यागेप्येतद्विषयेमहासंज्ञायास्त्यागेमानाभावइति सुधियः। अयंभावइति। नन्वस्यवस्तुतःकल्पेननवैलक्षण्यम्। अतएवध्वननपरत्वेन तदर्थलापनंकुर्वन्तीति केचिदिति चेन्न। अयंभावः। कल्पेसामानाधिकरण्यसम्बन्धेनलिङ्गान्वयित्वंविशिष्टस्यनकेवलस्येत्याशयः द्वितीयेकेवलस्यापिनेत्याक्षेपाद् ननु तथापि वस्तुतोग्रन्थेनातएवेत्यसङ्गतं तत्प्रत्याख्यानरीतेरभावादिति चेन्नसर्वनामसंज्ञासाहचर्येणास्याप्यन्यार्थत्वेन प्रत्याख्यानेनादोषात् प्रधानन्यायोपन्यासस्तुचिन्त्योवृद्धोयूनेत्यादिगमकएवतत्प्रवृत्तेरिति दिक्। उच्चैरावितिं। अकारोवासुदेवस्तस्मादौ प्रत्ययःपरादित्वेन सुप्त्वएवमिदम् शब्दात्भ्यामिद्वितीयमपि नच समासउपसर्जनत्वमेवेति वाच्यम्। कुगतिसमासउभयपदा-

र्थप्राधान्यात् उच्चैराभ्यामित्यादावदोषात् । ननु प्रत्ययग्रहणप-
रिभाषयैवाबलुक्नप्राप्नोतीति कथमनभिधानमिति चेन्न ।
अन्त्येस्त्रीप्रत्ययेचानुपसर्जननेनेतिनिषेधादिति कश्चित् प्रत्येक-
मेवेति स्वरेविशेषादितिशिवम् । हयग्रीवपदाम्भोजद्वन्द्वकारु-
ण्यमूर्त्तये । मयाशेखरचन्द्रस्यरचितावरचन्द्रिकाचन्द्रिकाया-
अव्ययानिसमाप्तानि । शूद्राचेति । निरूपितमिति । नचमहा-
शूद्रसमुदायस्यनिषेधेप्यवयवाट्टाप्स्यादिति वाच्यममहत्पूर्व-
ग्रहणवैय्यर्थापत्तेः नच समुदायनिषेधेऽवयवादुत्पत्तौढगवद्ब-
वादेवेति तत्फलमिति वाच्यं स्त्रीवाचकेभ्यइत्यर्थेसमुदाया-
दवयवाच्चप्राप्तौ वृक्षप्रचलनन्यायेनावयवादनुत्पत्तेः । नच कु-
म्भकारेयोप्यापद्येतेति भाष्यविरोधएतन्न्यायेनाऽवयवादनु-
त्पत्तेरिति वाच्यं स्त्रीप्रत्ययान्तादित्यर्थस्यैवसिद्धान्तत्वात् परन्तु
अनुपसर्जनाधिकारेण तदन्तविधौमहाशूद्रोतिनस्यादित्यमह-
दिति निषेधःनचशूद्रशब्दार्थस्यस्त्रीत्वाभावः । महाशूद्रइति ।
स्त्रीत्वविवक्षायामपि नागेशमतेटाबनापत्तेः । नचादन्तलक्षण-
टाप्ङीषाबाधात् वस्तुतोविवक्षादिकमप्रयोजकम् । उपजनि-
ष्येति न्यायेनसमासात् प्राक्टाबनुत्पादादवयवेजात्यारोपेण-
जातिसत्वाट्टाप्स्यादेवेति चेन्न । प्रियामहाशूद्रायस्येति वि-
ग्रहेयत्स्त्रीप्रत्ययान्तंशूद्रेति नतदुपसर्जनमिति ह्रस्वोनस्या-
दित्यत्रबोध्यं महाशूद्रान्ङीबवयवाट्टाप्च्स्यात्तत्रयस्येति लो-
पेपिवृक्षेति न्यायस्यफलभेदेऽप्रवृत्तेर्ढगापादानशङ्केति बाध्यं ।
कुक्कुटाण्डेति नच वार्तिकाभावेकुक्कुटाण्डमिति स्यात् प्रत्या-
ख्यानभाष्येणानभिधानात् । टावृचिशेषात्सूत्रभाष्येति । नच

परत्वाट्टावृचीत्यस्यापवादतेति वाच्यम् प्रत्याख्यानभाष्येण पूर्वविप्रतिषेधाङ्गोकारात् । सूत्ररीत्येष्टस्येति । पादन्तकृत-समासांतस्यानभिधानेद्विपदीति सामान्यतोऽपि नसिद्धेदिति भावः । नच सूत्रवैयर्थ्यमिति ऋच्येवानभिधानेसूत्ररीत्येति-ग्रन्थासङ्गतिरिति वाच्यम् सूत्रमतेद्विपदीति सिद्धंकृत्वा-पश्चादृगिति लापनेसिद्ध्यतितन्नसिद्धेदित्यर्थात् । नचैवमे-कपादिति सिद्धंकृत्वाऋगितिलापनेसूत्रमतेपि तत्सिध्यतीत्य-नभिधानशङ्कासङ्गतिरिति वाच्यम् । अस्यग्रन्थस्यचिन्त्य-त्वाद् वस्तुतोऽभावपर्यन्तव्यापारस्य लक्षानुरोधेनव्यवस्थित-तयात्रतदभावएकपदीऋगभावपक्षेटाबिति सूत्रकारमतेङीब-न्तस्यासिद्धिरित्याशयः। त्यकनोकरस्येति। तिकनीकारकरणेनने तिभाष्यम् । नच प्रक्रियालाघवेन तथाकरणंप्रथमोपस्थिता-कारत्यागेबीजानापत्तेस्तादृशलाघवानादरात् प्रत्ययस्थानच-सर्वाइति कृत्वानन्तरमकचिपूर्वत्वेन दृष्टस्यकार्याभावेनस्था-निवत्त्वाप्रवृत्तौ तत्राव्यवधानेचारितार्थ्येन कारिकेत्यत्रस्थानि-वत्त्वेन व्यवधानान्नस्यात् समर्थानामित्यनुवृत्तेरितरत्रनव्यैरु-क्तत्वात् कृतसन्धेःकार्योचितत्वादिति वाच्यम् क्षिपकदी-नांचेति निषेधाज्ज्ञापकाद्व्यवहितेपि प्रवृत्तेः। अत्रेदन्तत्वम् । आपियः ककारइत्युक्तेसामर्थ्याज्ज्ञापकेनवैकवर्णव्यवधानं-सिद्धम् । आपियोऽकारइत्युक्ते तुवर्णद्वयमुदीचांनचस्त्रीबो-धकाकारस्य साङ्काश्यकेऽभावोवुनस्तत्रशक्तेरभावादामति-क्रान्ताऽस्याऽज्ञाताअत्याऽत्यकेत्यादौच ङ्याबग्रहणेदीर्घइत्य-स्यप्रत्याख्यानअकारस्यस्थानिवत्त्वेन स्त्रीबोधकत्वान्नदोष इति

वाच्यम् । तद्रूपयोगाभावात्प्रत्याख्येयमेवेत्याशयादुदीचा-
मापोयकाभ्यामिति वक्तव्यमत्र नच प्रतिपदोक्तआपोन्य-
तरस्यामिति ह्रस्वएवस्यादिति वाच्यम् । आर्यकेत्यत्रापि
ह्रस्वंबाधित्वाऽस्यप्रवृत्त्यादोषाद् बह्वृचटकिकेत्यत्रह्रस्वाभावेना-
स्यचारितार्थ्येन बाधनायोगइति वाच्यमेवञ्चेदतइति नानुवर्त-
ते तथाचार्य्यकेत्यत्रस्थानिवत्वेनाप्त्वाददोषात् ङ्याब्ग्रहण-
इति तु प्रत्याख्यातमेवान्येतुस्विक्षुच्छापिकेत्यत्रविकल्पः स्या-
त् सिद्धान्तेतु स्त्रीबोधकेत्यस्यार्थस्यसिद्धान्ततत्वेन नपुंसका-
देशस्यस्थानिवत्वेन विशिष्टेस्त्रीबोधकत्वेप्यवयवअभावान्नेत्त्व-
विकल्पः। नच समासेऽवयवगतस्त्रीत्वं तथासत्यर्द्धपिप्पलीत्य-
त्रावयवनिष्ठनपुंसकत्वेन ह्रस्वापत्तेःवस्तुतस्त्वार्यकेत्यत्रस्थान्य-
र्लनिष्ठत्वेनाप्त्वन्दुर्लभमिति केचित् परेत्वित्येकेत्यत्रापोऽभावे-
न विकल्पानापत्तिरित्याहुः । अत्रफलभेदान्ङ्याब्ग्रहणेऽदीर्घ-
इति प्रत्याख्यानासम्भवइति तत्वम्। अनुपसर्जनात् । आचार-
क्विन्तेति। नच कर्तृक्विप्यतोलोपअदन्तत्वाभावादेवादोषइति
वाच्यं गौरादिपठितानडुहइत्यादिक्विबन्तस्यानभिधानमित्या-
शयाद् नचोपसर्जनत्वं स्वार्थविशिष्टार्थान्तरबोधकत्वम् । अत-
एवतदोरिति सूत्रेद्वइति प्राप्नोतिस्वइति चेष्यतइति भाष्य-
स्यैकदेश्युक्तित्वकल्पनाऽभावः । एवञ्चोपसर्जनत्वाभावः प्र-
कृतइति वाच्यम् । अर्थान्तरवत्त्वेनदृष्टंयत्स्वार्थबोधकत्वं तद्-
रूपोपसर्जनत्वात् । वस्तुतोदृष्टपदनिवेशेमानाभावः । तदो-
रिति सूत्रस्थभाष्यविरोधश्चेति बोध्यम् । पञ्चगवधनइति ।
नच राजपुरुषेकार्यकालेनलोपार्थंदृष्टस्येतरानपेक्षत्वस्यग्रहणेदो

षएवेति वाच्यं तत्रयथोद्देशेनैवनिर्वाहेदृष्टपदनिवेशाभावेनप्रातिपदिकत्वात्। रूपमित्यर्थइति। यदिभावसाधनविधिशब्दस्तदापंक्तेरलग्नतास्यादतः कर्मसाधनेनतदन्तशब्देनकर्मधारयस्तथाच तदन्तंयद्विधीयमानमण्णतान्तमित्येवंरूपमित्यर्थः। प्रत्ययविधाविति। नचविशिष्यतत्तद्रूपेणोपादानएवग्रहणवतेति निषेधप्रवृत्त्यानज्ञापकतेति वाच्यम्। षिद्गौरेतिसूत्रेविशिष्योपादानात्तदानात्रफलमित्याशयात्। नचतथापि नज्ञापकतेति कुम्भकारेयापादनभाष्यासङ्गतिरिति वाच्यम्। एतद्भाष्यप्रामाण्येनविशिष्येत्यस्यचिन्त्यत्वात्। अनन्वयापत्तेरिति। नचैरपत्यंस्त्रीत्यादौसम्भवइति वाच्यम् प्रत्ययग्रहणइत्यस्य वाचनिकत्वेन तस्यानेननिषेधाभावादितितत्वं। कुम्भकारेयइति। ननु स्त्रियामिति गृह्यमाणविशेषणाद् नदीषोबह्वकुरुचरेत्यादौ नाप्यतिधीवरीतिफलंशूद्राचेतिज्ञापकेनसिद्धेः। नचशूद्राचेतिज्ञापकेनबह्वकुरुचरेति व्यावर्त्यमेवेति वाच्यं तथापि ज्ञापकतासंगतेः किञ्चशूद्राचेत्यनेनतत्सूत्रएवतदन्तज्ञापनं।अतिधीवरीति तुबह्वब्रोहौवेति ज्ञापकात् तत्सूत्रन्तदन्तंयत्तुतेनचात्रसिद्धंकुम्भकारेयस्यापि निष्कृष्यैकार्थीभावाभावेवृत्त्यभावेनानापत्तिः नचपरमगार्ग्यायणइति भाष्यादस्माच्चतद्भावेपिवृत्तिः तथासत्यपि वृक्षप्रचलनन्यायेन समुदायादेवोत्पत्तिःस्यात् नचफलभेदेवृक्षप्रचलनन्यायाऽप्रवृत्तिः वभूवेत्यादावपि तदप्रवृत्तौदोषात्फलभेदेपि तत्प्रवृत्तिरित्यङ्गीकारात्किञ्चपारिष्कारिकार्थवत्वाभावेन प्रातिपदिकत्वाभावादेवनदोषः नच मूलकेनोपदंशमित्यत्रप्रातिपदिकत्वार्थनियतसमभिव्या-

हारातिरिक्तस्य तत्रग्रहणेनार्थवत्त्वमेवेति वाच्यं निपातस्यानर्थकस्येति स्थानेऽव्ययस्येतिपठना दोषात् । नचभाष्यप्रामाण्यादर्थवत्त्वं तर्हि नियतसमभिव्याहारातिरिक्तेविशिष्टस्यस्व्यर्थवाचकत्वेनावयवस्यस्व्यर्थवाचकत्वाभावेनादोषाद् नचैतदप्यारोपितंवर्ततेभाष्यादिति वाच्यं तर्हिवृक्षेति न्यायेनैवदोषदानस्यसुवचत्वात् । नचावयवादुत्पत्तावपि विशिष्टस्यापि प्रकृतित्वेनोभयोर्वृद्धौ दोषोनेत्युक्तन्यायेन खण्डनमसङ्गतमिति वाच्यं धाटचकाशेयेदोषतात्पर्यात् तत्रोभयवृद्धौदोषादिति चेन्न वृक्षेतिन्यायस्यैतद्भाष्यादप्रवृत्तेः । नचकरोतीति करःकुम्भस्करेति टावन्तेनसमासेऽवयवादेवोत्पत्तौ कुम्भकारेयोगलेपतितइति वाच्यम् । गतिकारकोपपदानामिति पूर्वसमासेनन्तरंटापितदभावात् षष्ठीशेषइत्यस्यापिकारकत्वाङ्गीकारात् नचसेनान्तलक्षणकारिभ्यश्चेतिण्येनबाधाड्ठगेवनेङ्ङी वाच्यं विशेषविहितत्वेनढकएवप्रवृत्तेः यहा कुम्भकारीवमनुष्यःकुम्भकारीतस्यापत्यमित्यर्थेस्त्रीभ्योढगित्यस्यस्त्रीप्रत्ययान्तादित्यर्थेऽवयवाङ्ङीप्यवयवेनिष्कृष्यैकार्थीभावाभावाद्ढगनुत्पत्तौ कौम्भकारेयोनसिद्ध्यतीत्यनुपसर्जनाधिकाराभावेदूषणं नचस्त्रीभ्योढगित्यत्रस्त्रीवाचकादित्यर्थेनादोषइति वाच्यं कन्नन्तस्यबहुव्रीहौ ह्रस्वानापतिरनुपसर्जनाधिकाराभावेविशिष्टस्योपसर्जनत्वेऽप्यवयवस्योपसर्जनत्वाभावाद् यदिशास्त्रीयमुपसर्जनंतत्रगृह्यतें तर्हिप्रत्याख्यानंवरमिति दिक् । नचटिड्ढेतिसूत्रेतदन्तग्रहणंकर्तव्यमिति वाच्यं तथासतियदितदन्तेस्त्रियामिति विशेषणंतर्हिबहुकुरुचरेतिदूषणं यदिगृह्यमाणस्य तदाऽपिशालेति-

दूषणंसिद्धान्तेत्वनुपसर्जनादिति गृह्यमाणविशेषण उभयंसिध्यतीति बोध्यम् । अर्थवत्त्वाभावेनेति । नचानुपसर्जनाधिकाराभावेऽवयवस्याप्रातिपदिकत्वेन ङीबुत्पत्तिःकृतेदानीन्तुतदभावइति विरोधइति वाच्यं तदधिकाराभावईदृशार्थवत्त्वग्रहेऽप्रमाणाभावात्तदधिकारसत्वेतेनेदृशार्थवत्त्वज्ञापनादितिच बोध्यम् । निष्कृष्यैकार्थीभावत्वञ्चापत्याद्यर्थान्वयितावच्छेदकावच्छिन्नवृत्तिमत्त्वं नचविशिष्टंशुद्धान्नातिरिच्यतइति न्यायात्केवलेप्यन्वयितावच्छेदकावच्छिन्नइत्यलपर्यासिमत्त्वस्य निवेशयत्वात् । असहायएवेति । तत्वञ्चातिदिदिक्षितधर्मावच्छिन्नासमभिव्याहृतत्वंधर्मश्च स्ववृतिधर्मनिरुप्यःतेनरामइत्यत्रनसर्वशब्दत्वातिदेशःसर्वशब्दत्वस्य रामशब्दत्वनिरूपितत्वाभावात् । नचासमभिव्याहृतत्वमिति मास्तुदरिद्रेत्यत्रतत्वाभावान्नदोषः । अन्तत्वञ्चस्वघटकप्रागभावानधिकरणत्वमितीकारवृत्तिनिरूप्यत्वं नास्तीति वाच्यं तदनधिकरणकत्वरूपाऽकारवृत्तिधर्मस्याभावइकारेस्तीति तादृशाभावरूपेकारवृत्तिधर्मेणतदनधिकरणत्वरूपाकारवृतिधर्मप्रतियोगित्वस्यनिरूपितत्वावदेवाश्रीयते नच तदधिकरणभिन्नत्वमिति स्वस्मिन्स्वभेदानङ्गीकारेण नान्तत्वमिकारस्येति वाच्यं पूर्वोक्तरीत्याऽप्यन्तत्वस्यानेतुंशक्यत्वादतोऽसमभिव्याहृतत्वमि।एवंचैकदेशयुक्तित्वमावश्यकमेव वस्तुतएकस्मिन्नित्यस्यैकव्यक्त्याऽभिन्नइत्यर्थः । नत्वसहायइति । व्यपदेशश्चविशिष्टवैशिष्ट्यंतथाचैकव्यक्तिभिन्नेविशिष्टवैशिष्ट्यावत् कार्यविशिष्टत्वंचघटकत्वघटितत्वादिरूपम् । अस्यापत्यमित्यादौ [illegible]त्वातिदेशे-

र्थात्तदनधिकरणकत्वरूपमतत्वमिति लक्षणसमन्वयइत्यायेत्यादौच घटितत्वातिदेशेर्थादवयवित्वप्रतीतिः दरिद्रेत्यादौ तद्घटकत्वातिदेशेपिनतदनधिकरणत्वरूपमिवर्णान्तत्वमायातीतिनातिव्याप्तिः । इरियानित्यादौ तदादित्वानतिदेशेपि स्थानिवद्भावेनतद्धितान्तत्वमानेयम् । अतएवनप्रत्ययमात्रस्य तदन्ततांब्रूमइति दीक्षितग्रन्थसङ्गतिःनचास्यापत्यमिति विग्रहअणित्यवस्थायांप्रत्ययमात्रस्य प्रातिपदिकत्वापत्तिरिष्टापत्तेः । नचौपगवेत्येकदेशाकारस्यापि प्रातिपदिकत्वापत्तिः वृक्षप्रचलनन्यायेनादोषादिति निर्दुष्टःपंथाः । नञस्नञौ । पुनरत्रेति । नचवयोवांचिनां वैकल्पिकजातिकार्यत्वाद्पुंयोगेरूपद्वयंसिद्धंपुंयोगेवयस्यचरमइति बाधित्वापुंयोगादाख्यायामिति ङीषेवस्यादिति वार्तिकंतत्रकृतेपि वार्तिकेनङीषंबाधित्वाङीबेवस्यादिति गौरादिपाठः । तत्सामर्थ्यात्पक्षेङीष्इति रूपद्वयसिद्धं तत्रवह्वादिषु पाठः कार्यःकिंवामनोरौवेत्यनन्तरंवार्तिकंकार्यंतेनसर्वत्रारूपद्वयेसिद्धेगौरादिपाठः किमर्थइति वाच्यम् । एवंसिद्धएवंक्रियमाणेन वैकल्पिकंजातिकार्यस्यानित्यत्वं बोध्यते तस्माच्चवह्वादिपाठस्यापुंयोगेचारितार्थ्यंपुंयोगेपरत्वान्ङीषेवस्यादेवं मनोरौवेत्युक्तेरनन्तरंपाठेपि पुंयोगेचारितार्थ्येनापुंयोगेङीषएवस्यात् तस्माद्गौरादिपाठः । वार्तिकंचेतिवहवोऽनित्यत्वफलन्तु वृद्धास्थविरेत्यत्रनैवङीष् अत्रैवब्रूमः तरूणीसुरेत्यत्रवयोवाचकत्वाभावादप्राप्तेङीबर्थंवार्तिकं तत्रापुंयोगेवैकल्पिकजातिकार्यत्वेन रूपद्वयेपि परत्वात्पुंयोगेङीषेवस्याद्वार्तिकंत्वत्रचरितार्थमिति पुंयोगेङीष्टित-

मेकमेवरूपं स्यादिति सिद्धमिष्टंगौरादिपाठश्चव्यर्थोऽत्रवि-
चारयन्तुसुधियः। वार्तिकस्यान्यार्थतापत्तेश्चेत्यर्थः। तत्रेकगि
तिह्रस्वः पाठःशक्तिषष्ठीरिकगैवविधेयः विधानसामर्थ्यान्नय-
स्येतिलोपः। अन्यथाकगमेवविदध्याद् वहिषष्टिलोपइत्यत्र-
वहिषः षलोपोऽश्चइकगिति पाठ्यन्तेननदोषोविधानसाम-
र्थ्यान्नलोपइति चेन्न। तीयादिककितृतीयीकासिद्धेः नचतत्र-
दीर्घोत्रैव ह्रस्वःतार्तीयीकीत्यसिद्धेः। प्राचांष्फ। ननुष्फडेववि-
धेयः किन्तद्धितग्रहणेनडित्वसामर्थ्यादासुरेरुपसंख्यानमिति
सिद्धमिति चेन्न। संहितापाठेडिदपि संभाव्येतकिञ्चतस्यार्द्ध-
मात्रिकत्वेनाऽविशेषात् किञ्चगौकक्ष्याशब्दाद्गर्गादियञन्त-
प्रकृतिकक्रौडादियङ्ङन्तप्रकृतिकचाबन्तात्तद्विवक्षायाम्भस्या
ढइति पुंवत्वार्थन्तस्याऽऽवश्यकत्वात्। नचभाष्येतत्प्रत्याख्या-
तमिति वाच्यं तद्वदस्यापिकृतप्रायत्वात् प्रत्याख्यानेषाद्यञइति
चापिगौकक्षातस्मात्ष्फइति सिद्धागौकक्ष्यायणीनचगौकक्ष्या
इति स्यात् ष्फस्यचापोऽपवादकत्वादिति वाच्यं प्राचांष्फइ-
त्यत्रसर्वलग्रहाऽनुवृत्तिस्तच्चबाधकविषयेपि प्रवृत्त्यर्थंगौकक्ष्याइ-
ति तूदोचांमतएवश्चगौकक्ष्यायाः प्रतिषेधोवक्तव्यइति स-
म्प्रसारणनिषेधकं वार्तिकमपिनारम्भणीयमित्यपरमनुकूलं।
टिड्ढाण। टिदाद्यवयवेति नचटिदाद्यवयवोकारइत्युक्तेकारस्य
प्रत्ययत्वात्तदन्तग्रहणाऽभावेन प्रातिपदिकविशेषणेनैव तदन्त
विधौपरमकुरुचरीति नस्यादिति वाच्यम् एकस्मिन्नपितदन्त-
विधौटिदाद्यवयवाऽकारान्तत्वस्य प्रत्ययाप्रत्ययग्रहणेप्रत्ययग्र-
हणइत्यस्याऽप्रवृत्त्यासमुदायेपि सत्वात्। नचैवंवह्वकुरुचरेत्य-

प्यपि वारणार्थमनुपसर्जनाऽधिकारस्य चारिताऽर्थ्येनज्ञापकता-ऽसम्भवइति वाच्यं टिदित्यादिप्रत्ययग्रहणेनतदन्तग्रहणेन टि-दन्तमित्यर्थात्समुदायेतदभावेनाचारिताऽर्थ्यात् टिदाद्यवयवा-कारान्तमित्युक्तेतुपरिभाषाबाधः स्यात् । तथाच टिदन्तांत-यदकारान्तमित्युक्तेपञ्चाश्चेति प्रत्ययाऽकारष्टिदाद्यवयवोग्राह्य इत्याकलनीयंपरेत्विति नचकचिदनल्विधाविनिषेधइत्यस्या ऽभावेन चक्राणइत्यत्रस्थानिवत्वेनटित्वाट्टेरेत्वंस्यादिति वा-च्यम् । टितइत्यत्रतङामित्यनुवर्तते टिदन्तस्तङांटेरइति न्या-सेनवाऽदोषात् नचङिदादेशानांनङित्त्वमित्यस्याभावेलविषो-ष्टेत्यत्रगुणोनस्यादिति वाच्यं लिङ्सिचावितिक्ङितिकित्ववि धानाज्ज्ञापकात् कचिन्नङिदादेशानांङित्वमित्युच्यमानत्वात् । हलउपधायाइति नचसामर्थ्याद्व्यवधानेपि भवतिगार्ग्यायणी-त्यत्रतुयेननेति न्यायेननदोषइति वाच्यम् । उपधापदानुवृत्तेर्व-च्चनकल्पनापेक्षयालघीयस्त्वात् । षः । आदिरुपरञ्जकेति । अवि-मह्योष्टिषजित्यादावनायासतोवारकतयेतिकेचित् । नादेशाइति नचेत्संज्ञाभवतुलोपंवाधित्वाऽऽदेशःस्यादेवेति वाच्यम् । इदि-तिमहासंज्ञयालोपंविनासंज्ञाऽप्रवृत्तेः सर्वत्रसर्वेषामिति फलि-तार्थः सप्तम्यास्त्रलुत्पत्तेः । आवव्यायनीति प्राचांष्फस्तद्धितः सर्वत्रेतिन्यासेनसिद्धम् । एतेनापकर्षःपरास्त आरम्भसाम-र्थ्यादुत्तरसूत्रेनित्यत्वसिद्धेः नच माण्डूकस्याण्णन्तत्वेन ङीप्-प्राप्तइति टाप्ङोपोरिति सुगमइति वाच्यम् । कौरव्यसाह-चर्येणगोत्राणंतमात्रस्यग्र णेन तत्रजातिलक्षणङीषाबाधादि-ति सुधियः । विभाषा । वहवाहृषलपत्य ति नचात्रप्रयोजना-

दनुपसर्जनादिति ज्ञापनाऽसंगतिरत्रैवकर्त्तव्येतत्करणात् । नचात्रविशिष्टस्याऽनुपसर्जनत्वमेव सपूर्वपति शब्दत्वाभावात् । पतिशब्देसमासकालेबहुवृषलेत्यस्याऽनवयवत्वात् तदन्तस्येतिनासूत्रिमूलोक्तेदोषात् समासस्येति तुनासूत्रिबहुच्पूर्वेऽनापत्ते र्बहुवृषलपत्तौतुनदोषः प्रत्यासत्त्यापतिशब्देन केवलेनजातस्यसमासस्यानुपसर्जनस्यग्रहणात् । वृत्तेरितितुनोक्तंपतिरिब्रह्मनुष्यापतिरित्यत्रापत्तेः व्यपदेशिवत्त्वेन सपूर्वत्वात् स पूर्वग्रहणन्तु वृत्त्यभावेचरितार्थंत्रीण्येति कुम्भकपाललोहिनीत्यत्रनप्राप्नोत्यतइयं व्याख्यागृह्यमाणविशेषणमिति त्रिष्वेनीत्यर्थोबोध्यः सपत्नीत्रि निपातात् स्त्रीविशेषएवेत्यर्थः । सूर्य । सूर्यादीनामङ्गानामित्यर्थेसौरोनस्यात् । यग्रहणमिति । सूर्यमानयतीति सूर्याणीत्यत्रैकादेशअकारस्य सूर्यसम्बन्धित्वादुपधात्वाच्चलोपः स्यादित्यावश्यकमिति केचित् । उपधात्वाभावान्नेत्यपरउपमिति विसारिणोमत्स्यइति निर्देशोऽसंदेहायङाबित्येववक्तव्यत्वाद्वासप्तम्याअग्रहणंनक्षत्रवाचकादिति व्यावर्त्यन्तुतिष्यसंज्ञकपुरुषस्येदन्तैष्यमित्याहुः दंष्ट्राइत्यस्याजादौ पाठः । अपरइति । कमण्डलाविति मेदिन्यापिठरेत्विातिपिठरतिति कोशस्यसंकोचेनानुगतत्वाज्जातित्वमित्याशयः वस्तुतएकेनकोशेनकोशद्वयसङ्कोचस्यानुचितत्वात् कोशद्वयेतर्हिकमण्डलाविति कोशउपलक्षणतयाव्याख्यापत्तिरेवंचामत्वसामान्यपरत्वेनानुगतत्वान्नजातित्वमित्यप्राप्तङीषएवविधानं ननियमइति बोध्यं । नील्या अनित्यत्रप्रतिपदोक्तस्येति बोध्यम् । वोतोगु । सत्वेनिविशतेऽपैति पृथगिति । अभावेऽतिव्याप्तेः

सत्वेनिविशतइति। जातावतिव्याप्तेरपैतीति। आत्मनिष्ट-धर्मेति व्याप्तेःपृथगिति। आश्रयेऽतिव्याप्तेरक्रियाजइति क्रियानामकृतिसाध्याजन्यस्य क्रियात्वात्तस्यचनिषेधोऽत्रेदं बोध्यं मानेनगुणलक्षणमभिहितमाकडाराइत्यत्रभाष्येतुगुणवचनलक्षणमभिहितमेवंचविरोधाभावाद्हूविशेषणसार्थक्याद्भाष्यं-सुयोजमित्येकदेश्युक्तित्वं चिन्त्यंस्पष्टंचेदं शब्दरत्नेशुचिशब्देकृदिकारादिति स्यादित्याह। शुक्लेति। नच संयोगोपध-त्वेननिषेधः खरुसाहचर्येण संयोगोपधेति निषेधोऽप्युकारान्त-स्यैवेत्याशयात्। वस्तुतःश्यामेत्युदाहरणीयं। प्रियकतिरिति। नषदस्वस्रादिभ्यइत्यस्य स्त्रियांयत्प्राप्नोतीति व्याख्यानेनात्राऽपि निषेधइदंफलंचिन्त्यंसुगन्धिरितितुफलम्। पुराणशब्द स्याण्णन्तत्वमितिङीप्ङोषःस्वरेविशेषाभावइत्युक्तम्। पुंयो। स्त्रियांवर्तमानस्येति। पुंस्येवेति। नचज्येष्ठाकनिष्ठेत्यजादिनिपातनंव्यर्थंङीषोऽप्राप्तेः पुंस्येवविद्यमानत्वाभावादित्येवस्याप्रयोजकत्वादतएव शुक्लोतिपुंयोगेसिद्धः। महद्धिममिति। नच स्वार्थेपरिपूर्णंपदार्थान्तरमाकाङ्क्षतइति न्यायेनसुबुत्पत्यनन्तरं महत्वविवक्षायांङीब्जायमानः सुबन्तोत्स्यादिति वाच्यं प्रातिपदिकादित्यधिकारेण तदव्यवहितोत्पत्त्यासुबन्तेपि दोषाभावात् तद्धितेतुप्रातिपदिकप्रकृतिकेलक्षणयासुबन्तादेवोत्पत्तिरिति ज्ञेयंयवनाल्लिप्यां यवनशब्दस्य यवनलिपेरौपचारिकत्वेनतस्येदमित्यणोप्राप्त्यातत्रैतस्य चारिताथ्यैंनयवनानांलिपिरित्यत्राण्बाधकः परत्वात्स्यादिति बोध्यम्। एवंचाण्बाधकोङीर्बाति वहवएवग्रन्थाश्चिन्त्याः अयंपुंयोगेपि ङी-

प्कालीत्यत्रनजानपदेति सूत्रेवर्णग्रहणादन्यथावर्णादिति सूत्रेकालादित्युक्त्यावर्णएवतादृशरूपसिद्धेः नचतेनङीब्भवतीत्यनुदातःस्यात् वाच्यम् । कालशब्दस्यान्तोदातत्वेनोदातस्वरेण ङीष्ङीपोःस्वरेविशेषाभावात् । यदितुवर्णग्रहणंमात्रागौरवात्पदगौरवमिति ज्ञापकतयाचरितार्थमित्युच्यते तदाम्योगेङीषिष्टएवेतिबोध्यम्। अंवांवेति। नचपदादादिरित्यर्थेगोस्थइत्यत्रसुबुत्पत्तेः पूर्वंसमासेपि निषेधप्रवृत्त्याषत्वार्थमावश्यकमिति वाच्यम् । पदस्यादिरित्यभिप्रेत्यप्रवृत्तत्वेनाऽस्यचिन्त्यत्वात्। एवञ्चनियमार्थत्वमप्रयुक्तम्। हृदिस्थइत्यपिपदादिरिति विग्रहेणैवसिद्धमितिज्ञेयम् । अस्वाङ्ग । अस्वाङ्गादिति बहुव्रीहिविशेषणेपि नस्वाऽङ्गंयत्रेतिविग्रहेण सुरापीतीत्यादिसिद्धौदोषाभावेन पूर्वग्रहणंस्पष्टार्थमेवेति वाच्यम् । उत्तरसूत्रेनस्वाङ्गं यत्रेतिकर्तुमशक्यत्वेन स्वाङ्गाभिन्नात्पूर्वपदात्परं यत्स्वाङ्गन्तदन्तादनुपसर्जनादित्यर्थेकल्याणपाणिपादेत्यत्वापत्तिः स्यात् पूर्वपदग्रहणेतु यत्स्वाङ्गंनतत्पूर्वपदंयच्चपूर्वपदं नतत्स्वाङ्गमित्यदोषइति बोध्यम् । स्वाङ्गाच्चो । एकविभक्तीति शास्त्रीयमुपसर्जनमेवग्राह्यम् । अतएवापराश्चतेकेशाश्च अपरकेशा आईषदपरकेशाइति विग्रहआपरकेशीत्यत्रपरादिवद्भावेन आपरेति पूर्वपदन्तस्मात्परं स्वाङ्गंकेशेति शास्त्रीयोपसर्जनकमिति ङीब्भवतिलौकिकाऽप्रधानत्वग्रहणेतु तत्तदभावेनङीष्नस्यादिति कृत्रिमन्यायेनशास्त्रीयस्यैव ग्रहणमुचितमिति बोध्यम् । एवञ्चाऽधानत्वंचेति ग्रन्थचिन्त्यःसमुच्चयार्थवेति सुधियः । शिखेतिप्रत्युदाहरणमिति । नचोपस-

र्जनादित्यस्याऽभावेवह्वोर्हेरित्यनुपसर्जनादित्युभयमपि प्राप्त न्तत्राऽनुपसर्जनादिति सम्बन्धेसुशिखेत्यत्रटापं बाधित्वाङो- बुपसञ्ज्ञनिष्येति न्यायेनेतिसम्यगेवग्रन्थः अशिखेत्यत्रापि न- सहनञितिनिषेधोऽस्यशिखेत्येवं भाष्याऽभिप्रायादिति वा- च्यम्। अतइत्यनुवृत्तौशिखेत्यत्रटापं बाधित्वाङोप्स्यान्नतु- सुशिखेत्यत्रोपसञ्ज्ञनिष्यन्यायस्यसामर्थ्यमूलकत्वात् शिखेत्य- त्वचारिताथ्यादित्येतद्ग्रन्थसङ्गतिरिति कश्चित् वस्तुतउपसञ्ज- निष्यन्यायस्याऽपि प्रवृत्तिरिति सम्यगेवमूलाभिमतम्। जाते- र। देवदत्तेऽति व्याप्तेःसमानकालिकाऽनेकव्यक्तिवृत्त्यनुग- तसंस्थानव्यंग्येति तत्र समानकालिकेतिविशेषणंव्यर्थमनेक- वृत्तीत्यनेनैवगतार्थत्वात् गोत्रऋचेति शास्त्रीयमौपगवीभा- र्येपु वत्वनिषेधोनप्राप्नोतीति नचाऽत्राऽपि शास्त्रीयंगोत्रंवर्त- तइति वाच्यम् एतद्भाष्यप्रामाण्याद्विशेष्येतस्यर्शवदद्रव्यपरि- माणमित्यत्रपरिमाणपदंव्यर्थंव्यावर्त्याऽलाभाल्लक्षणयागो- त्रस्य विवक्षितत्वात् परेत्विति। प्रथमपक्षउपदेशान्तर्गतत्वेना कृत्याश्रयान्यतरोपदेशव्यंग्यायद्वापक्षआकृतिग्रहणोपदेशव्यं- ग्याचेत्यर्थः। अत्रेदन्तत्वम्। औपगवीभार्येनदोषः युवप्रत्यय- लक्षणेन गोत्रत्वेन प्रत्ययाप्रत्ययसाधारणत्वात् किञ्चाऽणि- जातित्वं पूर्वकृत्वेदानींप्रत्ययलक्षणेन जातित्वाभावात् तस्या- पिसाधारणत्वात् किञ्चतावन्मात्रेजातित्वेपि ततःपरस्त्रीप्र- त्ययाऽभावेनजातित्वाऽभावः। किञ्चाल्विधित्वेन पूर्वभा- ष्येलग्नेलौकिकगोत्राऽश्रयणमनुचितम्। नापिब्राह्मोनारदइ- त्यसिद्धिः तत्र जातिपदेनाऽऽकृतिइति लक्षणकस्यघटत्वेत्या-

द्दिलौकिकस्यवाग्रहणादतएव ब्राह्मएवणइति सिद्धिरन्यथा-तत्रगोत्रत्वेन जातित्वाद्दोषःस्यात् । एवञ्चावन्तिरितिभाष्य-मप्यनुकूलमिति तत्वविदोत्रेदम्बोध्यम् । तर्टत्विष्वितको-शस्यप्रामादिकत्वमनुचितम् । किञ्चकस्यलिङ्गस्यत्यागइति विनिगमनाऽभावः जातेराविष्टलिङ्गस्वभावस्याऽपि आविष्टंग्रा-सम् स्वतएवनाऽन्यतोलिङ्गं यस्येतिविग्रहेण स्वनिष्ठलिङ्ग-त्वेपि नदोषःशुक्लादौत्वाश्रयव्यक्तिगतत्वान्नाविष्टलिङ्गत्वम् । असर्वलिङ्गमित्यस्यापि सर्वेषांयानिस्वतोऽन्यस्यचेति तदभा-ववान् किन्तु स्वाश्रयमात्रलिङ्गवतीत्यर्थेनाऽविरोधएतयोरिति द्वित्वनिर्देशोऽपि कुमारशब्दविषयइति नदोषः कुमारशब्देह्या-कृतोति लिङ्गानांचेतिह्ययमेवेति नदोषः एवञ्चगोत्रञ्चेत्य-स्यसाहचर्य्येणसंज्ञात्वमेवातिदेशेमानाऽभावात् । स्पष्टैवेति महाशुद्धीति भाष्यमेकदेश्युक्तिः । वह्वनामजादिपाठाद्द्रोणी-कुटीत्यादयोगौरादिषु बोध्याः ॥ उरू ॥ उपमानशब्देन सादृ-श्येप्रतीतेतस्मात्स्वार्थेष्यञ् सादृश्यविशिष्टपूर्वपदाक्षेपायेक्षया केवलपूर्वपदमाक्षिप्योपम्यइति विशेषणतेनकरभोपमोरुरित्य-त्रदोषइति चिन्त्यम् ।

इति सदाशिवभट्टगाम् स्त्रीप्रत्ययाः समाप्ताः ।



अथ सदाशिवभट्टाम् शुद्धाऽशुद्धयोर्व्यवस्थापत्रम्

अशुद्धं	पृ०	पं०	शुद्धं
वाभा	१	४	भावा
भक्या	१६	१	भक्त्या
प्रकृत्या	१७	११	प्रकल्पृत्या
येति	१९	५	पेति
न्त्यश	१९	७	न्त्सश
यत्	२५	१४	पत्
सूत्रेकाशायाः	४१	१	सूत्रेभाष्यकैयटयोस्संहिताधिकारःसंहितासंज्ञाचप्रत्याख्यानोक्तेषुतेषामनिष्टत्वेतुतत्रतद्वारणायतदावश्यकत्वेनतद्विरोधस्पष्टएवेति वाच्यम् तावन्मात्रफलकत्वेऽवसानकार्येऽलइति पञ्चम्यन्तंपदद्वयंकर्तव्यंतावतैवेष्टसिद्धेरित्याशयात्। सावकाशायाः
ऽसखि	४८	१७	ऽतिसखि
टिकादौ	५१	२३	टकादौ
पद इति	५९	१३	यर इति
अन्यत्रवोति	५९	१४	अन्यत्रमेति

अशुद्धं	पृ०	पं०	शुद्धं
तस्यचौटूइत्य	६०	९	तस्यचौड्इत्य
प्रगृह्यत्वेच	६०	११	प्रगृह्यत्वंच
ऽतिखट्वाइत्थ	६१	१	ऽतिखट्वायेत्यत्र
ऽऽस्वादिरिव	६२	१४	ऽऽत्वादेरिव
दिड्विधेतिदेशः	६२	१९	दिड्विधावतिदेश
तेनाप्य	६३	१९	नतेनाप्य
स्थानितो	६४	१	स्थानिनो
काण्णन्ते	६५	२	कासान्ते
पसाविति	६६	१	यसाविति
प्रत्यज्येति	६६	२०	प्रसज्येति
घटकविपि	६८	१८	घटकविधि
एनेयेति	६९	१९	एनेयेपि
विसगो	७०	९	विसर्गो
नित्यत्वमत्व	७०	२२	नित्यन्नभत्व
सुनोतोः	७२	९	सुनोतेः
आदिरिनि	७८	६	आदिरिति
त्यादिनांताः	७९	१९	त्यादिनाकण्ठः
भृजामि	७९	२	भृज्जामि
तदऽनक्त्या	८०	२३	तदनुक्त्या
लक्ष्यासि	८१	७	तस्यासि
दिक्त्वादे	८३	१	दक्त्वादे
तुनेत्य	८३	९	तुनैनेत्य
अनुताव	८६	६	अनुवृत्ता
पञ्चप्रय	८६	१५	पुंप्रय
इदमुपक्षण	८७	१	इदमुपलक्षणं
कात्स्न्ने	८७	२०	कात्स्न्नें

अशुद्धं	पृ०	पं०	शुद्धं
जलोञ्ज	८७	१७	झलाञ्ज
लृकार			लकार
इत्तिलो	९२	३	इतिणो
तेनत्वा	९२	५	तेननत्वा
प्राप्त्याङे	९५	९	प्राप्त्याटे
प्रत्यभिङे	१७	१०	प्रत्यभिवाङे
मप्यत्वस्य	९९	१२	मप्युत्वस्या
त्यनुतं	१०१	२३	त्यनुवृत्तं
मग्नास्या	१०९	१६	भग्नास्या
नित्यंवत्व	१२०	३	नित्यंषत्व
शब्देपूर्वनस्य	१३३	३	शब्देपूर्वस्य
पदोन्तर	१३७	१३	पदोत्तर
भवतीत्यर्थाभा	१४९	९	भवतीत्यर्थेनाया-तीत्यर्थाभा
पुनः	१५४	२२	वुनः
वाच्यम्	१५९	२	नवाच्यम्
गान्तलोप	१६३	१२	गान्तलोपे
इनि	१६८	१७	इकि
रामेभ्यः	१६८	२१	एभ्यः
शेषर	१७६	६	शेखर

अशुद्धं	पृ०	पं०	शुद्धं
इल्पाका	१८३	२१	इत्याका
हित	१९२	२३	विहित
प्रापकमु	१९४	८	प्रायकमु
वादिषुच	१९६	१७	कादिषुवद्वादिषुच
पिपौपियः	१९८	४	पियौपियः
पञ्चभव	१९८	१२	पचभव
चवर्गा	१२००	२३	कवर्गा
प्रथिमित्यत्रा			प्रथिमृतस्यसग्रीपं उपप्रथिममित्यत्र
मभि	२०७	१६	मभिप्रेत्य। नेति
प्रकृतौ	२१३	१	प्रवृतौ
मास	२२२	३	मांस
स्यात्	२२३	१४	स्यादुपधाग्रहणेतु
मुकारउकार	२२५	१८	भ्यांडकारेडकारा
रूप	२३१	७	रूपं
कत्वचि	२३३	२२	अत्वचि
स्वसते	२४२	१८	स्वमते
इमत्र	२४२	१९	इदमत्र
भातूस	२४६	५	मात्स
कदीनां	२४९	१७	कादीनां
षष्टचो	२५५	३	यष्टचो